# Shri Dayasahasram by Lakshmidasa

# શ્રીલક્ષ્મીદાસવિરચિતં દયાસહસ્રમ્

## Document Information

Text title : Dayasahasram by lakShmIdAsa

File name : dayAsahasram.itx

Category : devii, vedAnta-deshika

Location : doc_devii

Author : lakShmIdAsa revealed by vedAntadeshika

Transliterated by : M N Ramanuja

Proofread by : M N Ramanuja

Latest update : March 17, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 18, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીદાસવિરચિતં દયાસહસ્રમ્

## ૧. પ્રથમશતકમ્

શ્રીઃ ।
શ્રી પદ્માવતીસમેતાય શ્રીનિવાસાય નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમદ્વરવરમુનયે નમઃ ।
શ્રીમતે નિગમાન્ત મહાદેશિકાય નમઃ ।
શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતં દયાસહસ્રમ્ ।
અથ દયાસહસ્રે પ્રથમશતકમ્ ।

વન્દે વન્દારુમન્દારં તં વૃષાદ્રિ વિહારિણમ્ ।
યત્કૃપાવિતરત્યારાત્ પુરુષાર્થ ચતુષ્ટયમ્ ॥ ૧॥

ફણાસહસ્રો દ્વિસહસ્રજિહ્વઃ
શુદ્ધાત્મકો ભોગિપતિસ્ત્વદીયામ્ ।
દયાં ન દક્ષો ગદિતું કથં વા
તાં વર્ણયામ્યદ્ય વૃષાદ્રિનાથ ॥ ૨॥

અથવા મદ્રસજ્ઞાયાં તાં વાણીમનણીયસીમ્ ।
નર્તયત્યહિશૈલેશ કરુણા ચિરકાઙ્ક્ષિતા ॥ ૩॥

કરુણાવરુણાલયાર્તિહારિન્!
કરુણા તે તરુણાગસિ પ્રકામમ્ ।
ચિરજીવિનિ મય્યપિ પ્રસન્ના
શરણં હન્ત! રમેરિતા બભૂવ ॥ ૪॥

શરણાગતવત્સલત્વમમ્ભો-
રુહનેત્રસ્ય હરે! કથં ભવેત્તે ।
કરુણા યદિ વલ્લભા નહિ સ્યાત્

ત્વયિ નિત્યં પરતા લસેદ્ગભીરા ॥ ૫॥

દયા પયોધિતનયા હૃદિ ચેન્ન દ્વયં તવ ।
નિર્ભયશ્શરણં પાપો વ્રજેયં ત્વાં કથં હરે ॥ ૬॥

ઇન્દ્રનીલમણિગ્રાવપ્રસ્રવત્કરુણારસમ્ ।
પાયમ્પાયં ભવારણ્યશ્રમમત્યજમાદરાત્ ॥ ૭॥

અયિ! દયે! હૃદયે કમલાપતેઃ
કૃતપદોરસિ સિન્ધુસુતા સ્થિતા ।
અપરતન્ત્રમપિ શ્રિતવશ્યતા-
મનયતાં તમુભે મહદદ્ભુતમ્ ॥ ૮॥

સા કલ્પવલ્લી સુકૃતિભ્ય એવ દદાતિ કામાંસ્ત્રિદિવે યથેચ્છમ્ ।
હરે! દયાખ્યા તવ કલ્પવલ્લી પાપાત્મનાં પૂરયતીપ્સિતાનિ ॥ ૯॥

અનુકમ્પા સદાકમ્પા પઙ્કજાક્ષ! દૃશોસ્તવ ।
યદ્ દૃશ્યતે કટાક્ષં તત્કાઙ્ક્ષે મન્તુકૃદપ્યહમ્ ॥ ૧૦॥

અનુદિનમનુકમ્પા કમ્પિતં પાપસઙ્ઘૈઃ
અહિગિરિનિલય! શ્રી શ્રીનિવાસ! ત્વદીયા ।
સ્મૃતિપથમનુયાતા સાન્ત્વયત્યાદરાન્માં
ત્યજ ભયમિહ વત્સેત્યાશુ માતેવ દીનમ્ ॥ ૧૧॥

અયિદનલ્પગુણં તવ ચિદ્ઘણં
કરણકાયગણૈર્ઘટયન્ હરે! ।
ઇહ પુમર્થચતુષ્ટયભાજનં
સમકરોઃ કરુણા કિલ કારણમ્ ॥ ૧૨॥

પુપુષુષ્ષડ્રસા માન્તુ ષડ્વર્ગો મિત્રતાં ગતઃ ।
નાપરાધી કથં સ્યાં ત્વદ્દયા મામુદ્ધરેદ્ધરે! ॥ ૧૩॥

કરુણાકર! શેષશૈલવાસિન્!
કરુણા તે મધુરે સ્મિતે દૃગબ્જે ।
પ્રચુરા વરદાયિ પાણિપદ્મે
જનતાં સાન્ત્વયતિ પ્રકામપાપામ્ ॥ ૧૪॥

સર્વાન્ ગુણાન્ સફલયત્યવનૌ મુરારે!
સા તે દયા જલધિજાસહચારિણી યા ।

વૈકુણ્ઠધામ્નિ પરતૈકગુણોજ્જ્વલસ્ય
તેઽન્યૈર્ગુણૈઃ કિમમલૈઃ પરિશુદ્ધસત્ત્વે ॥ ૧૫॥

અહિશૈલપતેઃ પ્રિયે! દયે! ત્વં
ગુણિનસ્તત્ત્વવિદો વિહાય દૂરે ।
અઘદુઃખિજનૌઘમાર્ગણે કિં
નિરતા કારણમત્ર વેદયામ્બ ॥ ૧૬॥

પ્રવિઘટય્ય રમામપિ સત્વરં
ગજપતેઃ કરુણોક્તિવિચોદિતા ।
અયિ દયે! ગરુડેન તદન્તિકં
સમનયઃ પ્રજવં બત ચક્રિણમ્ ॥ ૧૭॥

દ્રુપદજાવસનાભિવિવૃદ્ધયે
નનુ દયે! ભગવન્તમચોદયઃ ।
જગતિ નાર્યવહેલનમાર્તિતઃ
સપદિ વેત્ત્યબલૈવ પુમાન્ન હિ ॥ ૧૮॥

કારુણ્યશ્રીસ્ત્વયિ વસતિ યચ્છ્રીનિવાસોઽસિ તસ્માત્
ભક્તાભીષ્ટં વિતરસિ તતશ્શેષશૈલે વસન્સન્ ।
આર્તત્રાણં વિદધદમિત ક્લિષ્ટભક્તાગ્રદૃષ્ટઃ
દત્તં સ્વલ્પં સુબહુ ગણયસ્યદ્ભુતા તેઽનુકમ્પા ॥ ૧૯॥

ભવઘોરમહારણ્યે દુઃખધ્વાન્તગતં હરે!
માં દયાદીપશિખયા કદા નેષ્યસિ સત્પથમ્ ॥ ૨૦॥

ભવકૂપનિમગ્નાનામાભીલજલપાયિનામ્ ।
શ્રીનિવાસાનુકમ્પે! ત્વં રજ્જુરુદ્ધરણે હ્યસિ ॥ ૨૧॥

સઙ્કલ્પિતાનલ્પ જગત્પ્રવૃત્તિઃ
નારાયણશ્શાસ્ત્રમતાનુયાયી ।
દણ્ડોન્મુખો હન્ત! દયે! બભૂવ
ત્વદ્દીક્ષિતઃ ત્વન્મતબદ્ધદીક્ષઃ ॥ ૨૨॥

કુચેલમમિતમ્પચં ચિપિટમુષ્ટિસન્તુષ્ટહૃત્
ચકાર ગરુડધ્વજો ભજનશીલમિભ્યં ભુવિ ।
વિદારિતકુદીનતાવિષલતાનિદાનાં દયે!

વદન્તિ ભવતીં જનાઃ જલજવાસિનીસોદરિ! ॥ ૨૩॥

આશ્રિતાવનગુરુત્વરે! દયે! સ્વામિ માનસરયં વિચિન્ત્ય ચ ।
તત્ર વાસરસિકાસિ કિં સદા શ્રીશચોદનકૃતે પ્રસૂરિવ ॥ ૨૪॥

વિચિત્રા લીલા તે વૃષગિરિપતેરમ્બ! કરુણે!
વસન્તં વૈકુણ્ઠે પરમપુરુષં ભક્તવશગમ્ ।
વિધાય પ્રાણ્યાર્તિપ્રશમનકૃતે ચારયસિ તં
ધરિત્ર્યાં તુચ્છૈર્યત્કમઠકિટિરૂપૈઃ પ્રતિયુગમ્ ॥ ૨૫॥

આશ્રિતાન્ શ્રીનિવાસોઽયં તોષયત્યનુકમ્પયા ।
મહાન્ મહીરુહઃ સ્ફીતચ્છાયયેવ જનાન્ભુવિ ॥ ૨૬॥

પુરુષોત્તમઞ્ચ કરુણે! શ્રિયઃપતિં
શ્રિતભક્તરક્ષણકૃતે પુરાઽકરોઃ ।
વ્રતિનં મૃગાજિનધરં સુવામનં
બલિસદ્મદેહલિચરં ધરાર્થિનમ્ ॥ ૨૭॥

પુરુષોત્તમસ્ય લલનાસ્વરૂપમ-
પ્યદિશસ્સુધાવિતરણે કરુણે! ।
શ્રિતરક્ષણાય કથમપ્યહો! હરિં
બહુવેષતોઽપિ ભુવિ યોજયસિ ॥ ૨૮॥

શેષાચલેશહૃદયાચ્છસરોવરાન્તઃ-
ક્રીડૈકતાનરમણીયદયામરાલી! ।
ક્ષીરામ્બુવત્સુકૃતદુષ્કૃતરાશિમાશુ
શક્ત્યા વિભેદ્ય સુકૃતૈકફલં દદાતિ ॥ ૨૯॥

ઉલ્લાઘતાં સુગુણતાં શતવત્સરાન્ત-
માયુઃ કલા નિગમશાસ્ત્રયથાર્થબુદ્ધિમ્ ।
સૌન્દર્યમુચ્ચકુલજન્મ ચ કાયદાર્ઢ્ય-
મૈશ્વર્યમબ્ધિતનયેશદયા દદાતિ ॥ ૩૦॥

નાહં શરીરિદુરિતાન્યવલોકયામી-
ત્યાચ્છાદ્ય લોચનયુગં ઘનસારધૂલ્યા ।
મન્દસ્મિતેન વરદાનપરઃ શ્રિતાનાં
કિં ત્વં ઘૃણામહિગિરૌ પ્રકટીકરોષિ? ॥ ૩૧॥

કૌમુદીવ કરુણા તવ શૌરે! ચક્ષુષી શિશિરયત્યનિશં નઃ ।
કુલ્લયત્યવગુણાપનયાર્થં કુઞ્ચિકેવ હૃદયારરમાશુ ॥ ૩૨॥

અપરાધ સ્વભાવાનાં માદૃશાનાં દુરાત્મનામ્ ।
ત્વદ્યૈકા ગતિર્નાન્યા વૃષાદ્રિત્રિદશદ્રુમ ॥ ૩૩॥

નવવારિવાહહૃદયક્ષપાકરપ્રસૃતાતિસુન્દરદયાચ્છકૌમુદી ।
ધનિદુર્ગતાદિતનુમદ્વ્રજં સમં પરિતસ્સુશીતલયતિ સ્વયં બત ॥ ૩૪॥

ક્ષણમપિ કરુણે! ત્વં ક્ષીણપુણ્યાવનાશે
મુરરિપુહૃદયાચ્ચેદ્ દૂરતો હન્ત! તિષ્ઠેઃ ।
અમલસલિલપૂરાદુદ્ધૃતા જાલમીનાઃ
ઇવ દુરિતનિવાસાશ્ચેતનાસ્સ્યુર્વિસત્તાઃ ॥ ૩૫॥

લક્ષ્મીસ્સ્વયં નિજકટાક્ષવિશેષતોઽત્ર
નિમ્નોન્નતસ્થિતિજુષો વિતનોતિ જન્તૂન્ ।
ત્વં કારયસ્યયિ દયે! ભુજગાદ્રિનેત્રા
નિમ્નસ્થિતેરુપશમં તદવેક્ષણેન ॥ ૩૬॥

પરવાસુદેવમપિ માનુષં દયે!
પ્રવિધાય સિન્ધુરશનામનીનયઃ ।
અવમન્યતે સ્મ જનતા તમપ્યહો!
ભવતી તથાપિ સમરક્ષદત્ર તામ્ ॥ ૩૭॥

શબરીમમરીં ચકાર શાર્ઙ્ગિન્!
કરુણા તે પરિણામ પક્વ ભોગ્યમ્ ।
પ્રવિતીર્ણમનલ્પભક્તિસારં
ફલમાદાય વનૈકવાસજીર્ણામ્ ॥ ૩૮॥

સર્વેશ્વરોપિ ભગવાન્ ધૃતમર્ત્યરૂપઃ
સઞ્ચોદિતો નનુ દયે! નિતરાં ભવત્યા ।
સખ્યં પ્રકલ્પ્ય કપિના વિપિને ધનુષ્માન્
તસ્મૈ દદૌ પ્રગુણસમ્પદગારરાજ્યમ્ ॥ ૩૯॥

ઉલૂખલનિબન્ધનપ્રકટિતાન્યવશ્યાકૃતિં
દયે! વૃષગિરીશ્વરં કુટયુગાન્તરાકર્ષણે ।
પ્રચોદ્ય બહુવત્સરામરમહામહીરુટ્સ્થિતિ-

પ્રબન્ધનમપાકરોસ્તદહમસ્મિ ધીરોઽઘકૃત્ ॥ ૪૦॥

સમ્પ્રેરિતો નનુ દયે! ભુજગાદ્રિનાથઃ
દિવ્યસ્વરૂપમભિદર્શ્ય ગવાં વ્રજેશઃ ।
અક્રૂરમર્યમસુતાસલિલે નિમગ્નં
આનન્દસિન્ધુવિનિમગ્નમહો વ્યતાનીત્ ॥ ૪૧॥

ભુજઙ્ગમ મહીધરે પ્રકટિતાત્મદિવ્યાકૃતિઃ
સુઘોરસમરે ધનુષ્પ્રવરપાણિરભ્રદ્યુતિઃ ।
દશાનનમસંજ્ઞકં રઘુપતિસ્તદા પ્રાહિણોત્
નિજશ્રમવિનુત્તયે નનુ દયે! ત્વયા ચોદિતઃ ॥ ૪૨॥

પાપાત્મનાં અયિ! દયે! ભુવિ માદૃશાનાં
નોચેજ્જનિઃ કિમપિ નામ તવાસ્તિ કાર્યમ્ ।
જ્યોતિર્મયે દુરિતદૂરતરેઽપવર્ગે
તૂષ્ણીં તદન્યગુણભાવનયાસિ લીના ॥ ૪૩॥

દોષાકરે જગતિ યત્સ્પૃહણીય રૂપઃ
શેષાચલે સકલલોકવિલોકિતસ્ત્વમ્ ।
ભૂષાઞ્ચિતોઽસિ કમલેશ! તદેવ દેવ!
કેષાં ન સૂચયતિ તે કરુણામપારામ્ ॥ ૪૪॥

કરુણે! તરુણાપરાધશિક્ષા-
કૃતયત્નં ભુજગક્ષમાભૃદીશમ્ ।
વિનિવાર્ય ચ દાપયસ્યભીષ્ટં
કિમિદં મન્તુકૃતે વિચિત્રમેતત્ ॥ ૪૫॥

કનકામ્બર! નીરદાભ! શૌરે!
કરુણા તે તરુણાયતે પરાર્થમ્ ।
અપરાધિનિ મય્યપિ પ્રસન્ના
વૃષશૈલેશ! યદીક્ષિતો મયાપિ ॥ ૪૬॥

આહ્વયન્તુ જનાઃ શ્રીશ! શ્રીનિવાસેતિ ભક્તિતઃ ।
દયાવાસેત્યહં તુ ત્વાં બ્રવીમિ કૃતદુષ્કૃતઃ ॥ ૪૭॥

કરુણા વરકામિનીવ નિત્યં
હૃદયં તે પરિવર્તયત્યમોઘમ્ ।

અહિશૈલપતે! તતસ્તવાસીત્
જગતાં રક્ષક ઇત્યહો! પ્રસિદ્ધિઃ ॥ ૪૮॥

દુર્વાસઃપ્રમુખાત્તપોધનગણાદભ્યાગતાદ્દ્રુહ્યતઃ
ત્રાતું પાણ્ડુસુતાન્વને દ્રુપદજાભુક્તાવશિષ્ટાલ્પકમ્ ।
ભુક્ત્વા શાકમમત્રગં યદુપતે! તત્કુક્ષિપૂર્તિં વ્યધાઃ
કિં કિં વા ભવતા ન કારયતિ તે સ્વાન્તસ્થિતેયં દયા ॥ ૪૯॥

યવનાદવનીપતેસ્સુભીતો
જવનાતીતવનો ગુહાત્તનિદ્રમ્ ।
મુચુકુન્દમહો! વિબોધ્ય તસ્મૈ
દયયા દર્શિતવાન્ મુકુન્દ રૂપમ્ ॥ ૫૦॥

વારાઙ્ગનાનર્તનવીક્ષણાર્થં
ત્વન્મન્દિરં પ્રાપ્તવતોઽપિ નાસ્તિકાન્ ।
અઙ્ગીકરોષ્યાત્મવિલોકનાર્થં
સમાગતાન્ શ્રીશ! તવાદ્ભુતા દયા ॥ ૫૧॥

પૃદાકુગિરિમન્દાર! વન્દારુજનચન્દન ।
કુબ્જામબ્જમુખીં ચક્રે દયા તે ચન્દનાર્થિનઃ ॥ ૫૨॥

કિં ભુક્તા ભવતાધ્વમૃત્, નહિ મયા ભુક્તા, સુહૃધ્ભિસ્તથા
પ્રોક્તં તૈરનૃતં, પ્રદર્શય મુખં વ્યાદાય પશ્યામ્યહમ્ ।
પશ્યામ્બેતિ તથા વિધાય વદને લોકાસ્ત્વયા દર્શિતાઃ
ભક્તાનાં વશવર્તિતા તવ હરે! કારુણ્યમૂલા કિલ ॥ ૫૩॥

ત્રિવિક્રમસમુદ્ધૃતપ્રયતપાદપઙ્કેરુહાત્
વિરિઞ્ચિપદપઙ્કજસ્નપિતપૂતપાથસ્સ્રુતેઃ ।
ધરાતલમુપાગતા સુરધુની પુનાના જનાન્
તનોતિ કરુણાપગાધિયમયે! વૃષાદ્રીશ્વર ॥ ૫૪॥

જ્વલનોજ્જ્વલિતાત્મહેયકાયં
કરુણાદૃક્સુધયા વિધાય સિક્તમ્ ।
શરભઙ્ગમભઙ્ગુરવ્રતં તં
કરુણાનીનયદદ્ભુતં પદન્તે ॥ ૫૫॥

અચિન્ત્યગુણવૈભવપ્રકટિતાત્મસૌલભ્યતઃ

ચરાચર નિરન્તરે જગતિ લબ્ધજન્મા ભવાન્ ।
કૃતાતિદુરિતૈર્જનૈર્જડમનીષિભિર્દૂષિતઃ
દયા તવ નિરઙ્કુશા નિરવધિઃ કિમુ બ્રૂમહે ॥ ૫૬॥

અધિગતસકલાર્થોઽપ્યત્ર ગોષ્ઠે ચરન્ સન્
વ્રજજનપરિભીતો લીનદેહો ગૃહાન્તઃ ।
પ્રમુષિતનવનીતો રજ્જુબદ્ધો જનન્યા
નનુ ચિરમરુદસ્ત્વં કૃષ્ણ! હન્તાનુકમ્પા ॥ ૫૭॥

મહારણ્યે શીલવ્યપગમનદૂરીકૃતસુખાં
અહલ્યાં પાષાણસ્થિતિમુપગતાં વલ્લભરુષા ।
દયાસીમાભૂમે! દશરથસુત! સ્વાઙ્ઘ્રિકલનાત્
વિશુદ્ધાં દિવ્યાભાં સપદિ કૃતવાન્ હન્ત! કરુણા ॥ ૫૮॥

જમ્બાલચઙ્ક્રમણલબ્ધપદાભિપીડં
કાન્તારસઞ્ચરણધૂલ્યવગુણ્ઠિતં ત્વામ્ ।
તે ન સ્મરન્તિ નવનીતમુષં વદન્તિ
ધિક્! બાલિશાન્ વ્રજજનાન્ બત! તેઽનુકમ્પા ॥ ૫૯॥

સમો ભવાન્ ભક્તરિપું નિજારિં જાનન્નપિ સ્ફીતદયાવિનુન્નઃ ।
તદ્રક્ષણાયાપિ કૃતપ્રયત્નો દૌત્યં નિહીનં શ્રિતવાન્ મુકુન્દ ॥ ૬૦॥

બલિભુજમપરાધિમુખ્યગણ્યં
ત્રિભુવનદુર્લભરક્ષમભ્યરક્ષઃ ।
ચરણતટનિપાતમાત્રતુષ્ટો
વૃષગિરિનાથ! દયા તવાદ્ભુતા હિ ॥ ૬૧॥

કર્ણારુન્તુદવાક્ ક્ષુરપ્રનિકરૈઃ હૃદ્દારયન્તં હિધિ-
ક્કુર્વન્તં સમિતૌ સભાજનપરં કુન્તીસુતં રોષતઃ ।
ચેદીશં પ્રવિલૂય તત્ર કદલીલાવં શિરોધૌ હસન્
શેષાદ્રીશ! ભવત્પદામ્બુજમદાસ્તસ્મૈ દયા તે બત ॥ ૬૨॥

વૃષગિરિશિખરે શ્રીશ્રીનિવાસાભિધોઽયં
સુરતરુરતિતુઙ્ગઃ પ્રાર્થિતાર્થ પ્રદાયી ।
નિરતિશયદયાખ્યચ્છાયયા સ્વાશ્રિતાનાં
હરતિ સપદિ તાપાંસ્ત્રિપ્રકારાન્ ભવાગ્નેઃ ॥ ૬૩॥

વૃષાદ્રિશૃઙ્ગશીતાંશો!  દયાજ્યોત્સ્ના તવામલા ।
વિકાસયતિ સુસ્નિગ્ધં સ્ફીતં કુવલયં સદા ॥ ૬૪॥

ભુજગગિરિપતે! તવાનુકમ્પા-
વ્રતતિતતિઃ પરિતસ્સુપુષ્પિતાગ્રા ।
જગદખિલમપિ સ્વકીયગન્ધૈઃ
દુરિતમલં પરિનોદયત્યનલ્પૈઃ ॥ ૬૫॥

હૃદયાલવાલદૃઢરૂઢદુષ્કૃત-
દ્રુમદારણાસિલતિકાસિ દારુણા ।
વૃષશૈલનાથકરુણે! નૃણાં મન-
સ્યધિરોપયસ્યનુગુણાન્ ગુણદ્રુમાન્ ॥ ૬૬॥

લક્ષ્મીસ્સ્વયં કૃતજનિર્ભુવનાવનાય
ક્ષીરામ્બુધૌ ભગવતો હૃદયં પ્રવિષ્ટા ।
શેષાદ્રિનાથકરુણે! ભવતી તુ તસ્ય
સ્વાન્તે જનિં ગતવતી પરિવર્તનાય ॥ ૬૭॥

વેલોલ્લઙ્ઘનમાદિતો જડમયો રત્નાકરોઽપિ સ્વયં
શેષાદ્રીશ્વર!  તેઽનુશાસનવશાન્નૈવાચરત્યદ્ભુતમ્ ।
કૃત્યાકૃત્યવિવેકબુદ્ધિવિભવં દત્તં વિહાયોદ્ધતઃ
વેલોલ્લઙ્ઘનમાચરામિ કરુણે! તત્પાહિ મામીદૃશમ્ ॥ ૬૮॥

અવસિતસમરં રથે નિષણ્ણં
શિબિરતટે ત્વવતાર્ય ફલ્ગુનં તમ્ ।
સ્વયમપિ રથતોઽવતીર્ય શૌરે!
જ્વલનભયાદ્દયયાન્વપાલયો હિ ॥ ૬૯॥

દયા કાપિ કાન્તા ભુજઙ્ગાદ્રિનેતુઃ
કયાપિ પ્રવૃત્ત્યા પ્રિયેવ પ્રકામમ્ ।
મનોવાસ્તુવાસા જગજ્જન્મિયાચ્ઞાં
વિના માતૃકલ્પા દદાતીપ્સિતાર્થાન્ ॥ ૭૦॥

સીતાન્વેષણતત્પરો રઘુપતે! પૃચ્છન્ વને પક્ષિણો
વૃક્ષાન્ પર્વત કન્દરાંશ્ચ વિલપન્ હા! જાનકીત્યાહ્વયન્ ।
મધ્યેમાર્ગમવેક્ષ્ય ભૂમિપતિતં ગૃધ્રાધિપં દુઃખિનં
તસ્મૈ સદ્ગતિમન્ત્યકર્મકરણાત્પ્રાદાઃ દયા તેઽનઘા ॥ ૭૧॥

રુક્મિણીં ભવદવાપ્તિકાઙ્ક્ષિણીમન્યમર્ત્યસહવાસદૂષિણીમ્ ।
પ્રાપ્તસન્નિધિરચૂચુરો હરે! પાણિપીડનકૃતે દયાનઘા ॥ ૭૨॥

સુરભિષુ મુષિતાસુ વેધસા દ્રાક્
અધિગતતાદૃશવિગ્રહો મુકુન્દ ।
વ્રજજનમભિહર્ષયન્નભૂસ્ત્વં
તવ કરુણા નનુ વિસ્મયં તનોતિ ॥ ૭૩॥

દાવાગ્નિં વિપિનતટે વ્રજાર્ભકાના-
માબાધામુપજનયન્તમન્તકાભમ્ ।
શૌરે! ત્વં સપદિ નિગીર્ય મોદદોઽભૂઃ
કારુણ્યં કિમિવ નકારયત્યચિન્ત્યમ્ ॥ ૭૪॥

વૃષાચલશિખામણે! તવ ગુણેષુ ભદ્રાત્મકે-
ષ્વચિન્ત્યવિભવાં દયાં ગદિતુમક્ષમા સા ત્રયી ।
હ્રિયા કિલ પરાઙ્મુખી સ્થિતવતી ચિરાદપ્યહો!
કથં તુ કથયેયમપ્યચલદુષ્કૃતસ્તે દયામ્ ॥ ૭૫॥

દયા દૂરીભૂતા તવ તુ હૃદયાચ્ચેદ્ગુણનિધે!
તદૈતાન્ પાપસ્ત્વં શ્રુતિવિહિતકર્મપ્રતિભટઃ ।
મદાજ્ઞાચ્છેદી ત્વં નિરયકુહરે ઘોરતિમિરે
ક્ષિપામીતિ બ્રૂયાસ્તદિહ શરણં યામિ કરુણામ્ ॥ ૭૬॥

ભવસાગરતારણે મુરારે! નનુ નૌરસ્યઘભારવાહકાનામ્ ।
પરિતસ્સુસુખં પ્રવર્તયિત્રી કરુણા ક્ષેપણિકા હિ યાત્રિકાનામ્ ॥ ૭૭॥

માલાકારો ગ્રથિતસુમનોજીવકઃ કંસવશ્યઃ
ભક્ત્યા નમ્રઃ સ્વયમુપગતં શેષશૈલાગ્રદીપ ।
ત્વામભ્યર્ચ્ય સ્રજમતિગુણામર્પયિત્વા સ્વવંશ્યૈઃ
સાકં મોક્ષં સમધિગતવાંસ્તેઽનુકમ્પા વિચિત્રા ॥ ૭૮॥

ભગવન્! દુહિતુર્વિવાહસિદ્ધ્યૈ
હરચાપં નિહિતં વિભજ્ય શૌર્યાત્ ।
કૃતતત્કરપીડનો વ્યતાનીઃ
જનકં હૃષ્ટમહો! તવાનુકમ્પા ॥ ૭૯॥

કરુણા તવ મુગ્ધવલ્લવીનાં સ્મરતાપપ્રશમૈકબદ્ધદીક્ષા ।
શરણાગતવત્સલ! ત્વદીયં પરિરમ્ભં સમદાપયદ્ધિ તાભ્યઃ ॥ ૮૦॥

કરુણા વશવર્તિની વશેવ
સ્વવશે ત્વાં પરિકલ્પ્ય યૂધપાભમ્ ।
વૃષશૈલવિભો! ગજાભમર્ત્યાન્
ભવવન્યાન્ વિવશી કરોતિ મત્તાન્ ॥ ૮૧॥

અવિનાભાવિની કાન્તા દયે! સા કમલાલયા ।
અવનીભાવિની ત્વન્તુ વેઙ્કટેશસ્ય હૃદ્ગતા ॥ ૮૨॥

વિહિતકર્મકૃદપ્યહમલ્પધીઃ
અનવધાનતયા વિધિતસ્સ્ખલન્ ।
દુરિતકૃદ્ વૃષશૈલશિખામણે!
શરણમેમિ ભવત્કરુણાં સદા ॥ ૮૩॥

તૈલધારાવદચ્છિન્નસ્મૃતિસન્તાનતો હરે ।
ધ્યાતું ત્વામસમર્થસ્ત્વત્કરુણા શરણં મમ ॥ ૮૪॥

વૃષશૈલવલ્લભદયાખ્યદીપિકા
હૃદયાન્તરસ્થતિમિરં નુદત્યદઃ ।
કમલેશપાદસરસીરુહે સ્થિતાં
વિતનોતિ ભક્તિરુચિરદ્યુતિં નૃણામ્ ॥ ૮૫॥

નવકજ્જલાભયમુનાપયોધુની-
મવગાહ્ય ગોપવનિતાભિરચ્યુત ।
ઝષતાં પ્રદર્શ્ય તદવાપ્તિખેલને
સમનન્દયો હિ કરુણા તવાનઘા ॥ ૮૬॥

ન હિ મયિ મહાવિશ્વાસોઽપિ પ્રપત્તિકરણે હરે!
ન ચ દુરવગાહે શાસ્ત્રે બુદ્ધિરસ્ત્યમિતપક્ષકે ।
ન ચ કિમપિ કર્મ જ્ઞાનં ભક્તિરસ્ત્યહિગિરેઃ પ્રભો!
તવ તુ કરુણાં યાચે નીચોઽપ્યનારતરતિપ્રિયઃ ॥ ૮૭॥

રાસક્રીડાકલિતલલનામણ્ડલે વાસુદેવ!
સ્વીયં કાયં સુબહુ કલયન્ કામિનીકામિતાર્થાન્ ।
દત્વાક્રીડો મુરલિવદનઃ પીતચેલોપવીતઃ

કારુણ્યૈકપ્રણયિ ખલુ તે માનસં માનનીયમ્ ॥ ૮૮॥

કમલાકટાક્ષકરણેઽપિ કારણં
કરુણે ત્વમેવ ફણિશૈલચક્રિણઃ ।
અત એવ સા તુ તવ સન્નિધૌ વસ-
ત્યમલાયતાસિતમૃગેક્ષણા સદા ॥ ૮૯॥

સુમસાયકોઽપિ ગતવિગ્રહોઽપ્યયં
ઝષકેતનસ્તુ વિષયાન્ પ્રદર્શ્ય મામ્ ।
વનિતૈકસક્ત હૃદયં મદોદ્ધતં
વિતનોતિ નાથ! શરણં દયાસ્તુ તે ॥ ૯૦॥

અમર્ષો નિત્યં માં કથમપિ વશે હન્ત! કલયન્
પિશાચાભો રક્તપ્રચુરનયનં ક્રૂરવચનમ્ ।
પ્રતીક્ષ્યાણામપ્યત્યતિભવનસક્તૈકમનસં
તનોતિ શ્રીશ! ત્વદ્રુચિરકરુણા મેઽસ્તુ શરણમ્ ॥ ૯૧॥

લોભો લાભમુખો વ્યયે નતમુખઃ સ્વાન્તૈકવાસોઽસ્તિ મે
સ્વાત્માર્થેઽપિ પરાઙ્મુખો વિતરણે મૂકાનુભાવોન્મુખઃ ।
શેષગ્રાવશિખામણે! તવ પદન્યાસપ્રસૂનાય વા
દત્તા કાકણિકાપિ હન્ત! ન મયા તત્તે દયા મે ગતિઃ ॥ ૯૨॥

મોહોઽહઙ્કૃતિકલ્પકલ્પનપટુસ્તલ્પાયમાનો મહા-
મૌર્ખ્યસ્ય પ્રથમપ્રવૃત્તિકરણવ્યગ્રો દુરધ્વોદ્ધતઃ ।
દેહાત્મભ્રમવિભ્રમભ્રમણકૃન્મન્મિત્રભાવં ગતઃ
ત્વત્પૂજાવિમુખોઽસ્મિ વેઙ્કટપતે! તત્તે દયા મે ગતિઃ ॥ ૯૩॥

મદેન શિથિલેન્દ્રિયો ગુરુવરાન્નમસ્યોચિતાન્
તિરસ્કરણવીક્ષણૈર્વ્યથિતમાનસાનાચરન્ ।
વૃષાચલપતે! વયઃકુલકલાદિભિર્ગર્વિતઃ
ત્વદઙ્ઘ્રિનતિમપ્યહં ન કૃતવાન્ દયા મે ગતિઃ ॥ ૯૪॥

પરધનપરિવીક્ષણૈકતાનઃ
પરશુભદર્શનદર્શિતાત્મવૈરઃ ।
સ્મરણમપિ ન તે તનોમિ તસ્માત્
વૃષશિખરીશ! દયા ગતિસ્ત્વદીયા ॥ ૯૫॥

કામાદ્યવકરપૂર્ણે હૃદાલવાલે દયાખ્યલતિકાં તામ્ ।
પરિષિચ્ય વેઙ્કટેશ! ત્વદ્ગુણસલિલં પ્રરોપયામ્યધુના ॥ ૯૬॥

કંસં નિહત્ય પરહિંસન માનસં તં
સંસારચક્ર ઇવ બન્ધનમન્દિરે તૌ ।
બદ્ધૌ વિમોચ્ય પિતરૌ ચિરદુઃખિતૌ ત્વં
પ્રાહર્ષયો હિ નૃહરે! કરુણા તવેડ્યા ॥ ૯૭॥

શકટં નિકટે કુટી તટીસ્થં પ્રકટાટોપપદાભિઘટ્ટનેન ।
ત્રુટિતં પ્રકટય્ય પાટવેન વ્રજરક્ષામતનોઃ કૃપા તવેડ્યા ॥ ૯૮॥

નિશિતબાણહતિવ્રણિતાઙ્ગકઃ
ક્રુદભિદર્શિતચક્રકરો હરે ।
નુતિવિવર્જિતભીષ્મહતિર્હ્યભૂઃ
વચનદૂરતરા કરુણા તવ ॥ ૯૯॥

બાલોઽપિ બાહુશિખરેણ વૃષાદ્રિનાથ!
ગોવર્ધનાભિધમુદૂહ્ય શિલોચ્ચયં ગાઃ ।
ઘોરાતિવૃષ્ટિહતિભિર્વિનિવાર્ય ધૈર્યા-
દામોદયો હિ કરુણા તવ માનનીયા ॥ ૧૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
પ્રથમશતકં સમ્પૂર્ણમ્ ।

## ૨. દ્વિતીયશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમતે નિગમાન્ત દેશિકાય નમઃ ।
અથ દયાસહસ્રે દ્વિતીયશતકમ્ ।

દિવાકરાત્મજાહ્રદે નિલીનમદ્ભુતાકૃતિં
પૃદાકુમુચ્ચમસ્તકે વિચિત્રતાણ્ડવૈર્નટન્ ।
નિવાર્ય દર્પમમ્બુધિં ભવાન્નિનાય હિંસકં
દયા તવાનઘા હરે! ભુજઙ્ગમાદ્રિ શેખર ॥ ૧૦૧॥

દશાનનહતિઃ કૃતા ન હિ તથાપિ બદ્ધાઞ્જલિં
વિભીષણમરિન્દમં રિપુસકાશતોઽભ્યાગતમ્ ।
પયોધિતટ એવ તં સમભિષિચ્ય રાજ્યેઽકરોઃ
રઘૂત્તમ! દયાનઘા તવ વૃષાચલસ્વામિનઃ ॥ ૧૦૨॥

સુકેતુ તનયાં વને નિજગુરૂપદેશોન્મુખઃ
નિહત્ય મુનિઘાતિનીં સપદિ શૈશવે રાક્ષસાન્ ।
નિપાત્ય ગુરુકૌશિકક્રતુમપિ પ્રપૂર્યાદરાત્
પ્રહૃષ્ટહૃદયો હ્યભૂઃ તવકૃપા વિચિત્રા હરે! ॥ ૧૦૩॥

સઙ્કલ્પમાત્રપરિકલ્પિતસર્વલોકઃ
કર્માનુરૂપકૃતજન્મિશરીરયોગઃ ।
તત્રાપિ તત્સુકૃતદુષ્કૃતયોગ્યભોગ-
દાતાસિ દેવ! કરુણા સ્પૃહણીયરૂપા ॥ ૧૦૪॥

આત્માભિરક્ષણકૃતે પ્રતિજન્તુવર્ગં
તત્તત્સ્વરૂપગુણચેષ્ટિતશક્તિયોગાન્ ।
પ્રાપય્ય રક્ષસિ યથેચ્છમનન્તભૂષ!
શેષાદ્રિશેખર! દયા તવ માનનીયા ॥ ૧૦૫॥

સર્વજન્તુહૃદયાન્તરસ્થિતઃ જીવિકાકલનકર્મચોદકઃ ।
રક્ષસિ પ્રતિશરીરિવર્ગમપ્યમ્બુજાક્ષ! કરુણા મનોહરા ॥ ૧૦૬॥

લીલાર્થં પતગેષુ ચિત્રગરુતાં નિર્માણમત્યદ્ભુતં
વૈવિધ્યં ધ્વનિસન્તતૌ કથમિવ પ્રીતિં ન કુર્યાન્નૃણામ્ ।
એવં વૃક્ષલતાદિકુઞ્જનિવહે વૈચિત્ર્યમુચ્ચાવચં
સર્વં શ્રી વૃષશૈલનાથ! કરુણાકાર્યં કિલૈતત્તવ ॥ ૧૦૭॥

અવાપ્તસર્વકામસ્ય સૃષ્ટ્યા કિં તે પ્રયોજનમ્ ।
ચેતનોજ્જીવનાયૈવ હન્ત! તે કરુણા હરે ॥ ૧૦૮॥

નિમિત્તમાત્રં પરિકલ્પ્ય શક્રં
સ્વયઞ્ચ મથ્નન્ દધિમાથમબ્ધિમ્ ।
જીવાતુમુત્પાદિતવાંસ્ત્રિલોકી-
ત્રાણાય તે હન્ત! દયા રમેશ ॥ ૧૦૯॥

જગત્સૃષ્ટિશક્તિં પ્રસાદ્યોપદિષ્ટ-

શ્રુતિર્વેધસે નાભિપદ્મોદ્ભવાય ।
જગત્પાલને બદ્ધદીક્ષોઽસિ કષ્ટે
દયાકાર્યમેતત્કિલાબ્જાયતાક્ષ ॥ ૧૧૦॥

રુદ્રં રોદનલબ્ધનામવિભવં ફાલાક્ષમક્ષાઞ્ચિતં
ત્રૈલોક્યક્ષપણક્ષમં સભસિતં સઙ્કલ્પ્ય કલ્પે હરે! ।
રક્ષાર્થં ભુવનત્રયં શિશુતનુર્નિક્ષિપ્ય કુક્ષ્યન્તરે
પાથોધૌ શયિતોહ્યભૂર્વટદલે માન્યાનુકમ્પા તવ ॥ ૧૧૧॥

અપવાદવિનુત્તયે સ્યમન્તં વરરત્નં હૃતવાનિતિ પ્રમુગ્ધઃ ।
જિતજામ્બવદાત્ત દિવ્ય રત્નો વિગતાધિસ્ત્વમભૂર્દયા વિચિત્રા ॥ ૧૧૨॥

નનુ પૂતનાન્તુ વિષપૂરિતસ્તનીં
હનનાય રમ્યતનુમાગતાં વ્રજે ।
શિશુભાવ એવ હતવાન્ પયઃ પિબન્
કરુણા વિપત્તિ પરિહારિણી કિલ ॥ ૧૧૩॥

અણોર્જીવસ્યાન્તઃ કૃતવસતિરાનન્દમયતા-
સુવાસો મેરોરપ્યતિપૃથુતનુર્વિશ્વતનુભૃત્ ।
સમસ્તસ્યાપ્યન્તર્બહિરપિ સદા વ્યાપ્ય રુચિમાન્
જગદ્રક્ષાં તન્વન્વિલસસિ હરે! હન્ત! કરુણા ॥ ૧૧૪॥

ત્રિસ્સપ્તકૃત્વો ભ્રમણૈકશીલઃ
કુઠારકૃત્તાવનિરાજલોકઃ ।
સદ્રક્ષકોઽભૂર્વૃષશૈલનાથ!
દયૈકકાર્યં કિલ સર્વમેતત્ ॥ ૧૧૫॥

સંસારચક્રે બહુહેયદેહાન્
જન્તૂન્ પ્રમોહવ્યથિતાન્ મુરારે ।
અર્ચાવતારપ્રકટસ્વરૂપઃ
સન્તોષયસ્યાર્તિહરા દયા તે ॥ ૧૧૬॥

શ્રી વેઙ્કટેશ! કરુણા તવ લોકબન્ધુઃ
દીનેષુ સક્તહૃદયા ભગવત્પદાબ્જે ।
તેષાં મનાંસિ વિનિવેશ્ય નિરન્તરં તાન્
ઉદ્ધર્તુમિચ્છતિ ભુવીહ કૃતાર્થયન્તી ॥ ૧૧૭॥

વિદુરાલયમેત્ય તત્ર ભુક્ત્વા ભયભક્ત્યર્પિતપાયસાદિ ભોજ્યમ્ ।
અનુજગ્રહિથાહિશૈલવાસિન્! કરુણા તે શ્રવણાભિરામલીલા ॥ ૧૧૮॥

સ્ખલદ્વ્રતેસ્સદા નાથ! કિમસ્ત્યસ્ખલનં મમ ।
અતસ્તે કરુણાપાણિરવલમ્બનદશ્શુભઃ ॥ ૧૧૯॥

પ્રપત્તિકરણે મતિં ધૃડતરાં વિતન્વન્ હરે!
મદીયકરણત્રયં નિરતમઙ્ઘ્રિસેવાવિધૌ ।
ચિરન્તનસમાર્જિતપ્રચુરકર્મજાં વાસનાં
નિરાકુરુ પરાઙ્મુખે કરુણયા વિનુન્નો મયિ ॥ ૧૨૦॥

અકિઞ્ચનં માં દુરિતૈકભાજનં
સદાપરાધોન્મુખમમ્બુજેક્ષણ! ।
કદા કટાક્ષૈઃ કરુણારસામલૈઃ
કરિષ્યસિ સ્નાપિતમીપ્સિતાર્થદ ॥ ૧૨૧॥

જીવાત્મા રુચિરુચિરોડપિ પાપસઙ્ઘૈઃ
આચ્છન્નો બહુતરદુઃખભાજનં સ્યાત્ ।
કારુણ્યં પતતિ તવૈહ નાથ! યસ્મિન્
આનન્દી ભવતિ સ એવ ધન્યધન્યઃ ॥ ૧૨૨॥

શ્રી શ્રીનિવાસ! તવ વક્ષસિ ભાસમાનાં
લક્ષ્મીં વિલોક્ય મયિ સાન્ત્વનમાવિરાસીત્ ।
સ્મૃત્વા મનોનિવસનાં કરુણાં ત્વદીયાં
નિર્ભીક એવ પશુવદ્વિચરામિ ભૂમૌ ॥ ૧૨૩॥

પરિણામસૌખ્યવરણાય તે જનૈઃ
કરુણાકરત્વમરુણોદયોપમમ્ ।
શરણાગતાર્તિહરણાનુકૂલ્યભાક્
નિરણાયિ કારણમિતિ શ્રિયઃપતે! ॥ ૧૨૪॥

ચિન્તામણિસ્સુરતરુર્દિવિ કામધેનુઃ
ઐરાવતસ્સુરુચિરાપ્સરસોડશ્વરત્નમ્ ।
એતત્સમસ્તમહિશૈલપતે! ત્વદીય-
કારુણ્યવિભ્રમભવં કિલ શક્રહેતોઃ ॥ ૧૨૫॥

વાગ્દેવતાપરિણયોડમ્બુજપત્રનેત્ર

સ્રષ્ટુસ્ત્વદીયદયયા કિલ સમ્બભૂવ ।
ફાલેક્ષણેऽપિ ભવદીયદયાવિશેષાત્
અત્યદ્ભુતાષ્ટવિધભૂતિ સમૃદ્ધિરાસીત્ ॥ ૧૨૬॥

રવિમણ્ડલરૂપેણ કારુણ્યં તવ રાજતે ।
દદ્યાદતસ્તદેવાત્ર રુગ્ણાયોલ્લાઘતાં હરે! ॥ ૧૨૭॥

કૃત્વા યથેચ્છમમિતં દુરિતં મનુષ્યઃ
કર્માનુરૂપ ફલમુદ્ધતમશ્નુવાનઃ ।
મૌઢ્યાદ્વિનિન્દતિ ભવન્તમનન્તરૂપં
તસ્મિન્નિપાતય કૃપામહિશૈલનાથ! ॥ ૧૨૮॥

પાર્થસ્ય રક્ષણકૃતે ભગવંસ્તદીય -
રથ્યાનુચોદનગૃહીતકશો રથાગ્રે ।
સારથ્યપાટવવિચાલિત વાજિવર્યઃ
પ્રાવર્તયો હિ સમરં કરુણા વિચિત્રા ॥ ૧૨૯॥

યુદ્ધે ગુરુપ્રભૃતિબન્ધુગણાન્નિહન્તું
પાર્થે પ્રકાશિતદયે સુજનાવનાય ।
સન્દર્શ્ય વિશ્વતનુતામુપદિશ્ય ગીતાં
પ્રાવર્તયોહિ સમરં કરુણા વિચિત્રા ॥ ૧૩૦॥

રાક્ષસાશિતવિસૃષ્ટતાપસ ક્ષીણકીકસગણાંસ્તપોધનૈઃ ।
દર્શિતાનભિસમીક્ષ્ય દુઃખિતસ્સમ્બભૂવ કરણામયો ભવાન્ ॥ ૧૩૧॥

અલ્પવંશજગુહાય પૃચ્છતે ચક્રવર્તિતનયોऽપિ રાઘવ!
આત્મનશ્ચરિતમભ્યુદીરયન્ સખ્યમાપિથ દયા તવાનઘા ॥ ૧૩૨॥

અધિદેવતા હિ મનસસ્સ ચન્દ્રમાઃ
કરુણા ત્વદીયહૃદયૈકવાસિની ।
અત એવ શીતકિરણોદયે જનાઃ
પ્રમદાન્વિતા નનુ ભવન્તિ માધવ ॥ ૧૩૩॥

કર્માનુરૂપસુખદુઃખફલાનુભૂત્યૈ
નાનાપ્રકારવપુષામિહ ચેતનાનામ્ ।
નિશ્રેણિરસ્યયિ! દયે! સુકૃતૈકગમ્ય-
લોકાધિરોહણકૃતે વૃષશૈલનેતુઃ ॥ ૧૩૪॥

ઉદઙ્કુમુદકાર્થિનં વિરચિતાનુયોગક્ષણ-
પ્રધાવિતમુકુન્દમપ્યયિ! દયે! વૃષાદ્રિપ્રભોઃ ।
તિરસ્કૃતદિવસ્પતિપ્રમદદત્તપીયૂષકં
વરેણ સમતોષયસ્તવ વિચિત્રરૂપા ક્રિયા ॥ ૧૩૫॥

અવ્યાજબન્ધુરહમિત્યનુશંસનાય
સ્વીયં પરત્વમનપાય્યપિ સન્નિગૂહ્ય ।
ઇન્દ્રાનુજોઽસિ રઘુવંશસુતોઽસિ ચન્દ્ર-
વંશ્યોઽસિ હન્ત! કરુણા તવ વેઙ્કટેશ! ॥ ૧૩૬॥

વનવાસરિક્તસિતવાહનાત્મજ-
પ્રથિતાભિમન્યુ કરપીડનોત્સવે ।
પ્રવિતીર્ણવસ્ત્રધનધાન્યવાહનો
મુદિતોઽસિ હન્ત! કરુણા તવાનઘા ॥ ૧૩૭॥

ષડૂર્મિસન્તાડિતદેહબન્ધં વ્યાધ્યાદિયાદઃકુલકૃષ્યમાણમ્ ।
સંસારસિન્ધૌ પ્લવમાનમેનમુત્તારયાબ્જાક્ષદયે! દ્રુતં મામ્ ॥ ૧૩૮॥

કર્માનુરૂપસુખદુઃખપરમ્પરાસ્તિ
યદ્યપ્યનલ્પતનુવિપ્લુતમાનસેઽસ્મિન્ ।
સ્યાન્નામ વેઙ્કટવિભો! દયયા તથાપિ
નિર્લિપ્તતાસ્તુ મયિ પુષ્કરપત્રવદ્ધા ॥ ૧૩૯॥

દુષ્ટૈરપ્યનુદિનચિન્તનીયમેતત્
વાત્સલ્યં નનુ કરુણે! મુરારિચિત્તે ।
રક્ષાર્થં સમજનયો હિ દીનબન્ધુઃ
દોષાઢ્યત્રિભુવનવીક્ષણાતિખિન્ના ॥ ૧૪૦॥

પિતૃપિતામહતત્પિતૃવર્ગમપ્યુ-
પરતં ભગવન્નિહ કર્મણા ।
સકલભોક્તૃતયા સ ભવાન્ દિવં
નયતિ શેષગિરીશ! દયાનઘા ॥ ૧૪૧॥

સુકૃતદુષ્કૃતશૃઙ્ખલિકાદ્વય-
પ્રકૃતિમણ્ડલમન્દિરબન્ધનમ્ ।
મમ વૃષાદ્રિવિભો! તવ સા દયા
વિઘટયત્વચિરાદ્ ધૃઢકુઞ્ચિકા ॥ ૧૪૨॥

દુર્ભરવિરાવિવેગાં વિષ્ણુપદીં તાં કપર્દકુહરાન્તઃ ।
વોઢું શિવાય શક્તિં તવાનુકમ્પા દદૌ હિ કમલેશ ॥ ૧૪૩॥

તત્તત્ક્રિયાનિયમિતાદ્ભુતભૂતવર્ગઃ
સઙ્કલ્પમાત્રપરિકલ્પિતવૈભવોઽયમ્ ।
ભીત્યા તનોતિ નિજકર્મશરીરરક્ષા-
સક્તો દયાત્ર તવ કારણમમ્બુજાક્ષ ॥ ૧૪૪॥

અવાચં સંવાચાલયસિ કરુણે! વલ્લભતમં
શ્રિતાનાં દુઃખૌઘપ્રશમનકૃતે સાદરહૃદમ્ ।
ખગેશેનાટન્તં ચરણકમલાભ્યાં ક્ષિતિતલે
મુકુન્દં ભક્તાર્થં વિવિધમુખતઃ ચાલયસિ તમ્ ॥ ૧૪૫॥

સૌલભ્યં નનુ કરુણે! સુશીલતા ચ
શ્રીનેતુર્દ્વયમિદમુત્તમોત્તમસ્ય ।
આયાતં તવ પરિચોદનેન તસ્માત્
અસ્માદૃગ્વ્રજજનગોચરોઽત્ર સોઽભૂત્ ॥ ૧૪૬॥

ભવગ્રીષ્મે ઘોરે હરિગુણજલાભાવતૃષિતાઃ
સમન્તાત્સન્તાપૈસ્ત્રિવિધવિસૃતૈઃ પ્લુષ્ટતનવઃ ।
દયામેઘાળિન્તે વૃષગિરિપતે! વિષ્ણુપદગાઃ
નરાખ્યા યાચન્તે હ્યમૃતમમલં ચાતકગણાઃ ॥ ૧૪૭॥

વિટપિષુ વિવિધેષુ કેચિદાત્ત-
પ્રસવગુણાઃ કતિચિત્ ફલાભિરામાઃ ।
વૃષશિખરિવિભો! સપત્રમાત્રાઃ
કતિચિદિદં કરુણાવિભેદતસ્તે ॥ ૧૪૮॥

ક્રિમિકીટજનિષ્વપિ પ્રતીક-
સ્ફુટવર્ણસ્પૃહણીયતોદ્ધતા યા ।
નનુ સાપિ વૃષાદ્રિશેખર! ત્વ-
ત્કરુણાતૂલિકયા ત્વયા કૃતા હિ ॥ ૧૪૯॥

લાસ્યેન દર્શિતવિલાસવધૂસ્વરૂપઃ
સ્વીયં કરં સ્વશિરસિ પ્રણિધાપયન્ સન્ ।
ભસ્માસુરં વરપરીક્ષણધાવિતેશં

ભસ્મીચકાર સ ભવાન્ કરુણા વિચિત્રા ॥ ૧૫૦॥

સમભિમુખયસીમાન્ કામચારાન્ મનુષ્યાન્
બહુવિધવિષયૈસ્તૈઃ કૃષ્યમાણેન્દ્રિયૌઘાન્ ।
વૃષગિરિશિખરાગ્રે કલ્પવૃક્ષસ્ય વિષ્ણોઃ
ઇહ ભુવિ કરુણે ત્વં પાદસેવાવિધૌ હિ ॥ ૧૫૧॥

યથેચ્છસઞ્ચારપરાન્નરાન્નો દયાગુણેનૈવ નિબધ્ય વશ્યાન્ ।
સૂતો યથા પ્રગ્રહપાણિરશ્વાન્ સત્પદ્ધતૌ ચારય વેઙ્કટેશ ॥ ૧૫૨॥

તાપત્રયાખ્યબડિશેન વને ભવાખ્યે
કાલાખ્યધીવરવરેણ નિપાતિતં મામ્ ।
શેષાદ્રિશેખર! વિભો! કરુણાપયોધા-
વુજ્જીવયાશુ વિનિપાત્ય ઝષં લુઠન્તમ્ ॥ ૧૫૩॥

સાન્દીપનિસુતં નષ્ટં પ્રત્યર્પ્ય ગુરુદક્ષિણામ્ ।
અપૂરયો હિ કરુણા હન્ત! તે વેઙ્કટાલય ॥ ૧૫૪॥

દધિભાણ્ડભાણ્ડજઠરે નિલીય ત-
દ્વશવર્તિતાં પ્રકટયન્ પદાર્થિને ।
પ્રવિતીર્ણવાન્ ખલુ પરમ્પદં જુષે
વૃષશૈલનાથ! કરુણાત્ર કારણમ્ ॥ ૧૫૫॥

શયાનઃ ક્ષીરાબ્ધાવુરગપતિપર્યઙ્કફલકે
યશોદાઙ્કે સુપ્વા સ્તનકલશદુગ્ધૈકરસિકઃ ।
પુનાનઃ પૃથ્વીં ત્વચ્ચરણકમલોદ્ભૂતરજસા
વૃષાદ્રીશાભૂસ્ત્વં તવ હિ કરુણા કારણમિહ ॥ ૧૫૬॥

કૈકેયી મકુટમયાચતાત્મજાય
શ્રીરામસ્તદતુલપાદુકાકિરીટમ્ ।
તચ્છીર્ષે વિનિહિતવાંસ્તદર્થિતસ્ત્વં
વાઞ્છાતોઽપ્યધિકવિધાયિની દયા તે ॥ ૧૫૭॥

દ્રોગ્ધું ત્વન્નિકટમુપાગતાહિતેભ્યો
દોગ્ધિ દ્રાક્તવ કરુણા ફલં મુનીડ્યમ્ ।
કાલીયોદ્ભટશકટાદિષુ ત્વદઙ્ઘ્રિ-
સ્પર્શં સા સુસુખમદાપયન્ મુકુન્દ ॥ ૧૫૮॥

પારિજાતમમરૈકસુભોગ્યં પ્રાપયો હિ દયિતોપવનાન્તઃ ।
વેઙ્કટેશકરુણે! વિતનોષિ સ્વર્ગકલ્પમવનીતલમલ્પમ્ ॥ ૧૫૯॥

મીનાત્મા પ્રલયપયોનિધૌ ચરન્ સન્
શ ृઙ્ગાગ્રપ્રઘટિતનૌવિકર્ષણાઢ્યઃ ।
આમ્નાયાન્ વૃષગિરિનાથ! તાનરક્ષઃ
કારુણ્યં કિમિવ ન કારયત્યચિન્ત્યમ્ ॥ ૧૬૦॥

પૂર્વં વામનરૂપભૃદ્બલિકરાત્પાદત્રયૈકાવનિં
પ્રાર્થ્ય પ્રાંશુતનુર્બભૂવિથ શુનાસીરાર્થમબ્જેક્ષણ! ।
કુબ્જાં ચન્દનમાત્મકાયસુભગં સમ્પ્રાર્થ્ય તાં સુન્દરીં
આત્માર્થં રુચિરોચ્ચમૂર્તિમતનોશ્ચિત્રાનુકમ્પા તવ ॥ ૧૬૧॥

કલૌ કારુણ્યાબ્ધે! તવ પદયુગધ્યાનવિમુખો
નિતાન્તક્લાન્તાત્મા યદિ શરણમીયાત્કૃતમતિઃ ।
તદા તસ્મિન્ ક્ષિપ્રં પ્રકટય કૃપાં કામપિ હરે!
તથા નો ચેલ્લોકો ભવતિ વિતતો નાસ્તિકગણૈઃ ॥ ૧૬૨॥

ત્વરિતગમનમાયુર્ભોગતૃષ્ણાકુલં હૃત્
જઠરપિઠરપૂર્ત્યૈ દુષ્કૃતૈકપ્રવૃત્તિઃ ।
બહુવિધગદપીડાક્લિષ્ટમેતચ્છરીરં
ભુજગશિખરિનાથ! ત્વત્કૃપૈકા ગતિર્મે ॥ ૧૬૩॥

તમોયવનિકાદૃઢસ્થગિતચિત્તસક્તોઽપ્યહં
નિતાન્તમતિકુભ્રમોઽપ્યમિતષડ્રિપૂપાસકઃ ।
કૃતાન્તભયવિહ્વલસ્તવ દયાન્તુ દીનસ્સ્મરન્
નિરસ્તગુરુસાધ્વસો વૃષગિરિપ્રભો! નિર્ભરઃ ॥ ૧૬૪॥

ભવબદ્ધશરીરિદર્શનાત્ત્વાં કરુણા દ્રાવયતીહ વેઙ્કટેશ ।
તદહં વિનિવેદયામિ તૂર્ણં પ્રણતાન્ રક્ષ વિતીર્ય તત્પુમર્થાન્ ॥ ૧૬૫॥

શ્રીશેષાચલનિત્યવાસરસિક! શ્રીશોઽપિ સાક્ષી ભવાન્
લોકાલોકમહીધ્રતુલ્યવિભવં લોકં વિતન્વન્ હરે ।
કારુણ્યપ્રણિપાતને પ્રકટયત્યુચ્ચાવચ પ્રાભવં
તેજોરૂપમિહૈકભાગમપરં ગાઢાન્ધકારાવૃતમ્ ॥ ૧૬૬॥

ક્ષણાર્ધકૃતદુષ્કૃતપ્રશમનાય નાનાતનુ-

ષ્વવાપ્ય ચિરદુસ્તરં વિવિધદુઃખમાત્મા ભુવિ ।
ત્વદીય કરુણાવશાદધિગતદ્વિજત્વોત્તમઃ
કદાપિ સુકૃતી કૃતી તવ કૃપાં હરે! યાચતે ॥ ૧૬૭॥

હેયેષુ નશ્વરતયા વિષયેષુ નૃણાં
યા પ્રીતિરસ્તિ વૃષશૈલવિભો! સદા સા ।
આવિર્ભવેત્કરુણયા તવ દીનબન્ધો!
ક્વાપિ ત્વદીયપદપઙ્કજયોઃ કદાપિ ॥ ૧૬૮॥

કન્યાયાં વરકરુણાકટાક્ષવીક્ષા
યસ્યાં શ્રીવૃષગિરિનાથ! સમ્પતેત્સા ।
આપ્નોતિ પ્રિયકરપીડનોત્સવં તત્
કન્યાસુ પ્રહિણુ કૃપાકટાક્ષમાશુ ॥ ૧૬૯॥

પાપ્માનો મૃગયત માં વિહાય દૂરાત્
અન્યત્ક્વાપ્યુદવસિતં સ્વવાસયોગ્યમ્ ।
અદ્યાયં નિરવધિદુર્ગુણોઽપ્યહં શ્રી-
શેષાદ્રિપ્રભુકરુણાકટાક્ષપાત્રમ્ ॥ ૧૭૦॥

મહામોહ! દૂરે ભવાદ્યાનુકમ્પા
ભુજઙ્ગાદ્રિનેત્રા મયિ પ્રેષિતા સા ।
વિવસ્વત્પ્રસર્પન્મયૂખેષુ સત્સુ
સ્થિતિસ્સ્યાત્કથં વા તમિસ્રસ્ય લોકે ॥ ૧૭૧॥

દુરિતઘસ્મરતાપ્રયતીકૃતાઃ
નનુ જના વૃષશૈલવિભોર્દયે ।
શિશિરયાશ્વધિનં તદમું જનં
શશિનિભા ભવભીતિવિઘૂર્ણિતમ્ ॥ ૧૭૨॥

ગુઞ્જામઞ્જુલમસ્તકપ્રવિલસત્પિઞ્છાઞ્ચિતાવર્તકં
ભ્રૂભઙ્ગસ્ફુટિતાયતાલિકકનત્કસ્તૂરિકાચિત્રકમ્ ।
નાનારાગતરઙ્ગરઞ્જિતચલદ્વેણુપ્રસક્તાધરં
કૃષ્ણં ત્વાં પરિદર્શયિષ્યતિ કદા શ્રીશ! ત્વદીયા દયા ॥ ૧૭૩॥

યથા ત્વાં ગ્રાહાર્તશ્શરણમભજદ્વારણપતિઃ
યથા વા પાઞ્ચાલી શિથિલનિજયત્ના દૃઢમતિઃ ।
તથાહં નૈવાસ્મિ પ્રબલદુરિતં પાહિ કરુણા-

કટાક્ષેણૈવ શ્રીવૃષગિરિપતે! મામપિ હરે ॥ ૧૭૪॥

તિર્યગ્ભિર્યદુપાર્જિતં સુકૃતજં ત્વત્સાહ્યકર્મ પ્રિયં
તસ્યાલ્પાંશલવોઽપિ હન્ત! ન મયા સમ્પાદિતઃ પાપિના ।
ગ્રાવપ્રાપણસેતુબન્ધનમૃધૈઃ સેવાં પુરા વાનરાઃ
ચક્રુર્નાહમણું નરોઽપિ કરુણા તત્તે ગતિર્મે હરે ॥ ૧૭૫॥

મર્ત્યેષ્વપિ શ્રયણયોગ્યયતીન્દ્રવર્ય-
રામાનુજાર્યચરણામ્બુજસંશ્રયં મે ।
દત્વા પવિત્રમતનોર્નનુ વૈષ્ણવં માં
શ્રીશ્રીનિવાસ! કરુણા તવ માનનીયા ॥ ૧૭૬॥

અમ્ભોરુહાક્ષ! કરુણાં તવ પાપિનોઽપિ
સંસ્મૃત્ય ધૈર્યવશતશ્શરણં વ્રજન્તિ ।
કાકાસુરસ્ય હિ નિદર્શનમત્ર વૃત્તં
તત્પાહિ પાપિનિકરં દયયા રમેશ ॥ ૧૭૭॥

અનુપદમપરાધં શ્રીનિવાસ! ત્વદીયે-
ષ્વનુદિનમપિ તન્વન્માનમત્તોઽસ્મ્યમર્ષી ।
મયિ કૃતદુરિતૌઘે નાનુતાપોઽપ્યુદેતિ
પ્રકટય કરુણાં તન્માદૃશોજ્જીવનાય ॥ ૧૭૮॥

શ્રુત્યન્તસંસ્તુતભવત્કરુણા મદીયાન્
દોષાન્ કદાપ્યવિગણય્ય બિભર્ત્યમું મામ્ ।
નો ચેત્તથા વિવિધદુર્ગુણવાગુરાન્તઃ
બદ્ધઃ કુરઙ્ગ ઇવ દુઃખમયો ભવેયમ્ ॥ ૧૭૯॥

પ્રકૃત્યનુગુણં સદા વિવિધવાઞ્છયા સઞ્ચરન્
અલબ્ધસુમનોરથસ્તદુપલબ્ધયે દુષ્કૃતે ।
પ્રવર્તિતમના ભવામ્યમિતદુઃખપાત્રં તતઃ
પ્રદેહિ દયયૈવ મે તવ પદાબ્જભક્તિં હરે ॥ ૧૮૦॥

રામાનુજાર્યકરચિહ્નિતશઙ્ખચક્રઃ
યશ્શ્રીગુરૂત્તમપરમ્પરિકાપ્રતીક્ષ્યઃ ।
તસ્યોરગાચલપતેઃ કરુણાપગા માં
પાપૈકમન્દિરમમું પ્રયતા પુનાતુ ॥ ૧૮૧॥

શ્રુત્યેકગમ્યમહિમાતિશયં ભવન્તં
શ્રીશ્રીનિવાસ! ભુજગેન્દ્રમહીધ્રશૃઙ્ગે ।
પશ્યામ્યહં નનુ ભવત્કરુણાવિશેષાત્
યોગીન્દ્રમૃગ્યમમરાર્ચિતપાદપદ્મમ્ ॥ ૧૮૨॥

વર્ષાતપામિતસમીરણસમ્ભૃતેઽપિ
ભોગીન્દ્રભૂમિધરતુઙ્ગવિશાલશૃઙ્ગે ।
માદૃગ્જનાર્થમવનૌ કૃતસન્નિધાનઃ
દૃગ્ગોચરોઽસિ કરુણા ખલુ કારણં તે ॥ ૧૮૩॥

જાનામ્યનાદિપરિજૃમ્ભિતવાસનાનુ-
સ્વીયપ્રવૃત્તિરિતિ તત્તવ નામ પૂતમ્ ।
ન સ્મર્યતે ન ચ ભવત્પદભક્તવર્ગોઽ-
પ્યેવં સ્થિતે તવ દયા શરણં સદા મે ॥ ૧૮૪॥

અધરનિહિતવેણું રાધિકાલિઙ્ગ્યમાનં
મદનપરવશાભિર્વલ્લવીભિઃ પરીતમ્ ।
વિચલદલકપઙ્ક્તિપ્રોચ્ચલદ્બર્હચૂડં
મમ મનસિ દયે! શ્રીનન્દસૂનું નિધેહિ ॥ ૧૮૫॥

યસ્મિન્ ભુવિ પ્રણયિની કરુણા ત્વદીયા
શ્રીશ્રીનિવાસ! સ સદા પ્રમદાન્વિતસ્સન્ ।
ધત્તે સુવૃત્તપરિશુદ્ધગુણાં સ્વકણ્ઠે
મુક્તાવલિં સકલલોકવિભાવ્યમાનામ્ ॥ ૧૮૬॥

હે વેઙ્કટ! ત્વમસિ નિશ્ચલતાં પ્રપન્નઃ
તત્ત્વચ્છિરોઽર્પિતપદઃ કમલાસખોઽયમ્ ।
નાહં તથાઽસ્મિ ન હિ મે તવ ભાગધેયં
સમ્પ્રાર્થયે તદિહ તત્કરુણાં સુદીનઃ ॥ ૧૮૭॥

દાસ્યં કૃતં કુજનસન્નિધિમેત્ય કુક્ષિ-
સમ્પૂરણાય ન હિ તે પદયોઃ કદાપિ ।
શ્રીવેઙ્કટેશ! કરુણા યદિ તે મયિ સ્યાત્
એતાદૃશી કિમુ દશા મયિ સમ્ભવેદ્વા ॥ ૧૮૮॥

પુરારચિતદુષ્કૃતોદ્ધતફલાનુભૂતૌ રુદન્
ભવન્તમિહ ગર્હયામ્યવિદિતાત્મપાપક્રિયઃ ।

તથાપિ રચિતસ્મિતપ્રકટિતાત્મગામ્ભીર્યતઃ
કટાક્ષયસિ માં કૃપારસપરિપ્લુતાક્ષો હરે ॥ ૧૮૯॥

નોપેક્ષણીયમિદમુત્તમપાત્રમદ્ય
કારુણ્યદુગ્ધમિહ પૂરય વેઙ્કટેશ ।
મૃત્સ્નાઘટોઽપિ નનુ ગોકુલદુગ્ધપૂર્ણઃ
કૃષ્ણાત્મકસ્ય તવ ભોગ્યતમો બભૂવ ॥ ૧૯૦॥

કનત્કનકવાસસં કટિતટાર્પિતેલીત્સરું
વરપ્રદકરામ્બુજં રુચિરજાનુચઞ્ચત્કરમ્ ।
કરદ્વયધૃતાયુધં સ્મિતમનોજ્ઞબિમ્બાધરં
ભવન્તમનુકમ્પયા હૃદિ સદા મમ સ્થાપય ॥ ૧૯૧॥

અચિન્ત્યગુણચેષ્ટિતોઽપ્યવનિજૈર્જનૈર્દુષ્કૃત-
પ્રરોપિતમતિભ્રમૈર્નહિ ભવાનહો! ગણ્યતે ।
તદદ્ય રચિતાઞ્જલિસ્સવિનયં મુહુઃ પ્રાર્થયે
નિપાતય કૃપામૃતં ભુવિ વૃષાદ્રિધારાધર ॥ ૧૯૨॥

લીલામાનુષવિગ્રહં વિરચિતપ્રત્યર્થિસન્નિગ્રહં
કારુણ્યૈકકૃતાતિમાનુષજગદ્વિખ્યાપિતાત્મક્રિયમ્ ।
જાનાત્યત્ર તુ કોઽપિ તાપસગણસ્ત્વાં ભાર્ગવીવલ્લભં
નાન્યે તત્કરુણામૃતં પ્રહિણુ તે શેષાદ્રિધારાધર ॥ ૧૯૩॥

પ્રહ્લાદં પિતૃભર્ત્સિતં દૃઢતરપ્રીતિસ્તુતત્વત્પદં
સ્થાસ્નુસ્તમ્ભવિજૃમ્ભિતાત્મનૃહરિક્રૂરસ્વરૂપો ભવાન્ ।
હત્વા શત્રુમરક્ષદત્ર કરુણા તે ચક્રિણઃ કારણં
તચ્છેષાદ્રિપતે! નિપાતય કૃપાં પાપાત્મકે મય્યપિ ॥ ૧૯૪॥

નવનીતચિક્કણ પયઃપ્લુતાંશુક-
વ્રજગોપિકાભિરભિદર્શિતાદરઃ ।
યમુનાતટોચ્ચપુલિનાભિખેલને
વ્યહરો હિ હન્ત! કરુણા તવેદૃશી ॥ ૧૯૫॥

કદર્યગૃહદેહલીદરદુરાસિકાં દારય
પ્રદાપય દયે! હરેઃ કરવરેણ વિત્તં તુ મે ।
યદત્ર ભગવત્પદપ્રવણભક્તવર્ગેષ્વહં
મુદા સમુપયુજ્ય ચ પ્રમુદિતો ભવેયં સદા ॥ ૧૯૬॥

જિહ્વા યથા મે ન કદાપિ નિન્દાં પરસ્ય કુર્યાદ્વૃષશૈલનાથ!
સદા દયા તે સકલેષ્ટદાત્રી તનોતુ વાચાટમમું તથા મામ્ ॥ ૧૯૭॥

ત્વત્કૃપાપાત્રતાં નીતા વૃષશૈલશિખામણે!
ત્વત્કીર્તનપરા મેઽસ્તુ રસજ્ઞા મઞ્જુભાષિણી ॥ ૧૯૮॥

કારુણ્યપ્રચુરતરં ત્વદીયચિત્તં
કાઠિણ્યપ્રવણમિદં મદીયચિત્તમ્ ।
વસ્તુસ્થિત્યવિનિમયઃ પ્રસિદ્ધ એવ
શ્રીમંસ્તન્મયિ કરુણાં કુરુ પ્રસીદ ॥ ૧૯૯॥

આશાયા વિરતિર્નહીહ ભુવને દત્તેઽપિ વિત્તે પુનઃ
કાઙ્ક્ષા તત્પરિવૃદ્ધયે ચ પુનરપ્યાસૌ સમુજ્જૃમ્ભતે ।
એવં સ્વાનુભવેઽપિ તસ્ય સુમહાન્ રોગોઽવકાશપ્રદઃ
ન સ્યાદેવ તદદ્ય તેઽત્ર કરુણાં નીચોઽપિ યાચે હરે ॥ ૨૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
દ્વિતીયશતકં સમ્પૂર્ણમ્ ।

## ૩. તૃતીયશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમતે નિગમાન્ત દેશિકાય નમઃ ।
અથ દયાસહસ્રે તૃતીયશતકમ્ ।

દાનેન કિં નિગમશાસ્ત્રપુરાણતત્ત્વ-
જ્ઞાનેન કિં સુતપસા કિમુ તીર્થગાહૈઃ ।
યોગેન કિં કિમુ જપેન વૃષાદ્રિનાથ!
દૂરે ભવેદ્યદિ દયા તવ દુઃખહન્ત્રી ॥ ૨૦૧॥

વિકર્તનકુલોદ્ભવઃ પ્રતિભટં પ્રચણ્ડદ્યુતિં
કુઠારવરદારિતપ્રબલદૃપ્તરાજદ્રુમમ્ ।
વિધાય ગતતેજસં પરશુરામમાશ્વત્યજો

રઘૂત્તમ! દયાનઘા પ્રકટિતા રિપાવપ્યહો ॥ ૨૦૨॥

વામાકૃતિર્વામનવિગ્રહસ્ત્વં સામાભિગીતોઽપિ પુરન્દરસ્ય ।
કામાભિપૂર્ત્યૈ બત! યાચકોઽભૂઃ સીમાતિગા તે કરુણા રમેશ ॥ ૨૦૩॥

સત્યાં દયાયાં તવ વેઙ્કટેશ! ન કર્મઠોઽહં ન હિ ભક્તિભાક્ચ ।
ત્વન્નામવક્તા ન ન શાસ્ત્રવેત્તા સા રક્ષતીતિ પ્રતિપન્નધૈર્યઃ ॥ ૨૦૪॥

યથા તથા વા સકૃદઞ્જલિં હરે!
વિતન્વતેઽહં વિતરામ્યભીપ્સિતમ્ ।
ઇતીરિતં તત્પરિપાલયાશુ માં
તથાવિધં શેષગિરીશ! સાદરમ્ ॥ ૨૦૫॥

કલ્યાણકૃદ્રસનયા સમુદીરણેન
ત્વન્નામ દિવ્યમભિધાતુમપિ શ્રુતીડ્યમ્ ।
ઘોરં રુણદ્ધિ દુરિતં ચિરસઞ્ચિતં માં
તત્ક્ષાલયાશુ કરુણાસલિલૈર્મુકુન્દ! ॥ ૨૦૬॥

કાર્યં કારણમન્તરા ન હિ ભવત્યેતત્ પ્રસિદ્ધં કિલ
શ્રીમન્નત્ર નિદર્શનં ત્વહમહિક્ષ્માભૃદ્વિભો! સામ્પ્રતમ્ ।
સદ્વંશે જનનં સતાં ચ નિવહે વાસઃ પવિત્રાવનૌ
સ્થાનં જ્ઞાનિષુ ભાષણં ચ કરુણાકાર્યં કિલૈતન્મમ ॥ ૨૦૭॥

અભિનિવેશવશં મમ માનસં
નિજમતાનુગતં કથમચ્યુત! ।
સ્વગુરુવાગનુવર્તિ ભવેત્તતઃ
કરુણયા નનુ વર્તય સત્પથે ॥ ૨૦૮॥

મચ્છેમુષી વિષયમાર્ગણસમ્મુખીના
વિસ્મૃત્ય સર્વપતિમપ્યમિતાશયા ત્વામ્ ।
ધાવત્યભીતિકુલટેવ તદદ્ય નાથ!
સન્માર્ગગાં તવ દયાં કુરુ તત્સખીં દ્રાક્ ॥ ૨૦૯॥

સ્મિતમુખીં મુકુટપ્રસવસ્રજં
તુહિનવાલુકયા કૃતપુણ્ડ્રકામ્ ।
મયિ દયા યદિ તેઽહિગિરિપ્રભો!
નયનગોચરતાં સ્વતનું નય ॥ ૨૧૦॥

ધીસારથિર્વિષયિવાજિગણં ગૃહીત-
હૃત્પ્રગ્રહસ્તનુરથં ગમયત્યતન્દ્રઃ ।
આત્મા રથી વિષયઘાસસમર્પણેન
વાહાન્ સુપોષયતિ તે કરુણા-સુદૂરઃ ॥ ૨૧૧॥

પ્રાણાયામવિધિર્ન મે સ્થિરસુખં નાપ્યાસનં માનસ-
સ્થૈર્યં નૈવ શુચિત્વમપ્યચપલધ્યાનં ન સિદ્ધેર્વચઃ ।
નો હિંસાવિનિવૃત્તિરપ્યુપકૃતિર્નૈવાહિશૈલપ્રભો!
કારુણ્યામૃતવર્ષિણં પ્રહિણુ તત્સ્વીયં કટાક્ષં મયિ ॥ ૨૧૨॥

કતકક્ષોદવત્પાથો વેङ्कટેશ! દયા તવ ।
તનોતુ નિર્મલં મેઽદ્ય કિલ્બિષૈરાવિલં મનઃ ॥ ૨૧૩॥

ભોગીન્દ્રતુઙ્ગાદ્રિશિરોવિવસ્વન્! વિસૃત્વરાસ્તે કરુણામયૂખાઃ ।
આવિદ્યમન્તર્દૃઢગાઢરૂઢં તમો વ્યપોહન્તુ પિનદ્ધચક્ષુઃ ॥ ૨૧૪॥

અનિમિષપરિવીક્ષણીયમન્ત-
સ્સ્મરણવિવર્ધિતદિવ્યમોદભારમ્ ।
પ્રકટિતકરુણં ત્વદીયરૂપં
હૃદયતટાક તટેઽટતુ પ્રભો! મે ॥ ૨૧૫॥

નગ્ના વિધાય યમુનાસલિલાર્ધમગ્નાઃ
ગોપીસ્તદંશુકહરો મુમુદે ભવાન્ હિ ।
મગ્નાન્તુ દુઃખજલધૌ પટદો હ્યનગ્નાં
કૃષ્ણાં શુશોચ કરુણા તવ ચિત્રરૂપા ॥ ૨૧૬॥

દિવ્યાપવર્ગસુખપદ્ધતિસાક્ષિણં તં
રામાનુજં મુનિવરં શરણાર્થિને મે ।
સન્દર્શ્ય ભોગિગિરિનાથ! ભવાબ્ધિભાજે
મન્દસ્મિતોઽસિ કરુણા તવ માદૃશાય ॥ ૨૧૭॥

કીશાનસ્રપઘાતિતાન્ સમરભૂસુપ્તાન્ સ્વસાહ્યોન્મુખાન્
મર્ત્યાત્મા સુરસાર્વભૌમવરતઃ સ્વાત્માર્થમુત્થાપ્ય ચ ।
સપ્રાણાન્ સમતોષયો હિ ભુજગક્ષ્માભૃત્સુધાદીધિતે!
કારુણ્યં તવ વાગગોચરમહો! માદૃગ્વિધે માધવ ॥ ૨૧૮॥

કાદમ્બિની સુજનદુર્જનતારતમ્યં

કિંવાવલોકયતિ? તમ્રજનાન્ ધિનોતિ ।
એવં વૃષાચલપતે! કરુણા ત્વદીયા
તાપત્રયૈકનિલયાન્ શિશિરીકરોતુ ॥ ૨૧૯॥

અનુભવન્તિ જના નિજકર્મતઃ
સુખમશર્મ ચ શેષગિરિપ્રભો ।
તદપિ તે કરુણા શ્રિતવત્સલા
શમયતુ શ્રિતદુઃખમભીષ્ટદા ॥ ૨૨૦॥

ભુજગાવનિભૃચ્છિરોવિહારિન્!
યદિ દીયેત પુનશ્ચ જન્મ મહ્યમ્ ।
ભવતા દયયા પ્રદીયતાં શ્રી-
મુનિરામાનુજપાદપૂતદેશે ॥ ૨૨૧॥

સીમાતીતપ્રચુરવિભવા ભાવનાગમ્યરૂપા
ત્રૈલોક્યસ્થૈરહમહમિકાપ્રાર્થનીયા દયા તે ।
દૈન્યક્ષોણીભૃદશનિરહિક્ષ્માભૃદગ્રાવતંસ!
ત્વત્કીર્તિશ્રીપ્રસરણચણા ભાગ્યતો ભાતિ કાપિ ॥ ૨૨૨॥

અભ્યર્થનાપ્રકારઃ પ્રાકૃતધિષણસ્ય નૈવ મે વિદિતઃ ।
નિર્હેતુકપ્રસન્ના કરુણા રક્ષતુ તવાહિશૈલપ્રભો ॥ ૨૨૩॥

વારાહં પ્રયતસવાઙ્ગદિવ્યરૂપં
સમ્પ્રાપ્ય  પ્રલયપયોનિધૌ નિમગ્નામ્ ।
ઉદ્ધૃત્ય ક્ષિતિમિવ માં ભવાબ્ધિમગ્નં
રક્ષ ત્વત્સિતકરુણાખ્યદંષ્ટ્રયૈવ ॥ ૨૨૪॥

મૃગરાજશિરા નરોત્તમસ્ત્વં રિપુહન્તા રમયા પ્રશામિતક્રુત્ ।
અપિ ચેદ્દયયા વિચોદિતસ્સન્ ન ભવેશ્રીશ! જગદ્ભવેત્કથં વા ॥ ૨૨૫॥

વિધ્યાદયસ્તવ દયોદયતસ્ત્વદીયાં
દિવ્યામુદારદરદૂરવિભૂતિમેત્ય ।
દેદીપ્યમાનદિવિષત્પરિષત્પરીતાઃ
શ્રી વેઙ્કટેશ! વિલસન્તિ નિરઙ્કુશાસ્તે ॥ ૨૨૬॥

મા નો ભુજઙ્ગમગિરીન્દ્રશિરોવિહારિન્!
માનોઽસ્તુ મર્ત્યનિવહેષુ કદાપિ નાથ! ।

ત્વત્પાદતામરસકિઙ્કરતોપલબ્ધ્યા
સોઽસ્તુ ત્વદીયસહવાસવિશેષજન્મા ॥ ૨૨૭॥

સ્વામિન્નુદારકરુણા તવ કિઙ્કરેઽસ્મિન્
સાહ્યં મહત્કૃતવતી જગતીતલેઽસ્મિન્ ।
ત્વદ્દર્શનાનુભવકન્દલિતાનુભાવ-
હર્ષપ્રકર્ષપુલકાઞ્ચિતમાતનોન્મામ્ ॥ ૨૨૮॥

દુરત્યયા હિ માયા તે તયા વાગુરયેવ મામ્ ।
બદ્ધં વિમોચયત્વેનં કરુણા તે રમાપતે ॥ ૨૨૯॥

યથા ભવન્તં પશ્યેમ શરદશ્શતમાદરાત્ ।
અસ્માસ્વનુગ્રહં કુર્યાત્તથા તે કરુણાચ્યુત ॥ ૨૩૦॥

કઠોરહૃદયાસુરપ્રકુપિતાક્ષિસંસ્તમ્ભન-
પ્રદાનપટુવીક્ષણક્ષપિતવૈરભારં હરે! ।
પ્રદર્શિતસુવિભ્રમં ભ્રમરકાઞ્ચિતાસ્યામ્બુજં
દયા કિલ દદૌ તદા રુચિરમોહિનીવર્ષ્મ તે ॥ ૨૩૧॥

ભવદઙ્ઘ્રિસરોજચિન્તનૈક-
સ્થિરચિત્તત્વમરાળગાદ્રિનાથ! ।
વિતરત્વનિશં શ્રિતાય મહ્યં
કરુણા તે સકલેપ્સિદાર્થદાત્રી ॥ ૨૩૨॥

કામાદિચઞ્ચલષડૂર્મ્યભિતાડિતાત્મા
નામાપિ તે સ્મૃતિપથે ન નિવેશયામિ ।
સામાદ્યુપાયગણના ન કૃતા મયા તત્
સીમાતિગા તવ દયાચ્યુત! માં પુનાતુ ॥ ૨૩૩॥

ક્ષીણાત્મા દુરિતચયૈશ્ચિરાર્જિતૈસ્તે
કારુણ્યં કિમુ કથયેયમમ્બુજાક્ષ! ।
યન્મે ત્વન્નિરુપમદર્શનન્તુ કાક-
તાલીયં સમભવદત્ર વેઙ્કટેશ ॥ ૨૩૪॥

સુકુમારકાન્ત શિશુભાવભાવિતં
કમનીયરૂપમવનીપભર્ત્સિતમ્ ।
ધ્રુવમાદરેણ તપસિ સ્થિતં વને

દયયૈવ વેઙ્કટપતે! ररक्षिथ ॥ ૨૩૫॥

માતર્દયે! કુરુ તથા હૃદિ મે યથા સ્યાત્
શ્રીશ્રીનિવાસચરણસ્મરણં સમોદમ્ ।
તત્કીર્તન-શ્રવણ-વન્દન-મન્દિરાભિ-
યાનાદયશ્ચ કરણેષ્વિતરેષુ નિત્યમ્ ॥ ૨૩૬॥

અસત્યમશૌચમનારતદૌષ્ટ્યં
વિનિન્દિતકર્મરતિં ચ દયાલો! ।
અહીશશિલોચ્ચયશૃઙ્ગવિહારિન્!
નિરાકુરુ સર્વમિદં દયયા મે ॥ ૨૩૭॥

સ્મરંસ્તવ દયાલુતાં દુરિતકૃદ્ભવામ્યુદ્ધતઃ
ભવેયમિતિ ભાવયંસ્તવ દયૈકસદ્ભાજનમ્ ।
યતસ્તવ દયા સદા દુરિતદુઃખિનસ્સાન્ત્વય-
ત્યમેયશુભવૈભવ! દ્વિરસનાદ્રિદીપાચ્યુત ॥ ૨૩૮॥

કિં વા કૃતં સુકૃતમત્ર મનુષ્યદેહ-
ભાજા મયેતિ સુવિચારવિલોડિતે મે ।
હન્તાવિચારરમણીયમિદં કિલેતિ
ચિત્તં વદત્યયિ! દયાં કુરુ તદ્રમેશ ॥ ૨૩૯॥

કરોટિપટલસ્રજો ભસિતલિપ્તચઞ્ચત્તનોઃ
શ્મશાનવસતેઃ જ્વલત્કુટિલફાલચક્ષુષ્મતઃ ।
ગજાજિનકટેઃ નટદ્વિકટભૂતસઙ્ઘપ્રભોઃ
શિવત્વમભવત્સરીસૃપગિરીશકારુણ્યતઃ ॥ ૨૪૦॥

સૌલભ્યં ન હિ ગણયન્તિ માનવાસ્તે
પારમ્યં તદપિ વૃથૈવ ભૂતલેઽસ્મિન્ ।
અર્ચ્યત્વં તુ દુરુપયોજયન્તિ મૌઢ્યાત્
ત્વાં યાચે તદિહ દયાં નિધેહિ નાથ ॥ ૨૪૧॥

સત્વોદ્રેકાત્કતિચન સદા ભાવયન્ત્યાત્મતુષ્ટ્યૈ
કેચિત્સ્વીયં નિરુપમફલં કાઙ્ક્ષમાણા રજસ્તઃ ।
અન્યદ્રોહે નિરતમતયસ્તામસાસ્ત્વાં મુરારે!
સર્વત્રાપિ ત્વદતુલદયાત્વેકરૂપા કિમેતત્? ॥ ૨૪૨॥

ત્યજ હૃદય! ભયં તન્નારકાદ્રૌરવાખ્યાત્
યદપિ દુરિતકૃત્ત્વં શઙ્કમાનં બિભેષિ ।
શ્ૃણુ હિતવચનં મે કાપિ જાગર્તિ વિષ્ણોઃ
ત્વદુપમજનરક્ષાબદ્ધદીક્ષાનુકમ્પા ॥ ૨૪૩॥

કલિકલ્મષાભિહતમાનસે જને
વિનિવેદયામિ યદિ વૈભવં તવ ।
પરિહાસભાજનમહો ભવામ્યહં
વૃષશૈલનાથ! કુરુ તાદૃશે દયામ્ ॥ ૨૪૪॥

કિં વા પયોધિતનયા સહચારિણી તે
મા શ્રીનિવાસકરુણે! નનુ તાદૃશી ભૂઃ ।
એકત્ર સાત્વચપલા ન હિ તિષ્ઠતિ ત્વં
સ્યાશ્ચેત્તથા જગદિદ કથમમ્બ! તિષ્ઠેત્? ॥ ૨૪૫॥

ઉચ્ચસ્થલાદ્વહતિ વિષ્ણુપદી પવિત્રા
નીચેષુ સંશ્રિતજનાઘવિમોચનાય ।
શ્રીવેઙ્કટેશકરુણાપિ તથૈવ હન્ત!
લોકે મહાત્મસરણિસ્સહજૈકરૂપા ॥ ૨૪૬॥

યં જાયમાનમહિશૈલપતે! પુમાંસં
પશ્યેરનુગ્રહસુપૂર્ણકૃપાકટાક્ષૈઃ ।
શ્રીમાન્ ગુણી ધિષણતુલ્યમતિસ્સુરૂપો
લોકપ્રિયો દૃઢતનુસ્સુકૃતી ભવેત્સઃ ॥ ૨૪૭॥

જગત્સૃષ્ટિરક્ષાવિનાશાદિકર્મ
સ્વસઙ્કલ્પમાત્રેણ તન્વન્નપિ ત્વમ્ ।
નૃશંસાસુરધ્વંસનાયાવતીર્ણો
ધરિત્ર્યાં કૃપાકાર્યમેતત્કિલેશ ॥ ૨૪૮॥

સર્વવ્યાપી નિરવધિગુણઃ કર્મસાક્ષી દયાલુઃ
તત્તત્કર્મપ્રશમનકૃતે ચેતનેભ્યશ્શરીરમ્ ।
દત્વા સ્વીયપ્રપદનવિધિં બોધયન્ શાસ્ત્રતસ્તાન્
રક્ષસ્યમ્ભોરુહનયન! તે તાં દયાં કિં બ્રવીમિ ॥ ૨૪૯॥

ચિરાર્જિતતપઃફલં કિમુત તે કૃપાયાઃ ફલં
વૃષાચલશિખામણે! મમ તુ વૈષ્ણવાનાં કુલે ।

જનિર્યદભવત્તતસ્તવ પદાબ્જનુત્યૈ સ્પૃહા
યતીન્દ્રપદસંશ્રયઃ પ્રયતદિવ્યદેશે સ્થિતિઃ ॥ ૨૫૦॥

શ્રીશ્રીનિવાસ! મયિ તે કરુણા ન ચેત્સ્યાત્
ત્વત્સન્નિધૌ કૃતકઠોરતરાપરાધઃ ।
કાકોલવત્ત્રિભુવનેષુ ચ કાન્દિશીકઃ
દીનશ્ચરેયમુરુવક્રગતિર્નૃશંસઃ ॥ ૨૫૧॥

કમલા વિમલાયતાબ્જનેત્રી તવલીલાકલનાય વેઙ્કટેશ!
જગદેતદકારયત્ત્વદીયા કરુણા રક્ષતિ તત્તદર્થદાત્રી ॥ ૨૫૨॥

આતતાયિનમમેય બલાઢ્યં વેઙ્કટેશ ષડરાતિ સમૂહમ્ ।
છિન્ધિ કન્દલિતદુષ્ટકુચેષ્ટં ત્વદ્દયાસિ શિતધારિકયા દ્રાક્ ॥ ૨૫૩॥

શ્રીવેઙ્કટેશ! સુમતેર્વિજિતેન્દ્રિયસ્ય
ક્વાપ્યન્તરઙ્ગલલનાકૃતસન્નિધાનમ્ ।
નાસ્ય પ્રકલ્પયસિ યત્ત્વમિહાવકાશં
સ્વામિંસ્તદેવ ખલુ તે કરુણૈકકાર્યમ્ ॥ ૨૫૪॥

પાપાદ્વ્યાધિર્ભવતિ હિ તતો ગ્લાનિરાત્મન્યુદેતિ
પ્રાયો દેહે તદનુ વિરસા હેયતાશેમુષી સ્યાત્ ।
એષા રીતિર્વૃષગિરિપતે! ત્વત્પદધ્યાનતોઽપિ
સ્યાદ્દુઃખાઢ્યં પ્રથમમપરં મોદદં ત્વત્કૃપાતઃ ॥ ૨૫૫॥

સ્તમ્ભાત્સાન્દ્રાત્ શ્રિતનિજમહાભક્તબાલસ્ય સૂક્તિં
સાક્ષાત્સત્યાપયિતુમુદભૂર્નારસિંહસ્વરૂપઃ ।
સિક્તાઙ્ગોઽભૂર્ધમનિરુધિરૈર્દારિતારાતિવક્ષાઃ
કારુણ્યૈકપ્રવણહૃદયો હેયભોગ્યો હિ જાતઃ ॥ ૨૫૬॥

પ્રલયકાલનિજોદરરક્ષિત-
ત્રિભુવનોઽપિ વસન્ વ્રજમન્દિરે ।
ક્ષુદભિપીડિતવન્નવનીતમુટ્
કરુણયાજ્ઞજનેષ્વભવશ્શિશુઃ ॥ ૨૫૭॥

કસ્તૂરીતિલકં તવ ક્વ નિટિલે ક્વેદં વ્રજે ગોમયં
પક્ષીન્દ્રાટનમમ્બરે ક્વ નુ તવ ક્વારણ્યપાદાટનમ્ ।
સૂરીન્દ્રૈઃ ક્વ સહાનુભૂતિરિહ તે ગોપૈઃ ક્વ સખ્યં વ્રજે

ભોગીન્દ્રાચલશ‍ૃઙ્ગદીપ! કરુણાનિધ્નોઽસિ ચિત્રાકૃતિઃ ॥ ૨૫૮॥

કિં કારણં રઘુપતે! ચરણત્રયં દ્રાક્
પશ્ચાદ્ગતાઃ ખરખરાદિરણાજિરે ત્વમ્ ।
કિં વારિરાક્ષસગણેષ્વપિ તેઽનુકમ્પા
નૂનં ત્વદીયહૃદયં સકલૈકરૂપમ્ ॥ ૨૫૯॥

સમ્પત્સમૃદ્ધિવિભવોઽપિ સુખી ન મર્ત્યઃ
વિત્તવ્યયામયવયઃપરિણામદુઃખૈઃ ।
ક્લિષ્ટો હિ તચ્ચરણયુગ્મમિદં ભજસ્વે-
ત્યઙ્ઘ્રી પ્રદર્શયસિ કિં કૃપયા કરેણ ॥ ૨૬૦॥

પ્રકૃતિમણ્ડલપઞ્જરમધ્યગઃ
શુકનિભોઽશનપાનવશંવદઃ ।
વિગતપક્ષતયાહિગિરિપ્રભો!
તવ કૃપાં નનુ મોક્ષકૃતેઽર્થયે ॥ ૨૬૧॥

કાલક્ષેપશ્ચલતિ બહુશઃ ક્ષુત્પિપાસાદિશાન્ત્યૈ
નિત્યં રાત્રિન્દિવમપિ પરક્રીતદેહસ્ય નાથ! ।
ત્વત્સેવાયામવિચલમતિર્મે કદોદેષ્યતિ શ્રી-
શેષાદ્રીશ! પ્રયતમનસસ્ત્વત્કૃપાનુગ્રહાદ્વા ॥ ૨૬૨॥

અરુણોદયેન વિકચામ્બુજવ્રજં
મધુમઞ્જુલાભમલિમણ્ડલં યથા ।
અહિશૈલનાથ! કરુણોદયેન તે
પદપદ્મમાત્મહૃદયં વ્રજેત્તથા ॥ ૨૬૩॥

સુખધિયા વિષયાનલમાદરાત્
અભિપતન્તમુપર્યભિધાવિતમ્ ।
કરુણયા વિનિવારય માં રયાત્
શલભસન્નિભમમ્બુજલોચન ॥ ૨૬૪॥

કારુણ્યાઞ્જનમઞ્જનાદ્રિનિભ! તે વાત્સલ્યકુઞ્ચ્યાર્પયન્
અન્તશ્ચક્ષુષિ જન્મતઃ પ્રભૃતિ મે સમ્ભૂતમાન્ધ્યં હરન્ ।
કાન્તારસ્ય ભવાભિદસ્ય સરણૌ શશ્વત્ સ્ખલત્પદ્ગતેઃ
આવિર્ભાવય વેઙ્કટેશ! નયનં સન્માર્ગસમ્પ્રાપકમ્ ॥ ૨૬૫॥

સ્વાઙ્ઘ્રૌ નિપત્ય નિજરક્ષણમર્થયન્તં
ભીતં સરીસૃપવરં પરિનુદ્ય શત્રૌ ।
તાર્ક્ષ્યે નિજાઙ્ઘ્રિશિખરેણ વૃષાચલેશ!
તદ્રક્ષણે કરુણયા તમયૂયુજો હિ ॥ ૨૬૬॥

તાપત્રયૈકનિલયઃ કરણત્રયેણ
કાલત્રયં વિરચિતત્રિવિધાપરાધઃ ।
લોકત્રયેઽપ્યવિહિતત્રિપુમર્થલાભઃ
યાચે તવાદ્ય કરુણાં શરણં રમેશ ॥ ૨૬૭॥

વનિતાતનયાલયાદિસૌખ્યં
નિજકર્માનુગુણં ભવત્યતન્દ્રમ્ ।
તદહં સ્પૃહયામિ નૈવ તસ્મૈ
કરુણાયૈ તવ વેઙ્કટેશ! કિન્તુ ॥ ૨૬૮॥

માત્રા બદ્ધઃ કુપિતમનસા સ્વોદરે વત્સદામ્ના
પ્રારોદીસ્ત્વં પ્રશકનગુણોઽપ્યલ્પબન્ધાસહિષ્ણુઃ ।
નિત્યં બદ્ધઃ કથમિવ ભવે દુર્બલોઽહં ન રુદ્યાં
શેષાદ્રીશ! પ્રહિણુ કરુણાં તન્મયિ સ્ફીતદુઃખે ॥ ૨૬૯॥

કિમ્પચત્વવિનિવારિતધૈર્યઃ
પાપકર્મણિ રતોઽસ્મિ નિતાન્તમ્ ।
પાહિ તત્કરુણયા પ્રવિતીર્ય
શ્રીશ! નિત્યમમિતમ્પચતાં મે ॥ ૨૭૦॥

કાલો ગચ્છતિ યૌવનવ્યતિકરપ્રાપ્તાનુરાગઃ પુમાન્
નારીવિભ્રમભવ્યહૃન્ન ગણયત્યાત્મક્ષતિં તત્ત્વતઃ ।
જાતોઽયં પ્રવયાઃ ક્રમેણ ગલિતસ્વાત્મેન્દ્રિયો બન્ધુભિઃ
ત્યક્તઃ ખિદ્યતિ વેઙ્કટેશ! કરુણાં પુંસ્યર્પય પ્રાર્થયે ॥ ૨૭૧॥

દત્તે શાસ્ત્રેપ્યમિતમતયસ્તર્કતોઽપાર્થનિષ્ઠાઃ
સર્વં મિથ્યા નયનવિષયં સ્વપ્નતુલ્યં બ્રુવાણાઃ ।
સત્યં બ્રહ્મ ત્વગુણમિતિ યે સાધયન્તિ ત્વદીયા
દૂરે તેષાં નિરુપમદયેત્યચ્યુતાહં તુ વેદ્મિ ॥ ૨૭૨॥

મચ્ચિત્તકાલીયફણોપરિ ત્વં
નૃત્યન્નઘક્ષ્વેલમપોહ્ય દીનમ્ ।

આનન્દસિન્ધું નય તં દયાલો
શ્રીશેષશૈલેશ! કૃપાકટાક્ષૈઃ ॥ ૨૭૩॥

સદ્વંશજોઽપિ નનુ સીદસિ રે! નિજાન્તઃ
તુચ્છોઽસ્સ્યહન્ત્વિતિ મુધા વૃષશૈલનેતુઃ ।
જાગર્તિ તસ્ય કરુણા ભુવિ વેણુતુલ્યં
ત્વાં ગ્રાહયત્યભિમુખી ખલુ શૌરિણા સા ॥ ૨૭૪॥

અક્રૂરાય રથેન કંસનિકટં નેતું સભક્તીયુષે
મગ્નાયાર્યમસમ્ભવોદકરયે દિવ્યસ્વરૂપં યથા ।
ક્રૂરાયાપિ ભવામ્બુરાશિજઠરે મગ્નાય મહ્યં તથા
દત્વાનન્દય ભક્તિરિક્તમનસે શ્રીશ! અનુકમ્પોજ્જ્વલ! ॥ ૨૭૫॥

દૈત્યાસ્સ્વયં નિજસમીપમુપાગતં ત્વાં
વીક્ષ્ય ત્વદઙ્ઘ્રિકરપદ્મવરાભિમર્શમ્ ।
પ્રાપુર્યથા ન હિ તથા મુનયોઽપિ તત્તે
શત્રુષ્વવૈમિ કરુણા ત્વધિકેતિ નાથ ॥ ૨૭૬॥

દુર્યોધનાય વિશદીકૃતશાત્રવાય
સન્દર્શિતં સદસિ તાવકવિશ્વરૂપમ્ ।
યદ્દુર્લભં મનનશીલતપસ્વિનાં તત્
કારુણ્યકાર્યમનિયન્ત્રિતમમ્બુજાક્ષ ॥ ૨૭૭॥

શબરીવિતીર્ણવિઘસાશનોઽભવઃ
વૃષશૈલનાથ! નનુ શાસ્ત્રદૂષિતમ્ ।
કૃતવાન્ કિમત્ર કરુણા તુ કારણં
કિમુ તત્સુભક્તિરથવા રઘૂદ્વહ ॥ ૨૭૮॥

કામં સન્તુ પ્રથિતવિભવા દેવતા યાસ્તુ લોકે
ભક્તેભ્યો યત્પ્રિયમુપહરન્ત્યલ્પસૌખ્યં તદેવ ।
સર્વસ્ય ત્વં હિતકૃદચલસ્ફીતસૌખ્યપ્રદો યત્
શેષાદ્રીશ! ત્વયિ વસતિ તન્માતૃકલ્પાનુકમ્પા ॥ ૨૭૯॥

તેજોમયસ્સ ભગવાન્ પુરુષોત્તમસ્ત્વં
માદૃગ્જનાવનકૃતે વૃષશૈલશૃઙ્ગમ્ ।
ઉચ્ચસ્થલં સમધિરુહ્ય દિદૃક્ષયૈવ
તિષ્ઠસ્યહો! કરુણયા ભુવિ વેઙ્કટેશ ॥ ૨૮૦॥

ઉપગ્રાહ્યં દત્તં શ્રિતનૃપતિભિર્દૃપ્તનયનઃ
નિજાપાઙ્ગેનૈવ ક્ષણમભિમુખીભૂય સપદિ ।
સ્વભૃત્યાયત્તં યઃ કલયતિ હરે! સોઽપિ કરુણા
સુદૂરે ચેદ્દીનો વસતિ વિપિને શત્રુભયતઃ ॥ ૨૮૧॥

હેયત્વપ્રતિપાદનેઽપિ વિષયેષ્વાભીલવર્ત્મોન્મુખે-
ષ્વલ્પાનન્દ વિધાયિષુ પ્રણયિનો મર્ત્યાઃ કિમર્થં વદ ।
સંસ્કારસ્થિરવાસનાબલમિદં ચેદ્વેઙ્કટેશ! પ્રભો!
કારુણ્યામૃતસેચનેન હૃદયં નિર્ણિક્તમાપાદય ॥ ૨૮૨॥

ગજેન્દ્રપરિરકક્ષણે કૃતમતિર્ભવાંસ્તસ્ય ચ
સ્વભક્તગજરાટ્ પદગ્રહણમુક્તઘોરાંહસઃ ।
વિદાર્ય નિજચક્રતઃ પ્રથમમેવ તાં નક્રતા-
મપાહરદહો! હરે! તવ કૃપાત્વપારા ખલુ ॥ ૨૮૩॥

ગ્રહણકુર્દનસક્તમના હરે!
રવિસુતાસલિલે રમણીતતેઃ ।
પ્રતિતરઙ્ગગણપ્રતિબિમ્બિતં
કરુણયાકલયસ્સ્વમૃતં વશમ્ ॥ ૨૮૪॥

નાહં ત્વદીય પદપઙ્કજયોર્નમસ્યાં
પુષ્પોદકોદનફલાદિ સુભોગ્યવસ્તુ ।
પ્રીત્યૈ કદાપિ ભવતેઽર્પિતવાન્ મુરારે!
સત્યેવમપ્યકલયઃ કરુણાં મયીત્થમ્ ॥ ૨૮૫॥

સૃષ્ટં ત્વયૈવ સુમચન્દનભોગ્યવસ્તુ
શ્રીવેઙ્કટેશ! ભવતે તદપિ પ્રયત્નાત્ ।
નાહં કદાપિ કરતોઽર્પિતવાંસ્તથાપિ
મય્યાહિતાધિક દયોઽસિ દયાનિધે! ત્વમ્ ॥ ૨૮૬॥

ત્વયા સૃષ્ટાન્ બ્રહ્મપ્રમુખવિબુધાન્મન્દમતયો
ભજન્તે તે હેયક્ષણિકફલલાભાય બહુશઃ ।
તપોભિર્યાગાદ્યૈઃ પશુવિશસનસ્ફીતકરણૈઃ
ન મન્યન્તે યે ત્વાં સ્થિરસુખદમત્યદ્ભુતદયમ્ ॥ ૨૮૭॥

અલ્પાસ્થિરત્વમતયસ્સુગુરૂપદેશૈઃ

સ્વર્ગાદિષુ પ્રણયિનો ન ભવન્તિ ધીરાઃ ।
ભાન્ત્યત્ર કિન્તુ ભવદીયપદાબ્જસક્તાઃ
શ્રી વેઙ્કટેશ! કરુણાં તવ કાઙ્ક્ષમાણાઃ ॥ ૨૮૮॥

યદ્યદ્વિભૂતિમદિહ પ્રથિતપ્રભાવં
તત્તત્ત્વદીયમહિમાતિશયોર્જિતં હિ ।
એવં શરીરિષુ કદાપિ દયાવિશેષાત્
ક્વાપિ પ્રકૃષ્ટસુકૃતી નનુ ભાજનં સ્યાત્ ॥ ૨૮૯॥

તપસા ન તથાપ્યુપાસનાદ્યૈઃ
ન તથા ધૂમસુમોદનાર્પણેન ।
ન તથા વૃષશૈલનાથ! દીને
દયયા તે મનુજે યથા પ્રસન્નઃ ॥ ૨૯૦॥

શ્રીવેઙ્કટેશ! નવહીરકિરીટશીર્ષ
સ્નિગ્ધાસિતાતિમૃદુલાલકપઙ્ક્તિભોગ્યમ્ ।
આકર્ણવિસ્તૃતવિલોચનપુણ્ડરીકં
મન્માનસે તવ મુખં કૃપયાવિરસ્તુ ॥ ૨૯૧॥

ગ્રૈવેયકપ્રસૃતરત્નમયૂખકાન્તિ-
ગીર્ણત્રિરેખગલલોલસુવર્ણમાલમ્ ।
લક્ષ્મીવિલાસનિલયં સુમમાલિકાઢ્યં
મન્માનસે વસતુ તે કૃપયૈવ વક્ષઃ ॥ ૨૯૨॥

શુભ્રાભ્રચૂર્ણવિમલોર્ધ્વવિશાલપુણ્ડ્રં
મન્દસ્મિતોન્નતકપોલમનોજ્ઞરૂપમ્ ।
અંસાવલમ્બિમણિકુણ્ડલદીપ્રકર્ણં
મન્માનસે તવ મુખં કૃપયાવિરસ્તુ ॥ ૨૯૩॥

શ્રીશ્રીનિવાસ! રુચિરાધરપીઠકલ્પં
વિન્યસ્તશુભ્રઘનકૈતવગુપ્તમૌગ્ધ્યમ્ ।
સ્નિગ્ધાતિમાંસલસુનિસ્તલભવ્યરૂપં
મન્માનસં સ્મરતુ તે ચુબુકં દયાલોઃ ॥ ૨૯૪॥

અંસદ્વયાઞ્ચલસમર્પિતશઙ્ખચક્રં
આભૂમિલમ્બિતમહાધનગૂઢહસ્તમ્ ।
ગાઙ્ગેયલમ્બિપૃથુલોજ્જ્વલભૂષણાઢ્યં

બાહુદ્વયં સ્મરતુ તે કૃપયા મનો મે ॥ ૨૯૫॥

પ્રત્યુપ્તહીરમયહેમતલાઞ્ચિતન્તે
વિશ્રાણનાહિતમણિં ચ વિરાજમાનમ્ ।
પાણિં વરપ્રદમહીન્દ્રમહીધ્રનાથ!
મન્માનસં સ્મરતુ તે કરુણાવિશેષાત્ ॥ ૨૯૬॥

દૈર્ઘ્યન્તુ માતુમિવ જાનુતટાર્પિતાગ્રં
દૈર્ઘ્યાદિવાલ્પવલિતાહિતપાણિપદ્મમ્ ।
ભોગીન્દ્રભોગનિભમમ્બુજનેત્ર! વામં
બાહું સ્મરામિ કૃપયા તવ ભોગિભૂષમ્ ॥ ૨૯૭॥

કાઞ્ચીકલાપવિનિવેશિતખડ્ગકોશં
હેમાભિચિત્રિતમહાધનભાસુરાઙ્ગમ્ ।
શ્રીવેઙ્કટેશ! કટિદેશમહં ત્વદીયં
નિત્યં સ્મરામિ કરુણામૃતભાજનં તે ॥ ૨૯૮॥

અસ્મચ્ચિરાર્જિતભયાનકપાપસઙ્ઘ-
જઙ્ઘાલતાકરણઘોષણકાહલી તે ।
શ્રીવેઙ્કટેશ! કનકામ્બરભાસુરાભે
જઙ્ઘે સ્મરામિ કરુણામૃતભાજનં તે ॥ ૨૯૯॥

યન્નિસ્સૃતોદકધુની જનપાવની યત્-
સંસ્પર્શતો દૃષદપિ પ્રયતાબલાભૂત્ ।
શ્રીવેઙ્કટેશ! તવ તત્પદપઙ્કજં મે
ચિત્તે સદાસ્તુ કરુણામૃતભાજનસ્ય ॥ ૩૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
તૃતીયશતકં સમ્પૂર્ણમ્ ।

## ૪. ચતુર્થશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમતે નિગમાન્ત દેશિકાય નમઃ ।

અથ દયાસહસ્રે ચતુર્થશતકમ્ ।

પ્રાચીનકર્મપરિવીક્ષણમમ્બુજાક્ષ!
યુક્તં કિમુ શ્રિતજનેષ્વપિ દુઃખભાક્ષુ ।
ત્વામેવ રક્ષકતયા શરણં પ્રપન્નં
રક્ષ દ્રુતં કરુણયા વૃષશૈલનાથ ॥ ૩૦૧॥

લીલાર્થં યદપિ ભવાન્ પ્રવૃત્ત એવ
ત્વલ્લીલાવિષયચરાચરં જગદ્ધિ ।
કિં કુર્વન્ત્યમિતવિચિત્રદુઃખભાજઃ
કારુણ્યં તવ શરણં મુકુન્દ! તેષામ્ ॥ ૩૦૨॥

નવગ્રહબલં ભવત્પ્રથિતશક્ત્યધીનં કિલ
ત્વદીયનયનાગ્ચલપ્રચલનાત્તકાર્યા હિ તે ।
નિપાતય તદદ્ય મા તદુપરિ પ્રથાં ત્વં વૃથા
કૃપાં કુરુ કૃપાનિધે! સપદિ સાપરાધેષ્વપિ ॥ ૩૦૩॥

દયાનિધિઃ કારુણિકઃ કૃપાલુઃ કારુણ્યમૂર્તિઃ કરુણાપયોધિઃ ।
ઇતીરયન્તીહ જના ભવન્તં શ્રીવેઙ્કટેશ! ત્વદનન્યભાવાઃ ॥ ૩૦૪॥

લોકત્રયેઽપિ પુરુષોત્તમ એક એવ
શ્રીમન્ ભવાંસ્ત્વદિતરે નિખિલાશ્ચ લોકાઃ ।
નાર્યાત્મકા ઇતિ કૃતં તદમું જનં માં
અઙ્ગીકુરુષ્વ કૃપયા તવ ભોગ્યવસ્તુ ॥ ૩૦૫॥

કરુણાકર ઇત્યહં ભવન્તં
રમણીયાદ્ભુતવિગ્રહં યુવાનમ્ ।
ઉપગન્તું અભીપ્સયાસ્મિ દીના
કરુણાં તે મયિ પાતયાશુ નાથ ॥ ૩૦૬॥

સ્ત્રીચાપલં વિદિતમેવ સદા યુવાનં
શ્રીમન્તમુજ્જ્વલતનું ગુણિનં પુમાંસમ્ ।
મુગ્ધાભિકાઙ્ક્ષતિ મુદેતિ તદદ્ય નાથ!
ત્વય્યર્પિતં મમ મનઃ કરુણાં કુરુ ત્વમ્ ॥ ૩૦૭॥

રત્નાકરસ્ય તનયામુપયમ્ય તુષ્ટઃ
તત્ક્રીડનૈકનિરતઃ શ્વશુરાલયે ત્વમ્ ।

નિત્યં શયાલુરસિ ભોગિમૃદૂચ્ચતલ્પે
દીનેષુ નાથ! કરુણા કથમાપતેત્તે ॥ ૩૦૮॥

સદ્યઃ પ્રફુલ્લનવસૌરભપુષ્પમાલ્યં
ભોગ્યાનિ પક્વમધુરાણિ ફલાનિ ધૂપમ્ ।
શ્રીવેઙ્કટેશ! ભવદર્થમહં ચિરેણ
વિન્યસ્ય તેઽભિગમનં પ્રતિપાલયામિ ॥ ૩૦૯॥

ક્વાસીતિ માર્ગણકૃતેઽપ્યબલોજ્ઝિતહ્રીઃ
એકાકિની ક્વનુ કથં ગતભીઃ ભ્રમામિ ।
પૃચ્છામિ કં ભુવિ ન કોઽપિ ભવત્સ્વરૂપં
જાનાતિ તત્કરુણયા સમુપેહિ નાથ ॥ ૩૧૦॥

ત્વં ત્વેકભાર્ય ઇતિ કિં વિરમામિ નાથ!
નૈવં હિ દિવ્યમહિષીશતવલ્લભોઽસિ ।
તસ્માત્ત્વદીયકરુણામભિકાઙ્ક્ષમાણા
ત્વલ્લાભમાત્રતૃષિતા શરણં વ્રજામિ ॥ ૩૧૧॥

કિં યાસિ તાર્ક્ષ્યગમનશ્ચિરતરક્ષણાય
યત્રાહ્વયન્તિ બહવો નનુ માદૃશાસ્ત્વામ્ ।
કિં વાથવા મયિ યથા નિતરાં તથૈવ
નાથ! પ્રકાશયસિ તેષ્વપિ નિર્દયત્વમ્ ॥ ૩૧૨॥

સદ્ગુરું નનુ પુરોહિતં કુરુ
પ્રાર્થયાત્મહિતકાઙ્ક્ષયૈવ તમ્ ।
સોઽનુદર્શયતિ ચેદિતિ પ્રિયં
દેહિ તાદૃશગુરું ત્વમેવ મે ॥ ૩૧૩॥

અનભ્યર્ચિતોઽપિ પ્રસૂનૈર્મયા ત્વં
કૃપાદૃષ્ટિપાતૈસ્સદાનન્દદો મે ।
સ્થિતેઽપ્યેવમેનાં કુતો વા સુદૂરે
નિધિત્સસ્યહો! તેઽનુકમ્પા વિચિત્રા ॥ ૩૧૪॥

નિત્યમઙ્ગલગુણાંસ્તવાનિશં
ભાવયન્ત્યનવધિપ્રમોદભાક્ ।
ત્વત્સમાગમસુખેપ્સયાસ્મ્યહં
વેઙ્કટેશ! કરુણૈકકાઙ્ક્ષિણી ॥ ૩૧૫॥

ત્વત્પ્રાપ્તિકાઙ્ક્ષિહૃદયં મમ દીનબન્ધો!
નિર્નિદ્રતાગલિતશક્તિનિતાન્તતાન્તમ્ ।
બાહ્યેન્દ્રિયાણિ વિકલાનિ તનોતિ નાથ!
તસ્માન્મયિ પ્રહિણુ તે કરુણાં કૃપાલો ॥ ૩૧૬॥

સૌરભ્યપૂર્ણતુલસીવનમાલિકા શ્રી-
દીપ્રેન્દ્રનીલફલકામલવક્ષસં ત્વામ્ ।
નિત્યં સ્મરન્ત્યપગતાખિલકલ્મષાસ્મિ
સ્વીકૃત્ય તત્કરુણયાચ્યુત! માં પુનીહિ ॥ ૩૧૭॥

ગોપીભિર્નવનીતગન્ધિતનુભિસ્સ્વિન્નાઙ્ગકાભિર્વ્રજે
ગ્રામ્યાભૂષણભૂષિતાભિરનિશં ગોવિટ્ કરાભિર્હરે! ।
ક્રીડન્ ભોગ્યતયા પ્રમોદમભજો નાહં તથા કિં કૃપા-
પાત્રં તે વૃષશૈલનાથ! કૃપયા તાદૃગ્વિધાં સ્વીકુરુ ॥ ૩૧૮॥

શ્રુતિવેદ્યમાત્મનિ વિચિન્ત્ય દર્શન-
સ્પૃહયૈવ સન્તતવિચારતત્પરા ।
વિબુધૈરુદીરિતમહં નિશમ્ય તે
ત્વનુપાલયામિ કરુણાં રમાપતે ॥ ૩૧૯॥

બ્રહ્માદયોઽપિ મુનયોઽપિ સુયોગિનોઽપિ
ધ્યાનાર્ચનાદિભિરુપાસનતત્પરા યે ।
દૃગ્ગોચરોઽસ્તિ ન કદાપિ ભવાંસ્તુ તેષાં
કા વા કથા મયિ વિભો! કરુણા ગતિર્મે ॥ ૩૨૦॥

સર્વજ્ઞસ્ત્વં મમ ચ હૃદયં વેત્સિ કારુણ્યમૂર્તિઃ
ક્લિષ્ટક્લેશપ્રશમનપટુસ્સર્વશક્તોઽસિ નાથ! ।
ત્વામેવાહં તદિહ શરણં યામિ દીનાતિમુગ્ધા
ત્વત્સ્વં શ્રીશ! પ્રભવતિ ભવાન્કર્તુમીશો યથેચ્છમ્ ॥ ૩૨૧॥

કલિકલ્મષદુર્જનૌઘમધ્યે
કથમેકા નિવસામિ નાથ! ભીતા ।
પુરુષોત્તમ! તે કરાવલમ્બં
કૃપયા દેહિ સમુદ્ધરાબલાં મામ્ ॥ ૩૨૨॥

દુર્માનદૃપ્તહૃદયાસ્મિ કુરૂપહેયા-

પ્યાત્મન્યનેકસુખભાવનયાતિખિન્ના ।
કુબ્જાપ્રદર્શિતદયામનુચિન્ત્ય ધીરા
હૃષ્ટા તથાપિ વૃષશૈલવિભો! ભવામિ ॥ ૩૨૩॥

આત્મા ગુણૈર્વિવિધગુમ્ભનભોગ્યરૂપા
માલાર્પિતા ભગવતે કરણાન્યમૂનિ ।
કોટીરહારમણિકુણ્ડલનૂપુરાદિ-
દિવ્યોજ્જ્વલાભરણકાનિ કૃપાં વિચિન્ત્ય ॥ ૩૨૪॥

ગામ્ભીર્યં હૃદયગતં રુણદ્ધિ ભાવં
કારુણ્યં નયનયુગે વિજૃમ્ભતે તે ।
સ્તબ્ધાસ્મિ પ્રથમમવેક્ષ્ય તુ દ્વિતીયં
હૃષ્ટાસ્મિ શ્રિતજનરક્ષણૈકદીક્ષ! ॥ ૩૨૫॥

સ્વપ્ને ભવાન્નયનયોર્ધુરિ સઞ્ચરન્ સન્
શુભ્રામ્બુવાહશકલેષુ વિલીનદેહઃ ।
ધૂમોપમો મલિનકાન્તિરગોચરઃ કિં
કારુણ્યકાર્યમહિશૈલવિભો! તવેદમ્ ॥ ૩૨૬॥

પ્રાલેયપુઞ્જપિહિતાઙ્ગવદચ્છકાન્તિઃ
મન્દં સમીપમુપગમ્ય સુધાંશુબિમ્બાત્ ।
અન્તર્હિતોઽસિ મલિનસ્સ્વપને સ્મિતાસ્યઃ
કારુણ્યકાર્યમહિશૈલવિભો! તવેદમ્ ॥ ૩૨૭॥

ત્વચ્ચિન્તનાચલવિલોચનસમ્મુખીનઃ
બાહૂ પ્રસાર્ય પરિરમ્ભમિવાભિકાઙ્ક્ષન્ ।
અન્તર્હિતોઽસિ સહસા સ્વપને પ્રલોભ્ય
કારુણ્યકાર્યમહિશૈલવિભો! કિમેતત્? ॥ ૩૨૮॥

વૃષશૈલસાનુષુ ઘનોપમ સ્સ્થિતઃ
ચપલાભનેત્રયુગસંજ્ઞયાહ્વયન્ ।
સ્વપને દ્રુમૌઘપિહિતઃ પ્રલોભ્ય માં
ગતવાન્ કિમેતદુચિતં દયાનિધેઃ? ॥ ૩૨૯॥

સઙ્ગ્રથ્યમાનમપહૃત્ય હઠાત્પ્રસૂન-
માલ્યં સમર્પ્ય નિજકણ્ઠતલે સ્મિતાસ્યઃ ।
પશ્ચાન્મદીક્ષણપિધાનકૃતોદ્યમોઽભૂઃ

સ્વપ્ને તિરોહિતતનુઃ કરુણા કિમેષા? ॥ ૩૩૦॥

કાન્તો વ્યવસ્યતિ કિમિત્યનુપાલનાય
ધ્યાનૈકમન્થરદૃશં સ્વપને નિષણ્ણામ્ ।
એકાન્તનિશ્ચલતનું પરિરભ્ય માં દ્રાક્
અન્તર્હિતોઽસિ કિમુ તે કરુણાચ્યુતૈષા ॥ ૩૩૧॥

વિવાહસમયોચિત પ્રથિતભૂષણાભૂષિતાં
સખીજનસમેધિતપ્રિયવિલોકનાભાષણામ્ ।
ત્રપાનતમુખીમિમાં સ્વપનકે વિલોભ્ય શ્રિયા
ખગેશગમનોઽગમઃ કિમુ કૃપા તવેયં હરે! ॥ ૩૩૨॥

કરુણાકર ઇત્યશેષભક્તૈ-
ર્વિનુતો માં સુષમાવિહીનદેહામ્ ।
પરિવર્જિતસર્વભોગભાગાં
ભવદીયાં સમુપેક્ષસે હરે! કિમ્? ॥ ૩૩૩॥

અકિઞ્ચનેયમિતિ માં કિમુ વર્જયસિ પ્રભો!
અનન્યગતિકેત્યેવં ઊરીકુરુ કૃપાકર! ॥ ૩૩૪॥

પ્રાર્થિતોઽપિ ભગવાન્ સ ન દૃષ્ટઃ નાપ્યભાષત ન મામભિયાતઃ ।
વારિવાહમુપકલ્પ્ય સુદૂતં પ્રેષયામિ યદસૌ ગતિદક્ષઃ ॥ ૩૩૫॥

હે જીમૂત! ક્ષિતિજવિનુત! સ્ફીતકીર્તિસ્ત્વમેવ
ક્લિષ્ટૈર્જુષ્ટશ્શિશિરહૃદયો જીવનસ્પર્શનાત્મા ।
યત્તે જન્મ પ્રકૃતિમધુરં પ્રાણિનઃ પ્રાર્થયન્તે
તસ્માદ્દૂતો ભવ મમ કૃપાનીરપૂરાભિવર્ષી ॥ ૩૩૬॥

કાન્ત્યા તુલ્યો દિતિસુતરિપોરિન્દિરાતુલ્યવિદ્યુ-
ચ્છ્લિષ્ટો વિષ્ણોઃ પદમનુસરસ્યાશ્રિતશ્રાન્તિશાન્ત્યૈ ।
યત્ત્વં સ્થાતું શિખરિશિખરં કાઙ્ક્ષસે સાદરં તદ્
દૂતો ભૂત્વા મમ હૃદયજં તાપમુન્મૂલયાશુ ॥ ૩૩૭॥

વિદ્યુદ્દીપ્રઃ પ્રચલ ગગને મેઘ! ગમ્ભીરઘોષઃ
પ્રાચીં કાષ્ઠાં ગહનસુભગં ભૂતલં વીક્ષમાણઃ ।
મધ્યેમાર્ગં કુટિલગતયો વીચિશુભ્રામ્બુપૂરાઃ
કર્ષન્ત્યક્ષિ પ્રયતસરિતો નિમ્નવેગોરુરાવાઃ ॥ ૩૩૮॥

ગચ્છન્મન્દં વિયતિ મરુતા પ્રેર્યમાણો રસાત્મા
હર્ષોડ્ડીનૈરનુસૃતગતિસ્સઙ્ઘશશ્ચાતકૈસ્ત્વમ્ ।
ઉત્પિચ્છાઢ્યૈર્નટનપટુભિર્વીક્ષ્યમાણો મયૂરૈઃ
પશ્યસ્યારાદ્ગિરિમુરુતરુવ્યાપ્તમત્યુચ્છ્રિતાગ્રમ્ ॥ ૩૩૯॥

દૂરાત્સોઽયં ધવલતુહિનસ્તોમસચ્છાદિતસ્નુઃ
પત્રોર્ણાઙ્ગો વ્રતતિકુસુમૈર્માલભારીવ વૃક્ષૈઃ ।
કેશાઢ્યો વા વિશદનિપતન્નિર્ઝરસ્ફારહારઃ
ક્ષ્માભૃચ્છ્રીમાન્ સુભગતનુભૃદ્ દૃશ્યતે પ્રોચ્ચમૌલિઃ ॥ ૩૪૦॥

સ્તોકં મન્દં નિકટગમનઃ પશ્ય સાનું વિશાલં
તુષ્ટૈઃ કીરૈર્દ્વિગુણિતહરિદ્વર્ણપર્ણાભિરામમ્ ।
કાસારૈશ્ચ સ્ફુટકમલિનીકર્ષણક્રીડનેભૈઃ
કુઞ્જૈર્નાનાભુજગતતિભિર્દર્શનીયં તટિત્વન્! ॥ ૩૪૧॥

નાનાવર્ણપ્લવગનિવહૈશ્ચાલ્યમાનોચ્ચશાખૈઃ
વૃક્ષૈસ્સૂરિસ્વકૃતજનિભિસ્સેવ્યમાનં સુમૌઘૈઃ ।
વલ્મીકૈશ્ચ વ્રતતિપિહિતૈસ્સર્પનિર્મોકજુષ્ટૈઃ
વ્યાપ્તં પશ્ય પ્રશમિતગતિસ્સાનુદેશં વૃષાદ્રેઃ ॥ ૩૪૨॥

કહ્વાન્મીનગ્રહણનિરતાન્ ધ્યાનિવન્નિશ્ચલાઙ્ગાન્
કાસારાન્તે કુટિલચરણાન્ પશ્ય દીર્ઘાગ્રચઞ્ચૂન્ ।
ક્રોડાન્મુસ્તાખનનકલુષસ્ફીતઘોણાન્મહીધ્ર-
પ્રસ્થે પશ્યન્ જલદ! પુરતો યાહિ મન્દં વિગર્જન્ ॥ ૩૪૩॥

વપ્રક્રીડાકુતુકમહિષોદ્ધૂલિતોદગ્રનાકૂન્
ભલ્લૂકૌઘપ્રકટિતગુહાનચ્છતાહેયભાગાન્ ।
દીર્ઘસ્થૂલૈરજગરગણૈઃ કૃષ્યમાણાગ્રસત્વાન્
ભોગીન્દ્રાદ્રેર્જલદ! પુરતો યાહિ પશ્યન્ પ્રદેશાન્ ॥ ૩૪૪॥

તાક્ષ્ર્યાહીશપ્રમુખદુરિતધ્વંસિપુણ્યાચ્છતીર્થાન્
પ્રાલેયાભપ્રતિભૃગુતટસ્રાવિનીરપ્રવાહાન્ ।
નાનાવૃક્ષપ્રચુરફલભુક્પક્ષિરાવાભિરામાન્
ભોગીન્દ્રાદ્રેર્જલદ! પુરતો યાહિ પશ્યન્ પ્રદેશાન્ ॥ ૩૪૫॥

વૈકુણ્ઠપ્રાપ્ત્યભિમુખસમારોહનિશ્રેણિતુલ્યા
સોપાનાલિર્નયનયુગલં ચેતનાનાં ધિનોતિ ।

યા શેષસ્ય પ્રતતજઠરસ્થાનરેખાલિકલ્પા
દ્રષ્ટવ્યા શ્રીજલદ! ભવતાપ્યદ્ભુતા દૂરતો હિ ॥ ૩૪૬॥

એવં પશ્યન્ દિવિ શિખરિણઃ ષડ્વ્યતીત્યાથ મન્દં
દિવ્યં ગોત્રં જલદ! વિનયાત્ સપ્તમં યાહિ ભક્ત્યા ।
કિં વા બ્રૂયાં નિરવધિમહાવૈભવં તત્ર વિષ્ણોઃ
ગત્વા પશ્યન્સફલય દૃશૌ સાવધાનં ક્રમેણ ॥ ૩૪૭॥

યાતાયાતપ્રસૃતજનતાદુષ્પ્રવેશાગ્રભાગં (માર્ગં)
નાનાવસ્તુપ્રચુરવિપણિધ્વાનનિર્ભિણ્ણકર્ણમ્ ।
સદ્યઃ ક્ષૌરપ્રકટજનતાસ્નિગ્ધનિર્લોમમુણ્ડં
શેષાદ્રેર્દૃક્પ્રથમવિષયં પશ્ય બાહ્યં પ્રદેશમ્ ॥ ૩૪૮॥

અગ્રે સ્તોકં વ્રજસિ યદિ તે દૃક્પથપ્રાપ્યશૃઙ્ગં
તાલોત્તુઙ્ગં વિવિધવિલસત્પુત્રિકાચિત્રિતાઙ્ગમ્ ।
સૌવર્ણાઞ્ચત્કલશશિખરં ગોપુરં દૃશ્યતેઽક્ષ્ણા
પેયં દૃષ્ટ્વા સુઘટિતકરો મોદસે વિસ્મિતસ્ત્વમ્ ॥ ૩૪૯॥

શ્વભ્રે દિવ્યં લસતિ વિતતં મન્દિરં સુન્દરાઙ્ગં
નિત્યં નાનાજનપદજનૈઃ પૂર્યતે યત્તુ ભક્તૈઃ ।
ભક્તાનીતૈર્દ્રવિણકનકૈઃ વસ્ત્રરત્નૈશ્ચ યસ્મિન્
કોશો ભક્ત્યા જલદ! ભવતા દર્શનીયં તદારાત્ ॥ ૩૫૦॥

તાર્ક્ષ્યસ્તમ્ભં કનકપિહિતં તાલતુઙ્ગં પુરસ્તાત્
કર્પૂરૌઘજ્વલનમલિનસ્ફીતપાષાણપીઠમ્ ।
પશ્યન્નગ્રે વિરચિતનતિર્દક્ષિણેનાથ ગચ્છન્
માલ્યાગારં ઘુસૃણદૃષદં વીક્ષ્ય મન્દં પ્રયાહિ ॥ ૩૫૧॥

વામે પાર્શ્વે કનકરુચિરાચિત્રિતાઙ્ગે વિમાને
દીપ્રાભં ત્વં રવિકિરણતઃ પશ્ય તં વેઙ્કટેશમ્ ।
સ્થિત્વા સ્તોકં યતિપતિવરં જ્ઞાનમુદ્રાભિરામં
તં સાષ્ટાઙ્ગપ્રણતિ વિનયાત્પશ્ય તત્તીર્થપાયી ॥ ૩૫૨॥

ઘણ્ટાઘોષઃ પ્રસરતિ યદા ભોજ્યપીઠસ્થિતં તં
જાનીહિ ત્વં જલધર! તદાભ્યન્તરં તસ્ય મા ગાઃ ।
યાવદ્ ઘણ્ટાનિનદ વિરતિસ્તાવદેકત્ર ભક્ત્યા
દ્વારસ્થાનામનુમતિમહં પાલયંસ્તિષ્ઠ દૂરે ॥ ૩૫૩॥

ભક્તૌઘાનામહમહમિકાસમ્ભ્રમામર્દભાક્ત્વં
મા ભૂઃ કચ્ચિદ્ભગવદુપસાન્નિધ્યકૈઙ્કર્યભાજમ્ ।
આશ્રિત્યારાત્પ્રવિશ ન તથા ચેત્સદા ભક્તસઙ્ઘૈઃ
યુક્તશ્શ્રીમાન્ લસતિ ન રહો વક્તુમેવાવકાશઃ ॥ ૩૫૪॥

બાહ્યે દ્વારે જયવિજયયોઃ દર્શનં પ્રાપ્ય પૂર્વં
તત્રત્યસ્સન્ વૃષગિરિપતિં પશ્ય પશ્ચાદુદગ્રમ્ ।
દીપજ્વાલાકબલિતતમોગર્ભગેહે સ્થિતો યઃ
શ્રીમાનૂષ્મપ્રસરણકનદ્દિવ્યદેહો યથેન્દુઃ ॥ ૩૫૫॥

અન્તર્યાતો વિનયવિનતો દેહલીં ગર્ભધામ્નઃ
પ્રાપ્ય શ્રીમન્ વૃષગિરિપતેર્વીક્ષ્ય મન્દસ્મિતાસ્યમ્ ।
મુગ્ધો મા ભૂસ્સ્મરણવિકલસ્સ્તબ્ધગાત્રો યતસ્ત્વં
મદ્વાર્તાં તચ્છ્રવણપથગાં પ્રેષિતઃ કર્તુમેવ ॥ ૩૫૬॥

કારુણ્યૈકપ્રવણહૃદયો યદ્યપિ શ્રીનિવાસઃ
વિસ્રમ્ભાર્હો ન ભવતિ તથાપ્યત્ર યદ્વઞ્ચકસ્સઃ ।
સૌન્દર્યેણ શ્રિતજનમનસ્સમ્પ્રતાર્ય સ્વકાર્યં
કર્તું શક્તો બલિમિવ પુરા વામનો વામમૂર્તિઃ ॥ ૩૫૭॥

વક્ષઃપીઠીનિલયકમલાવીક્ષણૈકાભિકાઙ્ક્ષી
તિષ્ઠામ્યેકો ગિરિતટગતો હન્ત! તેઽત્રાપિ ભક્તાઃ ।
આયાન્તીતિ સ્મિતવદનભાક્ નિશ્ચલાત્મા સ્થિતઃ કિં
પૃચ્છૈવં તં સ તુ કિમથવા મૌનમુદ્રાં લભેત ॥ ૩૫૮॥

એકાકી ન ક્ષણમપિ રહસ્યાસ્થિતઃ શ્રાન્તિશાન્ત્યૈ
ભક્તૌઘાનાં શ્રમપરિહૃતૌ દત્તદૃષ્ટિસ્થિતસ્સઃ ।
તન્મધ્યે ત્વં કથમપિ ચિરં પાલયન્ કાલમીષત્
લબ્ધ્વા બ્રૂહિ પ્રથમમમિતપ્રાર્થનાસમ્મુખીનમ્ ॥ ૩૫૯॥

હે! નાથ! ત્વાં નિરવધિગુણં નિત્યકારુણ્યમૂર્તિં
મત્વા મુગ્ધા શ્રુતિશુભગિરા પ્રોક્તયા પણ્ડિતૈસ્તૈઃ ।
ત્યક્તાહારા વ્રતનિયમતઃ ક્લેશયન્તી શરીરં
નિર્નિદ્રૈકા ત્વદુપગમને વર્તતે દત્તદૃષ્ટિઃ ॥ ૩૬૦॥

શ્રુત્વા વૃત્તં ભવતિ કુતુકી શ્રોતુકામઃ પુનસ્તત્

યસ્માત્સોઽયં નિરવધિદયશ્ચાર્તવૃત્તાન્તતાન્તઃ ।
તસ્મિન્ કાલે મમ તુ વિષયં શ્રાવય શ્રોત્રભવ્યં
પ્રાપ્તં કાલં વિફલય કદાપ્યન્યવૃત્તેન મૈવ ॥ ૩૬૧॥

સન્તપ્તાનાં શ્રમહરણવિત્પ્રાણિનાં જીવનાત્મા
સૃષ્ટશ્ચાહં સમભવમહં યત્પ્રસન્નામ્મયોઽસ્મિ ।
ત્વદ્ભક્તાયાસ્તવ પદકૃતે સન્તતં ચિન્તયન્ત્યાઃ
દૂતોઽસ્મીતિ સ્વકપરિચયં ત્વં સમાવેદયાદૌ ॥ ૩૬૨॥

આશાપાશગ્રથિતહૃદયા પ્રાકૃતં વસ્તુ ભોગ્યં
મન્વાનેચ્છાવિષયવિચયે બદ્ધદીક્ષા મૃગાક્ષી! ।
મન્દમ્મન્દં વિષયવિદુષાં તત્વવાણીં નિશમ્ય
પ્રત્યાદિષ્ટપ્રબલવિષયા દીનદીનાસ્તિ કાપિ ॥ ૩૬૩॥

આદાવેવં જલદ! વિનયાત્ સ્તોકમાવેદય પ્રાક્
પશ્ચાત્તત્તત્સમયવદનં કીદૃશં બ્રૂહિ વીક્ષ્ય ।
સાકલ્યેન પ્રયતનપરસ્તત્પુરો મદ્દશાં ત્વં
શ્રીમાન્ હર્ષાચ્છ્રવણકુતુકી સ્યાદ્યથા તેઽપિ વાણ્યાઃ ॥ ૩૬૪॥

ગચ્છત્યેષા તવ ભજનકાન્વેષણાસક્તચિત્તા
ભક્તાનામપ્યુપવિશતિ સા મધ્યમેત્યાશ્રુનેત્રી! ।
તાલાસક્તસ્વકરયુગલી ગાયતિ ધ્યાનમન્દં
હે! શ્રીશેતિ પ્રલપતિ સદા પાહિ તાં તત્કૃપાલો ॥ ૩૬૫॥

માત્રહૂતા પિહિતવદના બાષ્પપૂરાવિલાક્ષી
મૂકૈવૈકા નિજગૃહકગા હસ્તવિન્યસ્તગણ્ડા ।
ધ્યાનસ્તબ્ધા પરિહૃતનિજસ્નાનપાનાદિકાર્યા
હે! કૃષ્ણેતિ ક્ષણરચિતનિશ્વાસસુવ્યક્તચિન્તા ॥ ૩૬૬॥

ઉન્મત્તેવ પ્રહસતિ કદાપ્યશ્રુદિગ્ધાચ્છગણ્ડા
નાકે દૃષ્ટી ક્ષિપતિ વિતતે નિર્નિમેષે મૃગાક્ષી! ।
આહૂયારાત્પથિપથિ ભવન્નામ ભિક્ષામટન્તં
વ્યાહૃત્યોચ્ચૈઃ કમપિ ભવતો રૂપમાપૃચ્છતીયમ્ ॥ ૩૬૭॥

ઇન્દુજ્યોત્સ્નામુપવનગતાં વૃક્ષગુલ્માળિદૃશ્યાં
દર્શન્દર્શં સ્મૃતિપથસમાયાતયુષ્મત્પ્રભાવા ।
ત્વત્સાન્નિધ્યં શ્રમપરિહરં કાઙ્ક્ષતે દિક્ષુ ચક્ષુઃ

પ્રક્ષિપ્ય ક્વેત્યવનતમુખી રોદિતિ પ્રાપ્તમૌના ॥ ૩૬૮॥

આવિર્ભૂતે તુહિનકિરણે ત્વન્મુખં સા સ્મરન્તી
સમ્પ્રાપ્તોऽયં ગગનતટતો મત્સકાશં મુરારિઃ ।
ઇત્યેવં દ્રાક્ પ્રકટિતમનસ્સમ્ભ્રમા ત્વામદૃષ્ટ્વા
તાન્તસ્વાન્તા પ્રલપતિ કરે સ્વં કપોલં નિધાય ॥ ૩૬૯॥

આયાતાંસ્ત્વત્પદસરસિજન્યસ્તચિત્તાન્ દ્વિજાગ્ર્યાન્
આરાધ્ય પ્રાગથ તવ ગુણાન્ શૃણ્વતી તન્મુખેભ્યઃ ।
રોમાશ્લિષ્ટા રચિતમનના પૃચ્છતિ પ્રાઞ્જલિસ્તાન્
લભ્યેતાયં કથમિતિ મુહુર્દૈન્યતસ્સા મૃગાક્ષી ॥ ૩૭૦॥

સૌરભ્યાઢ્યા ગ્રથિતકુસુમસ્રગ્ભવદ્દર્શનાર્થં
વિન્યસ્તા સા સુતનુતનુવદ્ ગ્લાનિમેત્યાસ્ત્યવર્ણા ।
સ્વીકૃત્યૈનાં સફલય હરે! તાં સ્વકીયાં પુરા ત્વં
માલાકારં રિપુપરવશં પ્રાપ્ય ખલ્વન્વગૃહ્ણઃ ॥ ૩૭૧॥

નિર્નિદ્રત્વાત્ક્ષિપતિ યુગવદ્યામિનીં કામિની સા
વૈવર્ણ્યેન ગ્લપિતસુષમા તાન્તદૃક્તારકા ચ ।
ત્યક્તાભૂષા ગલિતવલયા કાર્શ્યતઃ ક્ષીણવાણી
ત્વન્નામ્નૈવ શ્વસિતિ નિતરાં ધ્યાનમન્દાશ્રુનેત્રી ॥ ૩૭૨॥

ત્વદ્વક્ત્રાભં કમલમમલે ધારયન્તી કપોલે
સમ્મીલ્યાક્ષિ પ્રસૃતસલિલાપાઙ્ગકોણપ્રણાલી ।
સ્મારં સ્મારં સ્મરપરવશા ભાવનાલબ્ધસઙ્ગા
રોમાશ્લિષ્ટા વિનમિતમુખી મેતિ મેતિ બ્રવીતિ ॥ ૩૭૩॥

વીણામઙ્કે મૃદુલસુભગે શાયયિત્વા મનોજ્ઞાં
અઙ્ગુલ્યગ્રપ્રચલિતગુણાં વીણયન્તી ભવન્તમ્ ।
ધ્યાનશ્રાન્તા શિથિલિતભુજા બાષ્પપૂર્ણાયતાક્ષી
હે! શ્રીશેતિ પ્રતિદિશમસૌ નિશ્વસિત્યક્ષિ કૃત્વા ॥ ૩૭૪॥

યત્ર ક્વાપિ પ્રવિતતગિરિં વીક્ષ્ય સોऽસ્ત્યત્ર ચક્રી-
ત્યેવં ધાવત્યનિભૃતમિયં બન્ધુરુદ્ધાપિ મુગ્ધા ।
ધાવન્ધાવં મૃગયતિ ગુહાકુઞ્જપુઞ્જાદિષુ ત્વાં
અપ્રાપ્યાથ શ્રમશિથિલદૃક્ શ્રીનિવાસેતિ રૌતિ ॥ ૩૭૫॥

ચન્દ્રજ્યોત્સ્નાં રવિકિરણજં સાતપં મન્યમાના
સન્તાપસ્ય પ્રશમનકૃતે પઙ્કજં યાચમાના ।
ત્વત્પાદાભં હૃદિ નયનયોઃ કારયન્તી નિમીલ-
ન્નેત્રામ્ભોજા શ્વસિતિ ધરણૌ પાતિતાત્મપ્રવેષ્ટા ॥ ૩૭૬॥

સર્વસ્વામી ત્વમસિ ખલુ તત્સર્વમધ્યપ્રવિષ્ટા
કિં વા નાસ્મિ પ્રહિણુ કરુણાં મય્યપિ શ્રીનિવાસ! ।
નો ચેદેવં જગતિ ભગવાન્ પક્ષપાતીતિ નિન્દા
શ્રોતવ્યા સ્યાદહહ! ન સહે તાદૃશીં દુર્દશાં તે ॥ ૩૭૭॥

નિત્યા મુક્તા ઇવ તવ ધરાચેતનાસ્સન્તિ શેષાઃ
આગઃપૂર્ણા અપિ સુદયિતાનિર્વિશેષાસ્ત્વદીયાઃ ।
સત્યેવં ત્વં ગણયસિ ન માં વત્સલોઽપિ ત્વદીયાં
દોષાઢ્યેયં ત્વિતિ ન દયસે કિં દયા સા ક્વ યાતા ॥ ૩૭૮॥

એકા નાહં તવ પદયુગે ન્યસ્તભારાસ્મિ લોકે
બ્રહ્મેન્દ્રાદિત્રિદિવવિબુધા દર્શનાકાઙ્ક્ષયા તે ।
સ્વાતન્ત્ર્યેણ ત્વમિહ કરુણાં યત્ર કુત્રાપિ તન્વન્
ક્રીડસ્યમ્ભોરુહનયન! તે વઞ્ચનાં વેત્તિ કો વા ॥ ૩૭૯॥

સૌન્દર્યન્તે ક્વ નુ નિરુપમં વામનત્વં ક્વ વા તત્?
સત્યપ્યેવં ભવદુપયમે લબ્ધસમ્પૂર્ણતર્ષા ।
સઞ્ચિન્ત્યાથ પ્રગુણનિયમં બ્રહ્મચર્યં નિરન્તં
વન્યાં જ્યોત્સ્નામિવ તવ રુચિં મન્યમાનાસ્મિ દીના ॥ ૩૮૦॥

સર્વૈઃ પ્રોક્તં સ દિતિજરિપુર્યોગિનામપ્યગમ્યઃ
તન્મા યત્નં કલય સુભગે! કિં મુધા ક્લિશ્યસીતિ ।
રુદ્ધાપ્યેવં તવ તુ કરુણાં ચિન્તયિત્વા મુરારે!
ત્વત્સેવાયાં નિહિતહૃદયા સન્તતં ચિન્તયામિ ॥ ૩૮૧॥

જાનામ્યાદિં તવ તુ ન તથૈવાન્તમપ્યમ્બુજાક્ષ!
શ્રીમાન્નિત્યં તરુણ ઇતિ ચ પ્રાહુરામ્નાયિનસ્ત્વામ્ ।
સત્યપ્યેવં શ્રિતજનકૃતે લબ્ધજન્માસિ લોકે
કાઙ્ક્ષે તસ્માચ્છ્રયણસુલભં વલ્લભં ત્વાં મુકુન્દ ॥ ૩૮૨॥

કાલિન્દીં તાં નિજતનુરુચા વર્ધિતાનીલવર્ણાં
તન્વન્ ગોપીગણપરિવૃતસ્તોયકેલિં વ્યતાનીઃ ।

નાહં કિં વા વ્રજયુવતિવદ્વલ્લભા તે મુરારે
તસ્મિન્ કાલે ન હિ સમભવં કાપિ ગોપી વ્રજેઽહમ્ ॥ ૩૮૩॥

દૃષ્ટ્વૈવ ત્વાં પ્રતિદિશમસાવક્ષિવિક્ષેપહૃષ્ટા
ક્વાપ્યન્તર્ધિં ગત ઇતિ તતો રોદનક્લિન્નનેત્રી ।
ક્વાસિ શ્રીશેત્યસકૃદબલા માર્ગણાસક્તચિત્તા
ત્વામપ્રાપ્ય ગ્લપિતહૃદયા મૂર્છિતા સા કદાપિ ॥ ૩૮૪॥

પ્રાપય્યૈનાં મનુજતનુમપ્યાત્મનો જ્ઞાનદાયી
સદ્વંશશ્રીપ્રવિતરણતસ્સદ્વચઃ શ્રાવયન્ યઃ ।
ચક્રે સાહ્યં તમહિશિખરિસ્વામિનં શ્રીશમેનં
ત્યક્ત્વા નાન્યં પ્રકૃતિવશગં ક્વાપિ મર્ત્યં ભજામિ ॥ ૩૮૫॥

સંવર્તે સ્વે જઠરકુહરે પ્રાણિનઃ પાલયન્ યઃ
બાલો ભૂત્વા તતવટદલે વારિપૂરે શયાનઃ ।
તેષાં સૃષ્ટિં તદનુ વિદધત્ ક્રીડનાર્થં રરાજ
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૮૬॥

સીતામેકાં નિજસુદયિતાં રાઘવો મન્યમાનો
નારીમન્યાં ન ખલુ મનસાપ્યેકદાપ્યસ્મરદ્યઃ ।
તાદૃઙ્ નિષ્ઠાનિરતમમરસ્તૂયમાનાઙ્ઘ્રિપદ્મં
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૮૭॥

સાક્ષાત્કર્તું કથમપિ હૃદા શક્યતે નિર્મલેન
ત્વઙ્ નેત્રેણ પ્રથિતવિભવો નૈવ સન્દૃશ્યતે યઃ ।
અર્ચારૂપપ્રકટિતતનું સર્વદૃશ્યં કૃપાલું
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૮૮॥

ન્યસ્તં દ્વારે પદશુચિકૃતે શોધિતં પૂર્ણકુમ્ભં
મન્વાનો યો વિનિહિતમિદં મહ્યમિત્યમ્બુજાક્ષઃ ।
અઙ્ગીચક્રે પરમકરુણાપૂરિતાત્મા રિપાવ-
પ્યેવં ત્યક્ત્વા તમિહ કમહં મર્ત્યમન્યં ભજામિ ॥ ૩૮૯॥

શૈવે ચાપે ભરણદલિતે જાનકીમાલભારી
તત્પાણ્યબ્જે નિજકરવરગ્રાહિણિ પ્રીયમાણઃ ।
શ્રીશ! ત્વં યઃ પ્રિયવરગુણો દર્શયન્માનુષોઽપિ
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૯૦॥

ક્ષીબક્ષાત્રપ્રશમનરતસ્ફીતચઞ્ચત્કુઠારં
ક્રૂરાકારદ્વિગુણિતધરાપાલકસ્વાન્તકમ્પમ્ ।
સીતાવીક્ષાદ્વિગુણિતબલો ભાર્ગવં ભગ્નશક્તિં
યશ્ચક્રે શ્રીવૃષગિરિપતિં તં વિના કં ભજામિ ॥ ૩૯૧॥

ગ્રાહગ્રસ્તં ગજપરિબૃઢં ત્રાતુકામઃ ક્ષણાદ્યઃ
તાર્ક્ષ્યારૂઢઃ પરમપદતો વેગવાંશ્ચક્રધારી ।
હત્વા નક્રં ગજકરસુમાદાનતોઽમોદયત્તં
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૯૨॥

નાનાકાઙ્ક્ષાશશધરકલાવર્ધિતાઘોર્મિપઙ્ક્તેઃ
સ્વાન્તામ્ભોધેઃ પ્રશમનપટુર્બાડવો યત્કૃપા મે ।
દીનાનાથા પરમપુરુષં ભક્તરક્ષાત્તદીક્ષં
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૯૩॥

વેદાન્તેષુ પ્રથિતવિભવા વિશ્રુતાસ્સદ્ગુણા યે
તે સર્વેઽપિ શ્રવણસુભગાઃ કીર્તનીયાશ્ચ ભક્તૈઃ ।
સત્યપ્યેવં મયિ તુ કરુણા યસ્ય સાભ્યર્હિતશ્રીઃ ।
ત્યક્ત્વા તં શ્રીવૃષગિરિપતિં મર્ત્યમન્યં ન સેવે ॥ ૩૯૪॥

માત્રા નિષિદ્ધમતિરપ્યનિશં ત્વદીય-
દિવ્યાભિરામગુણસંસ્મરણૈકચિત્તા ।
ત્વન્નામકીર્તનપરા ત્વદધીનદેહા
માત્રે નિવેદિતવતી નિજભાવમેવમ્ ॥ ૩૯૫॥

એવં નિવેદય કનત્કમનીયવિદ્યુ-
ત્કાન્તામ્બુભૃદ્ ભગવતે ભુજગાદ્રિનેત્રે ।
સોઽપિ સ્મિતપ્રકટિતાત્મહૃદાશયસ્ત્વાં
સમ્પ્રેષયિષ્યતિ પુનશ્ચ નિવર્તનાય ॥ ૩૯૬॥

મા તિષ્ઠ તદ્ગુણવિભાવનયા નભોગ્રે
તત્રાપિ તત્પરમકારુણિકત્વસક્તઃ ।
જીમૂત! તન્મધુરવિગ્રહકાન્તિકૃષ્ટો
નિષ્ઠસ્સ્વકર્મણિ સ્યાદુપયાહિ માં ત્વમ્ ॥ ૩૯૭॥

યાવત્ત્વદાગમનમત્ર તદીયદિવ્ય-

કારુણ્યનીરધિપરિપ્લવમાનદેહા ।
તાવચ્ચ તદ્ગુણરસાયનપાનધન્યા
જીવામિ જીવનદ! તત્પદચિન્તનેન ॥ ૩૯૮॥

મા વિસ્મર પ્રતિનિવર્તનસમ્ભ્રમેણ
તત્પાદપદ્મતુલસીં સમુપાહર ત્વમ્ ।
આશ્વાસયત્યુપગતાભ્ર! સખીવ યા માં
સૌરભ્યમાત્રવિનિવારિતસર્વતાપા ॥ ૩૯૯॥

ગચ્છ જીમૂત! ભદ્રં તે
ધન્યો દ્રક્ષ્યસિ મત્પ્રિયમ્ ।
સુખસ્પર્શાનુકૂલાશ્ચ
સન્તુ તે પથિ મારુતાઃ ॥ ૪૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
ચતુર્થશતકમ્ સમ્પૂર્ણમ્ ।

## ૫. પઞ્ચમશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમદ્વેદાન્તદેશિકાય નમઃ ।
અથ દયાસહસ્રે પઞ્ચમશતકમ્ ।

મત્સ્યાદિરૂપમપિ સહ્યમિહાચ્યુતસ્ય
માતર્દયે! મનુજતાં ન કદાપિ દદ્યાઃ ।
યસ્માદનન્તશુભદિવ્યગુણાકરોઽપિ
ક્લેશાનુભૂતિલઘુતામભજન્નરત્વે ॥ ૪૦૧॥

કિં વા સુખં ભગવતોઽપિ નરત્વભાજઃ
કર્માભિલેપવિમુખસ્ય ગુણાકરસ્ય ।
માતર્દયે! કિમુચિતં તદવેક્ષણં તે
હન્તાથવા તનુભૃદાર્તિહરાર્થમેવમ્ ॥ ૪૦૨॥

શક્રાય રાજ્યપરિદાપનબદ્ધદીક્ષા

સર્વેશ્વરં પટુવટું પરિકલ્પ્ય કુબ્જં! ।
ઘોરે તપસ્યપિ રતં વિપિને વ્યતાનીઃ
માતર્દયે કિમુચિતં તદિદં શ્રિતાર્થમ્ ॥ ૪૦૩॥

દૈત્યાભિયાતિમપિ ભક્તવશં મુકુન્દં
યાચ્ઞાપ્રસારિતકરં વ્યતનોરજસ્રં! ।
ભક્તાગ્રગણ્યબલિદેહલિપાલકં તં
માતર્દયે! કિમુચિતં તદિદં શ્રિતાર્થમ્ ॥ ૪૦૪॥

હસ્તે વિધાય પરશું ભુવનભ્રમેણ
ત્રિસ્સપ્તકૃત્વ ઇહ રુટ્ ક્ષુભિતાસ્રવેગં! ।
ક્ષીબક્ષિતીશપરિકૃન્તનલબ્ધશાન્તિં
માતર્દયે! કૃતવતી કિમિદન્તુ યુક્તમ્ ॥ ૪૦૫॥

નિત્યાનપાયિકમલાપતિમમ્બુજાક્ષં
સૂર્યાન્વવાયભવપઙ્ક્તિરથાત્મજાતં! ।
માતર્દયે! ભુવિ વિધાય બુધાવનાર્થં
ક્લેશાકરં તમકરોઃ કિમિદન્તુ યુક્તમ્ ॥ ૪૦૬॥

રાજીવલોચનમમું મુનિકૌશિકસ્ય
યાગાભિરક્ષણકૃતે વિનિયોજ્ય બાલ્યે ।
કાન્તારચઙ્ક્રમણપીડિતપાદપદ્મં
માતર્દયે! સમતનોઃ કિમિદં શ્રિતાર્થમ્ ॥ ૪૦૭॥

જારેન્દ્રસઙ્ગ કુપિતપ્રિયગૌતમાત્ત-
શાપપ્રભાવધૃતવન્યશિલાસ્વરૂપામ્ ।
રામાઙ્ઘ્રિપૂતતનુમાતનુષે સ્મ યોષાં
માતર્દયે! ત્વમસિ સર્વજનાભિવન્દ્યા ॥ ૪૦૮॥

લોકત્રયૈકગુરુમપ્યટવીકુટીરં
શિષ્યં મુનેસ્તમુપકલ્પ્ય તદાર્જિતાસ્ત્રં! ।
ભાવ્યાજિકર્મપરિનિષ્ઠિતમાતનોસ્તત્
માતર્દયે! ત્વમસિ સર્વજનાભિવન્દ્યા ॥ ૪૦૯॥

નિત્યાનપાયિદયિતાકરપીડનેઽપિ
શૌર્યાભિવીક્ષણમપેક્ષિતમત્ર હન્ત! ।
માતર્દયે! ભુવિ જગત્ત્રયમઙ્ગળાય

સીતારઘૂદ્વહવિવાહમકલ્પયો હિ ॥ ૪૧૦॥

ભક્તાવનૈકનિરતા રઘુવીરપટ્ટ
બન્ધેઽપિ નાનુમતિદાસિ વિચિત્રમેતત્! ।
તસ્યાન્તરાયમુપકલ્પ્ય વનાય રામં
તં પ્રાહિણોર્નનુ દયે! કિમિદં શ્રિતાર્થમ્ ॥ ૪૧૧॥

લોકવ્યથાશમનકારણમાત્મતુલ્યાં
સીતાં વિચિન્ત્ય વનવાસકૃતે પ્રચોદ્ય ।
તામપ્યહો! કુસુમકોમલભવ્યગાત્રીં
ત્વં પ્રાહિણોર્નનુ દયે! કિમિદં શ્રિતાર્થમ્ ॥ ૪૧૨॥

શ્રીરામસદ્ગુણનિબદ્ધમિવાનુકૃષ્ટં
નિષ્ઠં ગુરૂપસદને નનુ લક્ષ્મણં ચ ।
ભાવીન્દ્રજિદ્વધકૃદિત્યહિનો હિ સાકં
માતર્દયે! ત્વમસિ સંસ્મરણીયકીર્તિઃ ॥ ૪૧૩॥

ત્વં સર્વથા ભુવનરક્ષણતત્પરા તં
સર્વેશ્વરં સપરિવારમરાતિનાશે ।
સંયોજયસ્યનવલોકિતતત્પરત્વા
માતર્દયે! કિમુચિતં તદિદં ભવત્યાઃ ॥ ૪૧૪॥

પીતામ્બરં કઠિનવલ્કલધારિણં તં
દિવ્યાશ્મદીપ્રમકુટઞ્ચ જટાકિરીટમ્ ।
પઞ્ચાયુધં પિટકદીર્ઘખનિત્રપાણિં
દ્રષ્ટું કથં નનુ દયે! ત્વમસિ પ્રગલ્ભા ॥ ૪૧૫॥

તાં જાનકીમપિ વનાભિમુખીમસૂર્ય-
પશ્યાં સમસ્તજનલોચનપીયમાનામ્ ।
ચણ્ડાતપશ્લથશિરીષસુમાભકાન્તિં
માતર્દયે! કૃતવતી કિમિદં શ્રિતાર્થમ્ ॥ ૪૧૬॥

આત્માનુયાયિજનબૃન્દમમન્દભક્તિ-
ભારં પ્રતાર્ય નિશિ વિષ્ણુપદીતટીસ્થે ।
તુઙ્ગેઙ્ગુદીતરુતલે સુગુહાભિવીક્ષ્યં
સીતાપતિં સમતનોઃ કરુણે! કિમેતત્ ॥ ૪૧૭॥

ભોગીન્દ્રભોગશયનીયશયાલુમેનં
લક્ષ્મ્યા કથં નનુ દયે! વિપિને નિશીથે ।
બાહૂપધાનમુરુકણ્ટકપર્ણતલ્પે
સુપ્તં તમીક્ષિતુમપેક્ષિતવત્યહો! ધિક્ ॥ ૪૧૮॥

સ્યાદેતદમ્બ! તનુભૃજ્જનનીં પ્રતીક્ષ્યાં
વાત્સલ્યપૂર્ણહૃદયાં પતિદેવતાં તામ્ ।
સીતામહો! ક્ષિતિતલે વિપિને શયાનાં
દ્રષ્ટું કથં નનુ દયે! ત્વમભૂસ્સમર્થા ॥ ૪૧૯॥

સંસારસિન્ધુપરિતારણદક્ષમેનં
ગઙ્ગાન્તુ ભઙ્ગુરતરઙ્ગસુમઙ્ગલાઙ્ગીમ્ ।
રામં ગુહેન બત! તારયસિ સ્મ માતઃ!
દ્રોણ્યા દયે! તવ હિ દાક્ષ્યમચિન્ત્યવૃત્તમ્ ॥ ૪૨૦॥

વૈકુણ્ઠધામ્નિ કૃતનિત્યશુભંયુવાસં
યોગીન્દ્રશુદ્ધહૃદયામ્બુજભવ્યપીઠમ્ ।
સૌમિત્રિણા વિરચિતે વનપર્ણગેહે
તં વાસયસ્યયિ દયે! સ્મ કિમેતદમ્બ ॥ ૪૨૧॥

ધર્માત્મકં ત્રિભુવનૈકગુરું પ્રમીત-
તાતાર્થમત્ર વિહિતાર્તિનિવાપકૃત્યમ્ ।
સ્રોતસ્વિનીસ્નપનશુદ્ધમજસ્રશુદ્ધં
માતર્દયે! કૃતવતી સ્વવશં મુકુન્દમ્ ॥ ૪૨૨॥

ભક્તાય મુક્તવરરાજ્યભરાય દૈન્ય-
સમ્પ્રાર્થિતાગ્રજપુરાભિનિવર્તનાય ।
પાદૂકિરીટમુપદાપિતવત્યમોઘં
માતર્દયેઽસિ ભરતાય જનાવનાર્થમ્ ॥ ૪૨૩॥

સીતાકુચારચિતચઞ્ચુકરાલચેષ્ટં
ભીત્યા હતં ત્રિભુવનભ્રમણાતિખિન્નમ્ ।
માતર્દયે! રઘુપતેઃ પ્રથિતાસ્ત્રતોઽપિ
કાકાસુરં બત! રરક્ષિથ કિં બ્રવીમિ ॥ ૪૨૪॥

સૌમિત્રિસેવિતપદં જનકાત્મજાત-
મોદં વસન્તમપિ મઞ્જુલચિત્રકૂટે ।

ભાવ્યર્થકણ્ટકતયા પરિચિન્ત્ય રામં
તં પ્રાહિણોર્નનુ દયે! વિપિનં કિમેતત્ ॥ ૪૨૫॥

મત્તેભચઙ્ક્રમણમમ્બુરુહાયતાક્ષં
નીલામ્બુદાભમુરગાધિપભોગબાહુમ્ ।
રામં કિરાતગણલોચનગોચરં તં
કિં વૈતદમ્બ! કરુણે! કૃતવત્યહેતુ ॥ ૪૨૬॥

નાનાતરૂલપલતાસરસીસ્રવન્તી-
તુઙ્ગાદ્રિમઞ્જુલપતત્રિમનોહરં તમ્ ।
વ્યાઘ્રાદિઘોરતરસત્ત્વભયાનકઞ્ચ
પ્રાવેશયો હિ કરુણે! વનમાશ્રિતાર્થમ્ ॥ ૪૨૭॥

સીતાં વિરાધકરપઞ્જરવેપમાનાં
સમ્મોચ્ય ખડ્ગવિનિપાતિતબાહુમૂલમ્ ।
તં કોણપં રઘુવરેણ નિપાત્ય ગર્તે
માતર્દયે! મુનિજનાનવનાવરક્ષઃ ॥ ૪૨૮॥

શ્રીરામદર્શનમનુપ્રતિપાલયન્તં
દીપ્રં દયે! સુતપસં શરભઙ્ગમમ્બ! ।
વૈશ્વાનરાહુતતનું સમનીનયો હિ
દિવ્યં પદં રઘુપતીક્ષણધન્યધન્યમ્ ॥ ૪૨૯॥

વાચંયમૈસ્સમુપદર્શિતપર્ણશાલાઃ
પશ્યન્તમમ્બુજદૃશં સહ સીતયા તમ્ ।
કાન્તારવર્ત્મનિ સુતીક્ષ્ણતપોધનાય
પ્રાદર્શયસ્સુપતસાં ફલરૂપમમ્બ ॥ ૪૩૦॥

પશ્યાત્ર રામ! પિશિતાશનભક્ષિતાનાં
કીર્ણાઙ્ગકીકસગણં ભુવિ તાપસાનામ્ ।
ઇત્યાર્તતાપસગિરં નનુ શ ૃણ્વતોઽસ્ય
માતર્દયે! નયનયોરુદપાદયોઽશ્રુ ॥ ૪૩૧॥

નિષ્કારણં વિપિનગાન્ પિશિતાશનાંસ્તાન્
મા પીડયેતિ જનકાત્મજયા ધનુષ્માન્ ।
સંસ્મારિતો રઘુવરોઽપિ સ ધર્મવેત્તા
સીતાત્મિકા ખલુ જગજ્જનની દયે! ત્વમ્ ॥ ૪૩૨॥

તસ્માદગસ્ત્યમુનિપુઙ્ગવપર્ણશાલાં
કેકાવલૈણગણમઞ્જુતરૂલપાઢ્યામ્ ।
તન્માનસાભિલષિતાર્થસુપૂરણાર્થં
પ્રાવેશયો હિ કરુણે! રઘુપુઙ્ગવં તમ્ ॥ ૪૩૩॥

આતિથ્યમાશ્રમપદે મુનિના કૃતં તત્
સ્વીકાર્યકાર્યકરણે કરુણે પ્રગલ્ભા ।
સૌમિત્રિણા દયિતયા સહ રામમેનં
સન્તોષ્ય તચ્ચિરતૃષં સમપૂરયો હિ ॥ ૪૩૪॥

અભ્યર્થિતો મુનિવરેણ તદાજ્ઞયૈવ
કારુણ્યકાર્યકરણાય તપોધનેષુ ।
સીતાપતિર્નિજસહોદરનિર્મિતે શ્રી-
રમ્યોટજે ન્યવસદાયતપઞ્ચવટ્યામ્ ॥ ૪૩૫॥

સૌમિત્રિણોક્તનિજમધ્યમમાતૃદોષ-
માકર્ણ્ય કર્ણપરુષં તદપોહનાય ।
રામેણ સાધુ તદનલ્પગુણપ્રશંસાં
તત્સ્વાન્તવર્તિનિ દયે! ત્વમકારયો હિ ॥ ૪૩૬॥

કલ્યે હિમાતિશિશિરે સરયૂપ્રવાહે
મજ્જન્તમાત્મકૃતમત્સ્મરણં કૃશાઙ્ગમ્ ।
ચીરામ્બરં ધૃતજટં ભરતં વિચિન્ત્ય
વિદ્રાવિતો રઘુપતિઃ કરુણે! ત્વયા હિ ॥ ૪૩૭॥

જ્ઞાત્વાપિ રામ! પિશિતાશનઘોરચિત્તં
કામાભિતપ્તસૃતશૂર્પણખાસ્રપાયૈ ।
ઉક્ત્વા સ્વવૃત્તમખિલં પરિહાસ્યચુઞ્ચુઃ
તાં નાકરોઃ કરુણયા હિ ગતાસુમેનામ્ ॥ ૪૩૮॥

એકાકિના બત! હતાઃ ખરદૂષણાદ્યાઃ
રક્ષોગણા રણશિરસ્યતિદારુણા હિ ।
હે રામ! તાપસગણે નિહિતા કૃપેદૃક્-
કાર્યે પ્રવર્તયતિ નાથમમું ભવન્તમ્ ॥ ૪૩૯॥

યુદ્ધે જયી પ્રતિનિવૃત્ય કુટીરભાજા

શ્રીસીતયા દૃઢતરં પરિરબ્ધગાત્રઃ ।
ધ્વસ્તવ્રણો રઘુપતે! વિગતશ્રમોઽસિ
યજ્જાનકી તનુમતી કરુણા ત્વદીયા ॥ ૪૪૦॥

તં વઞ્ચનાપરિગૃહીતકુરઙ્ગરૂપં
મારીચનીચમભિલષ્ય તદાપ્તિકૃત્યે ।
સીતામુખાદ્રઘુપતિં સમયૂયુજો હિ
માતર્દયે! મુનિગણાવનદત્તદૃષ્ટિઃ ॥ ૪૪૧॥

રક્ષૈકતાનમપિ લક્ષ્મણમાત્તચાપં
દૂરં વિયોજ્ય રઘુપુઙ્ગવધર્મપત્નીમ્ ।
પૌલસ્ત્યનીચવશગાં ત્વમકારયો હિ
માતર્દયે! ત્રિભુવનાવૃતદુઃખશાન્ત્યૈ ॥ ૪૪૨॥

ગ્રાવદ્રવીકરણદક્ષનિતાન્તશોક-
સન્તપ્તમાત્મદયિતાવિરહાતિતાન્તમ્ ।
રામં ગભીરહૃદયં ત્વમરોદયો હિ
માતર્દયે! કિમુચિતં શ્રિતરક્ષણાર્થમ્ ॥ ૪૪૩॥

માતર્દયે! કુણપઘસ્મરગૃધ્રનેત્રે
લોકં દુરાપમપિ પઙ્ક્તિરથેન તેન ।
પ્રાદાપયો હિ રઘુપુઙ્ગવતો મુનીન્દ્ર-
પ્રાર્થ્યં શ્રિતેષુ તનુમત્સુ નિરઙ્કુશાસિ ॥ ૪૪૪॥

ઉન્મત્તવદ્વનતટે ચરતે દયે! ત્વં
સઞ્જીર્ણયા રઘુપતીક્ષણકાઙ્ક્ષયૈવ ।
સ્વાદૂનિ કાનનફલાન્યનુપાલયન્ત્યા
પ્રાદાપયો રઘુવરાય મુદા શબર્યા ॥ ૪૪૫॥

રામં ત્વમન્તુબલિવાલિનિષૂદનાય
માતર્દયે! તરુતિરોહિતમાકલય્ય ।
ભાવ્યર્થચિન્તનપરા જગદાર્તિહન્ત્રી
પ્રાચોદયો હિ કિમિદં તવ યુક્તરૂપમ્ ॥ ૪૪૬॥

સુગ્રીવસખ્યમિષતઃ પુરુષોત્તમં તં
શાખામૃગૈર્બહુવિધૈઃ પરિવાર્યમાણમ્ ।
માતર્દયે! રઘુપતિં કૃતવત્યહો! ત્વં

નાવેક્ષસે તરતમત્વમિહાશ્રિતાર્થમ્ ॥ ૪૪૭॥

હે રામ! તે ક્ષિતિતલે કરુણાકટાક્ષ-
પાત્રન્તુ યો ભવતિ સ પ્રથિતપ્રભાવઃ ।
વિખ્યાતકીર્તિરખિલૈરભિવન્દનીયઃ
સ્યાદેવ મારુતસુતઃ પ્રબલોઽત્ર સાક્ષી ॥ ૪૪૮॥

શ્રીરાઘવસ્ય કરુણે! કરુણાત્મિકાં તાં
સીતામશોકવનિકાસ્રપલબ્ધપીડામ્ ।
દ્રષ્ટું સમીરણપટુઃ પ્રહિતસ્સમીર-
સૂનુઃ કરાર્પિતતદક્ષરમુદ્રિકાઙ્કઃ ॥ ૪૪૯॥

માતર્દયે! કપિમપિ પ્રથિતપ્રભાવ-
માપાદયોઽબ્ધિમપિ તસ્ય તુ પલ્વલાભમ્ ।
રક્ષોગણં મશકકલ્પમકલ્પયો હિ
સર્વં કિલૈતદવનૌ શ્રિતરક્ષણાય ॥ ૪૫૦॥

લાઙ્ગૂલદીપિતસમીરસખે યદૌષ્ણ્યં
સ્વાભાવિકં તદપિ હન્ત! ઝડિત્યપોહ્ય ।
ઉત્પાદ્ય શૈત્યમનિલાત્મજમભ્યરક્ષઃ
ત્વદ્વૈભવં નિગદિતું નિપુણઃ કૃપે! કઃ ॥ ૪૫૧॥

દ્વીપાન્તરાન્મણિવરં વરમૂર્ધ્નિ ધાર્યં
આનેતુમમ્બ! કરુણે! કપિમેકમેવ ।
આયોજ્ય વિશ્લથમતે રઘુપુઙ્ગવસ્ય
વિશ્લેષદુઃખમહરો મણિદાપનેન ॥ ૪૫૨॥

યોગીપ્સિતં જનકજાસુલભં પવિત્રં
માતર્દયે! ભગવતો રઘુપુઙ્ગવસ્ય ।
આલિઙ્ગનં મણિવરાર્પણભાગ્યભાજે
વાતાત્મજાય નનુ દાપિતવત્યુદારમ્ ॥ ૪૫૩॥

માતર્દયે! ભવદનુગ્રહપાત્રતાં યો
નીતોઽત્ર જાતિગુણભેદમનેકવૃત્તિમ્ ।
ચિત્તેઽપિ કિઞ્ચિદવિચાર્ય દદાસિ તસ્મૈ
યોગીન્દ્રદુર્લભમમેયમહો! પ્રમોદમ્ ॥ ૪૫૪॥

કિં વા શ્રુતાત્મદયિતામિતશોકનુન્નઃ
ચૂડામણેર્વિતતરશ્મિસુદૂરકૃષ્ટઃ ।
કિં વા દયામ્બુનિધિસામ્યદિદૃક્ષયા ત્વં
હે રામ! સાગરતટં સમવાપિથાશુ ॥ ૪૫૫ ॥

પ્રાગેવ વિષ્ણુપદલબ્ધગતિં દયે! ત્વં
ત્યક્તાત્મદારસુતબન્ધુગૃહાગ્રજેષ્ટમ્ ।
ધન્યં વિભીષણમહો! શરણાર્થિનં તં
રામેણ યોજિતવતી શ્રિતપક્ષપાતઃ ॥ ૪૫૬ ॥

કીશોક્તિમપ્યવિગણય્ય પલાશજાતિં
ચિત્તેઽપિ કિઞ્ચિદવિચાર્ય ગુણાનદૃષ્ટ્વા ।
માતર્દયે! તમતનોશ્શરણાર્થિનં દ્રાક્
રામાઙ્ઘ્રિસેવકમહો! શ્રિતપક્ષપાતઃ ॥ ૪૫૭ ॥

યદ્યાગતો દશમુખોઽપિ કૃતાપરાધો-
પ્યાત્માર્પિતો રઘુવરેતિ વદેત્સકૃત્સઃ ।
જીવેત્કથઞ્ચિદુપયાતિ ન ગર્વમત્તઃ
માતર્દયે! ત્વમિતિ ખિદ્યસિ કિં નુ કુર્મઃ ॥ ૪૫૮ ॥

ધ્વાઙ્ક્ષેપિ મર્કટવરેઽપિ પલાશનેઽપિ
માતર્દયે! રઘુપતિં શરણં પ્રપન્નાઃ ।
ઇત્યાકલય્ય ભવતી સકલૈકરૂપા
માતાત્મજેષુ ન હિ પશ્યતિ તારતમ્યમ્ ॥ ૪૫૯ ॥

સન્તાડનોન્મુખવલીમુખકાન્નિવાર્ય
પ્રત્યર્થિપક્ષ્યશુકસારણસારણાય ।
માતર્દયે! રઘુપતિં પરિચોદ્ય શત્રુ-
પક્ષેઽપિ દર્શિતવતી બત! પક્ષપાતમ્ ॥ ૪૬૦ ॥

વાનં વિધાય જલધિં ભુવિ વાનરાણાં
યાત્રાનુકૂલ્યકલને કુશલોઽપિ રામઃ ।
માતર્દયે! જડમયોઽયમિતીવ તસ્ય
સમ્પ્રાર્થનાય તટ એવ સ શાયિતો નુ ॥ ૪૬૧ ॥

નોલ્લઙ્ઘિતો જલનિધિઃ ન હતો દશાસ્યઃ
પ્રાગેવ હન્ત! શરણાર્થિવિભીષણાય ।

લઙ્કામદાઃ કિમિદમમ્બ! દયે! શ્રિતાય
ત્યક્તાખિલાય વિતરસ્યતુલાં શ્રિયં હિ ॥ ૪૬૨॥

કોદણ્ડપાર્શ્વમવનીતલદર્ભશય્ય-
માજાનુબાહુમમલાયતપદ્મનેત્રમ્ ।
બાહૂપધાનમતનોઃ કરુણે! શયાલું
યોગીન્દ્રદુર્લભમમું કપિનેત્રપેયમ્ ॥ ૪૬૩॥

અભ્યર્થનાં જડમયસ્ય ચ સન્નિધાને
રામેણ કારિતવતી કરુણે! કિમેતત્? ।
નૈવાવલોકિતવતી જગતાં શરણ્યં
મત્તાનુવર્તનફલં ભુવિ સોઽન્વભૂચ્ચ ॥ ૪૬૪॥

શ્રીરામનામપરિચિહ્નિતબાણયોગાત્
ઉદ્બોધ્ય વારિધિપતિં મણિભૂષિતાઙ્ગમ્ ।
દારૈર્દયે! ત્રિજગતાં શરણં શરણ્યં
તં પ્રાપયો મતિવિહીનજને ત્વમેવમ્ ॥ ૪૬૫॥

સમ્પ્લાવ્ય સિન્ધુસલિલે પૃથુશૈલવૃન્દં
માતર્દયે! શ્રિતવલીમુખતારણાય ।
અત્યદ્ભુતં ભુવનપાવનમીડ્યસેતું
રામેણ કારિતવતી તવ કીર્તિરુચ્ચા ॥ ૪૬૬॥

મત્કિઙ્કરાન્ કટુભવાબ્ધિમપારમેવ-
મુત્તારયામિ કરુણાપરિચોદિતોઽહમ્ ।
જન્તૂનિતિ પ્રકટયન્નિવ વાનરૌઘાન્
રત્નાકરં સમુદલઙ્ઘયદાશુ રામઃ ॥ ૪૬૭॥

રત્નાકરઃ કપિમયસ્સમભૂત્કિમેતત્
સ્થાને કપિસ્તરણિરાપિબતીતિ કં યત્ ।
તદ્વંશરાઘવકૃતે તરણિપ્રતાર્યં
માતર્દયે! કૃતવતી કિમુ તં પયોધિમ્ ॥ ૪૬૮॥

માતર્દયે! જનકજાચિરબન્ધમોક્ષ-
કાઙ્ક્ષાકુલા જલનિધિં દૃઢસેતુબન્ધમ્ ।
રામેણ કારિતવતી કિમુ યુક્તમેતત્?
નો ચેત્તથા સ ભુવિ પૂજ્યતમઃ કથં સ્યાત્ ॥ ૪૬૯॥

દુર્દાન્તદૃપ્તકટુરાવણયુદ્ધસક્તં
સુગ્રીવમમ્બ! કરુણે! સિતસૌધશૃઙ્ગાત્ ।
નાનીનયો યદિ તદા રઘુવીરપાર્શ્વં
કીદૃક્ સ્થિતિર્ભુવિ ભવેદ્રઘુપુઙ્ગવસ્ય ॥ ૪૭૦॥

રામસ્ય રાક્ષસપતિસ્સકલાં સ્વલઙ્કાં
સીતાસ્વરૂપકરુણાચિરબન્ધનેન ।
ઈક્ષે ચ મર્કટમયીં કપિરાવદીર્ણાં
સ્વપ્નોદ્ભવામિવ નિજાશુભશંસિનીં તામ્ ॥ ૪૭૧॥

ક્ષીબૈર્વલીમુખગણૈઃ નિચિતા હિ લઙ્કા
તીક્ષ્ણૈશ્શિલીમુખગણૈર્નિચિતં નભશ્ચ ।
માતર્દયે! રઘુવરસ્ય મનો વિહાય
સીતેવ કિં નિગલિતા પિશિતાશનેન ॥ ૪૭૨॥

શ્રીરામમાનસમપાસ્ય વિદેહપુત્ર્યાઃ
દ્રાક્સાન્ત્વનાય કિમશોકવનં ગતાસિ?
નોચેત્તથા રઘુવરશ્શરવૃષ્ટિમેવં
કુર્યાત્કથં નિશિચરેષુ રુષાનુકમ્પે? ॥ ૪૭૩॥

માયારઘૂદ્વહશિરઃપ્રવિલોકનાત્ત-
શોકાપનોદનકૃતે સરમાં તદાનીમ્ ।
આયોજયેર્ન યદિ ભોગ્યમધુસ્રવાસ્યાં
સીતાદશા કથય હન્ત! દયે! કથં સ્યાત્ ॥ ૪૭૪॥

પૌલસ્ત્યપુષ્પકજુષા જનકસ્ય પુત્ર્યા
માતર્દયે! દિવિ કટાક્ષસુધાભિષેકૈઃ ।
પ્રાબોધયો રઘુવરૌ ભુજગાસ્ત્રબદ્ધૌ
તાર્ક્ષ્યો નિમિત્તમભવદ્ ભુજગાપનોદે ॥ ૪૭૫॥

હે રામ! તે નિરુપમા કરુણાસ્રપેષુ
જીમૂતવૃષ્ટિરિવ હન્ત! શિલોચ્ચયેષુ ।
નૈષ્ફલ્યમાપ તત એવ નિરાશ્રયાસ્તે
કાઠિન્યકૂટકુટિલત્વફલં ત્વવાપુઃ ॥ ૪૭૬॥

કારુણ્યનીરધિજલૈરભિષિક્તમેનં

લઙ્કાપુરે પુનરપિ સ્વસહોદરેણ ।
ભક્તં વિભીષણમનેકપવિત્રતીર્થૈઃ
રામોઽભિષેચ્ય દયિતાપ્યધિકં નનન્દ ॥ ૪૭૭॥

રામાર્થમેવ સમરે તૃણવત્કૃતાસૂન્
કીશાન્સુરેશવરકૈતવતસ્સમસ્તાન્ ।
સઞ્જીવ્ય હન્ત! સમરાત્પ્રથમં યથાસીત્
રામસ્તથા નનુ કૃતઃ કરુણે! ભવત્યા ॥ ૪૭૮॥

સમ્પ્રાર્થિતા પવનજેન નિશાચરીણાં
નિષ્પેષણાય જનકસ્ય સુતા તદાનીમ્ ।
ઉક્ત્વાન્યનિઘ્નજનવૃત્તિમવારયત્તં
ત્વદ્રૂપિણી ખલુ દયે! જનકાત્મજા સા ॥ ૪૭૯॥

યા શીતભાવમનયજ્જ્વલનં શ્રિતાર્થં
તાં જાનકીં રઘુપતિઃ કરુણે! ભવત્યા ।
ત્યક્તો ન્યપાતયદહો! જ્વલનેઽતિમૌઢ્યાત્
અગ્નિઃ કથં વદ દહેત્પતિદેવતાં તામ્ ॥ ૪૮૦॥

બ્રહ્માદિભિસ્સુરગણૈઃ પ્રકટીકૃતાત્મ-
તેજોવિશેષમપિ તં કરુણે! રમેશમ્ ।
મર્ત્યત્વસૂક્તિવિનિગૂહિતવૈભવં શ્રી-
રામં વ્યધા દશરથાત્મમુદે કિમમ્બ? ॥ ૪૮૧॥

વૈશ્વાનરેણ કરુણે! મધુરાનુદારાન્
વિશ્રાણિતાન્પતિપરાન્ રઘુવીરદારાન્ ।
સંયોજ્ય શાન્તમનસા રઘુપુઙ્ગવેન
ત્રૈલોક્યમઙ્ગલનિદાનમભૂઃ કિલામ્બ ॥ ૪૮૨॥

માતર્દયે! ભવ રઘૂદ્વહમાનસાન્મા
દૂરે કદાપિ સ તુ વિસ્મરતિ સ્વકાર્યમ્ ।
યા પાવકં ભુવિ પુનાતિ વિવેકશૂન્યઃ
તાં પાવકે બત! નિપાતિતવાન્ વિશુદ્ધ્યૈ ॥ ૪૮૩॥

સીતાપુટાર્પિતસુવર્ણતનુપ્રભાભિઃ
શ્રીરામમમ્બુધરભવ્યતનું દયે! ત્વમ્ ।
સૌવર્ણચક્રવિનિવેશિતશક્રનીલ-

રત્નોપમં ભુવનભૂષણમાતનોર્હિ ॥ ૪૮૪॥

જાયાપતી સમભિદર્શ્ય પુરાતનૌ તૌ
નિશ્વાસદર્શિતરુષં શ્રિતશેષભાવે ।
રામાનુજે નનુ દયે! પ્રસૃતાં શુચં તાં
ઉત્સાર્ય મોદમચિરાદુદપાદયોઽમ્બ ॥ ૪૮૫॥

કૈઙ્કર્યકાર્યનિરતં વ્રતિનિ પ્રકામં
રામે સ્વરૂપવિનિષિદ્ધમિદં ત્વિતીડ્યે ।
ખિદ્યન્તમમ્બ! કરુણે! ચિરદમ્પતી તૌ
સન્દર્શ્ય લક્ષ્મણમહો! સમતોષયો હિ ॥ ૪૮૬॥

પટ્ટાભિષેકમભિવીક્ષિતુમાહ્વયત્તં
શ્રીજાનકીપુરુષકારસુહૃષ્ટચિત્તઃ ।
રામો વિભીષણમશેષબલૈસ્સદારૈઃ
માતર્દયે! જનકજા ભવતીવ નૂનમ્ ॥ ૪૮૭॥

આમ્નાયપારવિદુષા દશકન્ધરેણ
તત્પુષ્પકં રઘુવરાર્થમવૈમિ ગુપ્તમ્ ।
માતર્દયે! ભરતરક્ષણતત્પરાસિ
રામત્વરાભિગમને હ્યુપકાર્યભૂદ્યત્ ॥ ૪૮૮॥

કૌબેરપુષ્પકસુવિષ્ટરસન્નિવિષ્ટં
વામાઙ્કપીઠવિનિવેશિતભવ્યસીતમ્ ।
રામં દયે! કનકભવ્યલતૈકપાર્શ્વં
મન્દારવૃક્ષમિવ દર્શિતવત્યમોઘમ્ ॥ ૪૮૯॥

નષ્ટશ્રિયં પુનરપિ પ્રતિપન્નલક્ષ્મીં
લઙ્કાં વિધાતુમચિરાત્કરુણે! ભવત્યા ।
સમ્પ્રેરિતો ગગનયાનગતઃ શ્રિતાર્થં
સીતાકટાક્ષમભિપાતયતિ સ્મ રામઃ ॥ ૪૯૦॥

સીતાપતિં દશરથાત્તપુનર્નિયોગં
પટ્ટાભિષેકકરણે કરુણે! દયાલું! ।
ભક્તાગ્રગણ્યભરતેક્ષણકાઙ્ક્ષયાર્તં
તૂર્ણં પ્રયાણધૃતમાનસમાતનોર્હિ ॥ ૪૯૧॥

વૃત્તાભિધાનનિરતે ધુરિ તત્ર તત્ર
રામે પ્રદર્શ્ય ગગનાત્ત્વરિતપ્રયાણે ।
દૃષ્ટ્વા જટાયુનિધનસ્થલમશ્રુનેત્રી
સીતાભવત્કરુણયા પ્રવિલીનચિત્તા ॥ ૪૯૨॥

વાતાત્મજં ભરતભાગ્યવિધાયિનં તં
રામાટવીપ્રતિનિવર્તનશંસનાય ।
સમ્પ્રેષ્ય ભક્તભરતાન્તિકમાશુ માતઃ!
માતૃત્વકાર્યમકરોઃ કરુણે! તદાનીમ્ ॥ ૪૯૩॥

અન્યોન્યદર્શનકૃતં મનસાપ્યચિન્ત્યં
ચીરામ્બરસ્ય ભરતસ્ય તદગ્રજસ્ય ।
આનન્દશોકનયનાશ્રુ દયે! યદાસીત્
તત્તાવદમ્બ! ભવદીયવિલાસકાર્યમ્ ॥ ૪૯૪॥

રામં ચતુર્દશસમા વનવાસખિન્નં
પ્રત્યાગતં જનકજાઞ્ચિતવામપાર્શ્વમ્ ।
સન્દર્શ્ય ભક્તભરતાય મુદાશ્રુભાજે
માતર્દયે! ત્વમભજઃ કૃતકૃત્યતાં હિ ॥ ૪૯૫॥

પાદાવલમ્બનપરસ્ય જિતેન્દ્રિયસ્ય
ત્યક્તાત્મસર્વવિષયસ્ય ધૃતવૃતસ્ય ।
પ્રત્યક્ષતાં સ ભગવાનુપયાતિ સત્ય-
મિત્યત્ર દર્શિતવતી કરુણે! કિમમ્બ ॥ ૪૯૬॥

પાદૂશિરસ્કમવનીતલચઙ્ક્રમં તં
આલમ્બિપિઙ્ગલજટં મલિનાઙ્ગયષ્ટિમ્ ।
ચીરામ્બરં ભરતમમ્બ! દયે! પ્રદર્શ્ય
શોકાત્મકં રઘુવરં વ્યતનોસ્સબાષ્પમ્ ॥ ૪૯૭॥

સીતામપાસ્ય સહસા ભરતં કૃશાઙ્ગં
રામેણ બાહુયુગલેન નિજાઙ્કદેશમ્ ।
આરોપ્ય તં સમભિષેચયસિ સ્મ બાષ્પૈઃ
નૈસર્ગિકં ખલુ દયે! તદિદં તવૈવ ॥ ૪૯૮॥

સાકેતવાસિષુ રઘૂદ્વહવિપ્રલમ્ભ-
ખિન્નેષુ હન્ત! કરુણે! તવ તુ પ્રસાદઃ ।

યદ્દૂરવર્તિનમનન્તગુણાકરં તં
આનીય રામમભિદર્શિતવત્યુદારમ્ ॥ ૪૯૯॥

પટ્ટાભિષેકમકુટાઞ્ચિતમસ્તકોઽયં
રાજ્યશ્રિયા સુહિતયા સહ સીતયા ચ ।
આત્માનુજૈઃ પરિવૃતસ્સુગુણાભિરામો
રામો દયાર્દ્રહૃદયો જગદભ્યરક્ષત્ ॥ ૫૦૦॥

વામે ભૂમિસુતા પુરશ્ચ હનુમાન્ પશ્ચાત્ સુમિત્રાસુતઃ
શત્રુઘ્નો ભરતશ્ચ પાર્શ્વદલયોર્વાય્વાદિકોણેષુ ચ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારાસુતો જામ્બવાન્
મધ્યે નીલ સરોજકોમલરુચિં રામં ભજે શ્યામલમ્ ॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
પઞ્ચમશતકં સમ્પૂર્ણમ્ ।

## ૬. ષષ્ઠશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમદ્વેદાન્તદેશિકાય નમઃ ।
અથ દયાસહસ્રે ષષ્ઠશતકમ્ ।

દર્શં દર્શં ભુવિ મનુજતાક્લેશમમ્બાનુકમ્પે
લક્ષ્મીનાથં પરમપુરુષં સર્વશબ્દાભિધેયમ્ ।
સર્વૈશ્વર્યપ્રકટિતજગદ્વૈભવં સંશ્રિતાનાં
રક્ષાર્થં તં પુનરપિ નરં કારયસ્યમ્બુજાક્ષમ્ ॥ ૫૦૧॥

તાદૃશઞ્ચ ભગવન્તમપિત્વં શત્રુબન્ધનગૃહે જનિમન્તમ્ ।
ભક્તરક્ષણકૃતેહ્યનુકમ્પે! મર્ત્યરૂપમવતારયસિ સ્મ ॥ ૫૦૨॥

કરુણા ખલુ કારણં મુરારે!
પરકારાવસથે ભવજ્જનેસ્તુ ।
વરનિર્વહણાપદેશતસ્ત્વં
વસુદેવસ્ય સુતત્વમાપિથાત્ર ॥ ૫૦૩॥

ક્ષીરાબ્ધિં ભુજગવરાચ્છતુઙ્ગતલ્પં
સન્ત્યાજ્ય પ્રબલતમોનિગાલગેહમ્ ।
આનીય શ્રિતજનરક્ષણૈકતાના
શ્રીશં તં નરસુતમાતનોર્દયે ત્વમ્ ॥ ૫૦૪॥

પીતામ્બરં રુચિરરત્નકિરીટદીપ્રં
નીલાલકં મકરકુણ્ડલકર્ણપાશમ્ ।
પઞ્ચાયુધં વરરમોરસમમ્બુજાક્ષં
ભક્તાય દર્શિતવતી કરુણે! કિશોરમ્ ॥ ૫૦૫॥

ધ્યાનૈકગમ્યમપિ તં નિગમાન્તવેદ્યં
હૃદ્યાનવદ્યગુણસાગરમમ્બુજાક્ષમ્ ।
મર્ત્યાય સંશ્રયણસમ્મતિદાનતુષ્ટા
સન્દર્શયસ્યયિ! દયે! બહુરૂપમેનમ્ ॥ ૫૦૬॥

સુધાસધ્રીચીં તદ્ગિરમથ નિશમ્યાત્મસુહિતાં
હિતાકાઙ્ક્ષી સાક્ષાત્સપદિ વસુદેવો દયિતયા ।
વિનિર્મુક્તો બન્ધાત્કરપુટગૃહીતાત્મતનયઃ
બભૂવેદં સર્વં તવ વિલસિતં હ્યમ્બ! કરુણે ॥ ૫૦૭॥

યત્રાસ્તે મણિસઞ્ચયો વિષધરો જાગર્તિ તત્રેતિ ય-
ત્સત્યં તદ્વસુદેવસન્નિધિગતં નીલપ્રભં સન્મણિમ્ ।
શેષસ્ફીતફણો રરક્ષ નિશિ યદ્વર્ષાતપત્રાત્મકઃ
તત્સર્વં ખલુ નન્દભાવિસુકૃતોદ્બોધાય માતર્દયે ॥ ૫૦૮॥

સ્વાપેક્ષયા સુમધુરં પરિવીક્ષ્ય વસ્તુ
કો નાપગચ્છતિ કૃપે! ત્રપયેર્ષ્યયા વા ।
કૃષ્ણે ક્ષણેન યમુના ત્રપયેવ સાગા-
દાગામિભાવુકધિયા વિહિતં કિમેવમ્ ॥ ૫૦૯॥

નિરઞ્જનમમું દયે! વ્રજગતં વિધાતું કથં
ત્વયેપ્સિતમિહાથવા શ્રિતજનાર્થમેવં કિલ ।
વિભાવ્ય પશુપાલકાભ્યુદયકાલમમ્બાથવા
વ્રજૌકસમકલ્પયઃ કિમુ શિશું વિશાલેક્ષણમ્ ॥ ૫૧૦॥

ચિત્તેઽપ્યચિન્તિતમનાશ્રિતમપ્રયત્નં
ક્વાપિ ક્ષિતૌ નનુ કદાપિ કુતોઽપ્યહેતુ ।

વાચામગોચરમનિન્દિતમાદરાર્હં
ભાગ્યં દદાસિ કરુણે બત ચેતનાય ॥ ૫૧૧॥

નિદ્રાવિસ્મૃતબાહ્યસર્વવિષયામન્તસ્તમોગૂહિતાં
કૃષ્ણાખ્યં યદનીનયો નિરુપમં રત્નં યશોદાં દયે! ।
યત્પ્રાપ્ત્યર્થમનેકવત્સરશતં વાતાતપાપીડિતાઃ
યોગીન્દ્રા મુનયોઽપિ સન્તતમહાધ્યાનૈકનિષ્ઠાસ્સ્થિતાઃ ॥ ૫૧૨॥

પુત્રઃ પુત્ર ઇતિ પ્રફુલ્લવદના ગોપાઙ્ગના ગોકુલે
હર્ષોદ્રિકગતાગતપ્રકટિતસ્ફીતોત્સવાસ્સઙ્ઘશઃ ।
નાભૂવન્ સુહિતાશ્શિશું મરકતસ્ફારાઙ્ગકાન્તિં મુહુઃ
દર્શન્દર્શમયે! દયે! પ્રચલિતં હ્યેતત્પ્રસાદાત્તવ ॥ ૫૧૩॥

અયે! દયે! તદ્ભવદીયકાર્ય-
માનન્દદં સર્વસમૃદ્ધિદાયિ ।
શ્રીકૃષ્ણજન્મોત્સવસમ્ભ્રમન્તુ
સહસ્રવક્ત્રોઽપિ ન વક્તુમીષ્ટે ॥ ૫૧૪॥

કિઞ્ચિત્કુઞ્ચિતબાહુજાનુયુગલં ચઞ્ચદ્વિકોશેક્ષણં
ડિમ્ભત્વારુણનૈલ્યમુગ્ધકદલીબાલાતપાત્મદ્યુતિમ્ ।
શશ્વન્મુષ્ટિવિલોલપાણિમુકુલે નિર્લક્ષ્યદૃષ્ટિં શિશું
દૃષ્ટ્વા ગોકુલયોષિતો ન દદૃશુઃ પારં પ્રમોદોદધેઃ ॥ ૫૧૫॥

ચિરાર્જિતતપઃફલં કિમનરાલમુગ્ધાત્મનાં
વ્રજાવસથવાસિનાં પશુસમાનવૃત્તીયુષામ્ ।
પરાત્પરમમું હરિં નનુ દયે! વિધાયાર્ભકં
કરાત્કરમનીનયો વ્રજનિતમ્બિનીનાં યતઃ ॥ ૫૧૬॥

ક્રમશો વિલોકયિતુરાનનં મના-
ગવલોક્ય મન્દમધુરસ્મિતાનનઃ ।
ક્રમમાંસલાવયવમઞ્જુલાકૃતિઃ
નવગોકુલોત્સવમરીરચચ્છિશુઃ ॥ ૫૧૭॥

કરુણારસપૂરિતં વિલોલં
કમનીયાકૃતિકાન્તિકાઙ્ક્ષણીયમ્ ।
વ્રજવાસિમનોવિસારજાલં
શિશુનેત્રં ક્રમશો વિશાલમાસીત્ ॥ ૫૧૮॥

કરયુગ્મપલ્લવોદ્ધૃતં સ્વં
ચરણાઙ્ગુષ્ઠમતિશ્રમેણ મન્દમ્ ।
અધરોષ્ઠસમ્પુટે નિવિષ્ટં
પરિચૂષન્ દદૃશે જનૈઃ કિશોરઃ ॥ ૫૧૯॥

ડિમ્ભો ભૂત્વા ચરણશિખરં ન્યસ્ય વક્ત્રાબ્જદેશે
લાલાવ્યાજાદ્વિબુધસરિતં સ્રાવયન્ ગોકુલં તત્ ।
કુર્વન્પૂતં મલિનશયને માતૃપાર્શ્વે શયાનઃ
દૃષ્ટઃ કૃષ્ણો વ્રજયુવતિભિઃ કાર્યમેતદ્દયે! તે ॥ ૫૨૦॥

યશોદાયા વક્ત્રં મુહુરભિવિલોક્યાત્તહસિતઃ
કિમેતન્મૌગ્ધ્યં માં નનુ નિજસુતં વેત્તિ ભવતી ।
દયા મે ત્વામેવં કલયતિ કિલેતિ પ્રકટય-
ન્નિવાર્યં શ્રીકૃષ્ણો વ્યલસદમલસ્મેરવદનઃ ॥ ૫૨૧॥

અનિમિત્તરોદનપરઃ કરોદ્ધૃતો
જરતીભિરુચ્ચબહુલાત્તરોદનઃ ।
મુકુલસ્તનીભિરુપલાલિતસ્તદા
હસતિ સ્મ નન્દતનયસ્તુ શૈશવે ॥ ૫૨૨॥

ડિમ્ભો ન્યુબ્જીભવિતુમસકૃદ્યત્નમાસ્થાય કૃચ્છ્રાત્
ન્યુબ્જીભૂતો નમિતવદનો મેદિનીસક્તનાસઃ ।
લાલાધારાતિમિતધરણિર્ધાત્રિ! મા ભૂદ્ભયન્તે
ભારધ્વંસી ત્વહમિતિ રહસ્સાન્ત્વયંસ્તામિવાસીત્ ॥ ૫૨૩॥

જાનુપાણિયુગસાહ્યતઃ ક્રમાત્
મન્દમઙ્ગણતલે વ્રજન્ શિશુઃ ।
યૌવતેન સહસાનુસંસૃતો
માતુરઙ્કમુપગમ્ય સસ્મયે ॥ ૫૨૪॥

નવકિઙ્કિણીકણકણક્વણત્કટિઃ
મણિનૂપુરારણિતમઞ્જુલાઙ્ઘ્રિકઃ ।
કરજાનુચઙ્ક્રમણકિઙ્કરાઙ્ગણઃ
રમણીહૃદમ્બુજમપાહરચ્છિશુઃ ॥ ૫૨૫॥

ક્રીડાર્થં બહુવિધપુત્રિકાપ્રદાને-

પ્યક્રન્દત્કૃતકપશૌ પુરો વિતીર્ણે ।
આમોદપ્રકટિત કૌતુકસ્સ કૃષ્ણઃ
સઙ્ક્રીડન્વ્યતનુત વિસ્મયં સ્વપિત્રોઃ ॥ ૫૨૬॥

કૃતકપશુપુરો નિધાય ઘાસાન્
તૃણમુપભુઙ્ક્ષ્વ વિતીર્ણમિત્યસુષ્ઠુ ।
અનુલપનપરો ન ખાદતીતિ
વ્યલપદનલ્પમયં સ્વમાતૃપાર્શ્વે ॥ ૫૨૭॥

પૂતનાં કપટસુન્દરીં શિશોઃ
યાતનાકરણબદ્ધચેતસમ્ ।
પાતયન્વિષધરસ્તનન્ધયઃ
પોત એવ તદુપર્યરાજત ॥ ૫૨૮॥

અમ્બાનુકમ્પે! દુરિતૈકભાજઃ
પ્રાણાત્યયાનેહસિ પૂતનાયાઃ ।
પ્રત્યક્ષતાં પ્રાપિત એવ હન્ત!
પરાત્પરસ્તાપસદુર્લભો યઃ ॥ ૫૨૯॥

પૂતનાદેહદાહોત્થઃ પૂતિગન્ધોઽપિ નૂતનઃ ।
પૂતનન્દાત્મજસ્પર્શાત્ જાતશ્ચન્દનગન્ધભાક્ ॥ ૫૩૦॥

એકસ્યાઃ કરપલ્લવાભિગમનં સંસૂચયન્ સસ્મિતં
વક્ષોજોપરિ સન્નિપત્ય જનનીહસ્તાત્પરસ્યા દ્રુતમ્ ।
લાલાસ્નાપિતતત્કુચઃ કચકરો વલ્ગંશ્ચલત્કુન્તલઃ
કૃષ્ણો ગોકુલયૌવતં વ્યતનુત સ્વાગારકાર્યોજ્ઝિતમ્ ॥ ૫૩૧॥

મહાનસોપાન્તનિવેશિતસ્ય
મહાનસોઽધસ્સ્થલશાયિતોઽયમ્ ।
ક્ષુદ્રાસુરાવિષ્ટમનોવિચિન્ત્ય
નિદ્રામપાસ્યોદ્બુબુધે સ કૃષ્ણઃ ॥ ૫૩૨॥

ત્રુટિતં શકટં પ્રઘટ્ટનેન
સ્વપદામ્ભોરુહયોર્વિધાય કૃષ્ણઃ ।
પ્રરુદન્ જનનીકરાદૃતો દ્રાક્
ચરણાઙ્ગુષ્ઠમુખો હસન્ બભૂવ ॥ ૫૩૩॥

નિતમ્બિનીપાણિગૃહીતપાણિઃ
મન્દં સ્ખલચ્ચઙ્ક્રમણઃ પદાભ્યામ્ ।
મઞ્જીરઝઙ્કારરવેણ ગોપી-
ચિત્તાનિ સઞ્ચાલયતિ સ્મ કૃષ્ણઃ ॥ ૫૩૪॥

ખેલનાત્સ વિરતઃ ક્ષુધા રુદન્
ગેહકર્મનિરતાં સ્વમાતરમ્ ।
માતરિત્યનુનયન્યશોદયા
સ્તન્યમઙ્કનિહિતઃ પપૌ હસન્ ॥ ૫૩૫॥

હસ્તાઙ્ગુલીકુટિલિતૈકક ચૂચુકોઽયં
અન્યસ્તનાહિતમુખસ્સ્રુતદુગ્ધસૃક્વા ।
અમ્બામુખપ્રહિતપદ્મવિશાલનેત્રઃ
માનાતિરેકસુભગામતનોદ્યશોદામ્ ॥ ૫૩૬॥

ધેનું દુહાનાં જનનીમુપેત્ય પશ્ચાદ્ ગૃહીત્વા ચષકં કરેણ ।
સઞ્ચાલયન્ પૃષ્ઠતટે વિવલ્ગન્ દોહાન્તરાયં વ્યતનોત્પયોર્થી ॥ ૫૩૭॥

મન્થાનદણ્ડવૃતદામવિકર્ષણેન
લોલક્વણદ્વલયનાદવિકૃષ્ટચેતાઃ ।
કસ્યાશ્ચિદાલયમુપેત્ય નિતમ્બિનીં તાં
પશ્ચાચ્છનૈરુપસરન્ વ્યતનોત્સ ભીતામ્ ॥ ૫૩૮॥

કસ્યાશ્ચિદારોહગતઃ કિશોર્યાઃ
કઞ્ચુલ્યુપારૂઢકુચોચ્ચકોરકે ।
પાણિં પ્રસાર્ય પ્રહસન્ વિવલ્ગન્
તામાતનોજ્જિહ્મમુખીં વિલજ્જિતામ્ ॥ ૫૩૯॥

અઙ્કે શયાલુરનિમિત્તકૃતસ્મિતોઽયં
સન્દર્શિતાત્મવદનાન્તરશેષલોકઃ ।
વ્યસ્માપયન્નિજમુખાબ્જવિલોકયિત્રીં
અમ્બાં સ્નુતસ્તનપયઃપૃષતાભિષિક્તઃ ॥ ૫૪૦॥

કૂપઙ્ગતાયાં નિજમાતરિ શ્રીનન્દાત્મજોઽન્તર્નિલયં પ્રવિશ્ય ।
આવર્જિતક્ષીરપૃથૂચ્ચભાણ્ડો દુગ્ધાભિષિક્તોવ્યરુદત્ સ્વદંસ્તત્ ॥ ૫૪૧॥

ક્ષીરપ્રવાહજઠરે પુરુહૂતનીલ-

રત્નપ્રભં સમુપવિષ્ટમરાલકેશમ્ ।
આરોહનીરકલશોપગતા યશોદા
દુગ્ધાબ્ધિમધ્યગમિવૈક્ષત વાસુદેવમ્ ॥ ૫૪૨॥

તૃણાવર્તસમુત્ક્ષિપ્તો
દહરાકાશવર્તિતામ્ ।
દર્શયન્નિવ નાકસ્થો
નિજઘાનાસુરં શિશુઃ ॥ ૫૪૩॥

વત્સાનાં ગલતલબદ્ધદામહસ્તઃ
કર્ષંસ્તાન્ દૃઢનિહિતાઙ્ઘ્રિકાન્નતાસ્યાન્ ।
તત્કણ્ઠપ્રચલિતકિઙ્કિણીનિનાદૈઃ
કૃષ્ણોઽયં પ્રકટિતવિસ્મયો જહાસ ॥ ૫૪૪॥

બહિર્મા ગા વત્સ! વ્રજતિ જનકો ધેનુભરણં
વિધાતું માતસ્તત્કરણકુતુકી ત્વં ભવ મહાન્ ।
ઇદાનીં પ્રાંશુસ્સ્યામિતિ સપદિ દોલાં પરિહરન્
ઉદગ્રાકારસ્સન્નતનુત યશોદાં ચલમતિમ્ ॥ ૫૪૫॥

દધિભાણ્ડમન્થનસમુત્થિતં નવં
નવનીતમન્યસદનેઽપ્યનુદ્ધૃતમ્ ।
સ્વકરેણ મન્દમુપગૃહ્ય જિહ્વયા
મુહુરાલિહન્ સ જનનીનિયન્ત્રિતઃ ॥ ૫૪૬॥

ધ્વાન્તાગારે મુદિરસુષમો રૌહિણેયદ્વિતીયઃ
શિક્યે ન્યસ્તં ચલિતલગુડાન્મર્કમશ્નન્નિપાત્ય ।
કાર્યાસક્ત્યા સ્વનિકટજુષો નૂત્નવધ્વા મુખે તત્
ક્ષિપ્ત્વા શ્વશ્રૂકટુતરવચઃપાત્રમાપાદ્ય હૃષ્ટઃ ॥ ૫૪૭॥

કસ્યાશ્ચિન્નિજચૌર્યવીક્ષણકૃતે મન્દં ગૃહાભ્યન્તરે
નિશ્શબ્દાયિતનૂપુરં પદગતેર્વધ્વા મુખામ્બોરુહે ।
ફૂત્કૃત્યા પયસો નિજાસ્યનલિકાગણ્ડૂષિતસ્યાઞ્જસા
કૃષ્ણોઽયં નયને પિધાય નિરગાદ્ગેહાત્સ્વગેહં પ્રતિ ॥ ૫૪૮॥

અન્યૈર્ગોપકિશોરકૈર્બહિરસૌ ક્રીડૈકસક્તઃ ક્ષણાત્
અન્યાન્તર્ભવનં પ્રવિશ્ય કલશાદ્દુગ્ધં નિપીયોત્ક્ષિપન્ ।
બાહ્યાક્રીડનકઃ પુનર્ગૃહવધૂમાહૂય મન્દસ્મિતઃ

માર્જાલો ભવદીયદુગ્ધમપિબત્પશ્યેત્યવોચચ્છઠઃ ॥ ૫૪૯॥

વિસ્રંસનેન સહસા ગલબદ્ધધામ્નાં
વત્સાન્વિમોચ્ય પરિનુદ્ય ચ માતૃપાશ્વમ્ ।
ઊધઃ પયઃ પિબતિ વત્સ ઇતિ સ્વકાર્ય-
સક્તાસ્સ્ત્રિયો વ્યઘટયદ્ ગૃહકર્મણોઽયમ્ ॥ ૫૫૦॥

કુમ્ભાન્નવોદ્ધૃતમુદસ્ય પરોકસિ દ્રાક્
અંસાવલમ્બિ કનકાંશુક બદ્ધપિણ્ડઃ ।
ખાદન્ સ્વયં રહસિ મુગ્ધકુમારિકાયાઃ
તત્ સ્વાદયન્ સ્વપરિરબ્ધતનોર્મુમોદ ॥ ૫૫૧॥

મર્કાપહારપિશુનાય વધૂર્યશોદા-
વેશ્માગતા કરગૃહીતમુકુન્દપાણિઃ ।
અમ્બાઙ્કશાયિનમવેક્ષ્ય કૃતસ્મિતં તં
ચિત્રાર્પિતેવ નિજગણ્ડકરૈવ તસ્થૌ ॥ ૫૫૨॥

હય્યઙ્ગવીનમપહૃત્ય સજઙ્ઘિકેલ્યાં
જ્યોત્સ્ન્યાં તમાલતરુમૂલમુપેત્ય કૃષ્ણઃ ।
શશ્વલ્લિહન્નનુપલબ્ધઘૃતૈસ્સ્રવન્તી-
તીરે જહાસ મૃગિતો ઘનરુક્સુહૃદ્ભિઃ ॥ ૫૫૩॥

કંસાય સર્વમિદમિત્યનુશાસ્ય માત્રા
ન્યસ્તાનિ મર્કદધિતક્રપયાંસિ કૃષ્ણઃ ।
કંસે નિધાય પરિભુજ્ય ચ માતૃપૃષ્ટઃ
કંસાર્પિતાનિ હિ મયેત્યવદત્સ્મિતાસ્યઃ ॥ ૫૫૪॥

કરકબલપરો મુરારિરારાત્
પરકરભોજ્યહરો વિરાવયંસ્તમ્ ।
મમ કરકબલં જહાર માતઃ
સ્વયમિતિ તત્પુરતો હસન્ વવલ્ગ ॥ ૫૫૫॥

ઉદરપ્રતિમુક્તદામબદ્ધં
પૃથુલોલૂખલમમ્બયૈવ રોષાત્ ।
યમલાર્જુનમધ્યગો વિકર્ષન્
નનુ મોક્ષાય તયોર્બભઞ્જ શૌરિઃ ॥ ૫૫૬॥

ઘોષસ્થાખિલદામસઙ્ગ્રથનતો દીર્ઘીકૃતસ્યાપિ તે
દામ્નો દ્વ્યઙ્ગુલમાત્રમૂનમુદરે દૃષ્ટ્વા યશોદાલ્પધીઃ ।
આશ્ચર્યાકુલમાનસા સ્થિતવતી જાનાતિ સા ત્વાં કથં
બ્રહ્માણ્ડોદરમબ્જલોચન! કૃપાબદ્ધોઽસિ બદ્ધસ્તયા ॥ ૫૫૭॥

અહો તે કારુણ્યં ધનદસુતયોશ્શાપકુટયોઃ
વિમોક્ષાર્થં બાલો વ્રજરચિતચેષ્ટાકુપિતયા ।
તયા બદ્ધો માત્રા કટુકુટિલદામ્નાસ્તિ સ ભવાન્
અભૂન્નામાસ્મભ્યં શ્રુતિમધુરદામોદર ઇતિ ॥ ૫૫૮॥

નન્દે જન્મદિનોત્સવં રચયિતું કૃષ્ણસ્ય પુષ્પાદિભિઃ
ગેહાલઙ્કરણૈકતાનહૃદયે નન્દાત્મજો બાલકૈઃ ।
ક્રીડન્ વર્ત્મનિ ધૂલિધૂસરકચો માત્રાભિષિક્તોઽબ્રવીત્
ભક્ષ્યં દેહિ મદીય જન્મદિવસો મા તાડયેતિ પ્રસૂમ્ ॥ ૫૫૯॥

ચકિતચકિતદૃષ્ટિર્મન્દમન્યોપગેહે
વિનિહિતચરણોઽયં મણ્ડં આલિહ્ય સર્વમ્ ।
ત્રુટિતદધિઘટો દ્રાગાખુભુક્તુલ્યનાદઃ
સમુપગતનતાઙ્ગીગણ્ડચુમ્બી વ્યધાવત્ ॥ ૫૬૦॥

પ્રલમ્બઘ્નેનારાદ્ગ્રહણકુતુકી ક્રીડનપરઃ
પ્રસન્નજ્યોત્સ્નાયાં તમભિમૃગયન્ પાર્શ્વગમપિ ।
અદૃષ્ટ્વા તેનૈવ ગ્રહણવિચિતશ્શશ્વદચિરાત્
અનિન્દદ્દુઃખાર્તો નિજમુદિર દેહદ્યુતિમયમ્ ॥ ૫૬૧॥

વત્સાન્યગેહદધિમર્કપયોપહારી
મા ભૂર્વદન્તિ સુહૃદસ્ત્વસિતં પ્રસૂર્મામ્ ।
ખાદન્સિતાનિ નવનીતપયોદધીનિ
શુભ્રો ભવેયમિતિ તત્સતતં હરામિ ॥ ૫૬૨॥

પુષ્પોપકણ્ઠચલચિત્રપતઙ્ગપાણિઃ
મુગ્ધાકુચોપરિ નિવેશ્ય ચ તં મુકુન્દઃ ।
ભીત્યા કુચાંશુકમુદસ્ય વિધૂન્વતીં તાં
દૃષ્ટ્વા જહાસ સસુહૃદ્ભિનદન્ સતાલમ્ ॥ ૫૬૩॥

બૃન્દાવનં દુરવગાહમમન્દબૃન્દં
નન્દાત્મજાઙ્ઘ્રિકમલન્યસનાત્તધાસમ્ ।

વન્દારુવૃન્દપરિવન્દિતમન્દિરાઢ્યં
બૃન્દારકાદિબુધનન્દિતનન્દમિન્ધે ॥ ૫૬૪॥

વત્સલો વત્સવત્સો યો
વત્સોત્સાહોત્સવોત્સુકઃ ।
મત્સરં વત્સમુત્સાર્ય
સાલેઽપાસું સ સસ્મયે ॥ ૫૬૫॥

બૃન્દાવને કુસુમિતાખિલવીરુદગ્ર-
સઞ્ચારશીલમધુલિણ્મધુરારવેણ ।
સમ્મિશ્રયન્વદનવેણુનિનાદમેષઃ
તદ્યૈવતં વ્યતનુતાચલપુત્રિકાભમ્ ॥ ૫૬૬॥

માયૂરબર્હકૃતમસ્તકમણ્ડનોઽયં
ગુઞ્જોન્નિયન્ત્રિતકચો વિચલેક્ષણાબ્જઃ ।
ભ્રૂભઙ્ગભઙ્ગુરવિશેષકમુગ્ધફાલઃ
સોઽસ્તમ્ભયદ્વનમૃગાન્ મુરલીનિનાદૈઃ ॥ ૫૬૭॥

દુહાનાયા ધેનું તરુણિમલસન્મુગ્ધસુદૃશઃ
પ્રવેણીં વત્સસ્ય પ્રચલગલદામ્ના ચરમતઃ ।
રહો બદ્ધ્વોત્તાનીકૃતતનુમથાકર્ષણબલાત્
વિલોક્યાયં કૃષ્ણો હસિતવદનો દુગ્ધમહરત્ ॥ ૫૬૮॥

ઉત્ક્ષિપ્યોક્ષિપ્ય કુમ્ભાન્નટનપટુતયા ન્યસ્તતાલાનુપાદઃ
મઞ્જીરધ્વાનતાલશ્શિરસિ ભુજયુગે પાતયન્નૂર્ધ્વતસ્તાન્ ।
ગોપાનાં ગોપિકાનાં ધુરિ વલયજુષાં સ્વેદબિન્દૂચ્ચફાલઃ
નૃત્યન્ વિસ્માપયંસ્તાન્ સ સમધિગતવાન્મર્કપિણ્ડાન્ મુકુન્દઃ ॥ ૫૬૯॥

બકાસુરં વીરણવદ્વિદાર્ય
તીક્ષ્ણાયતત્રોટિ દલાધ્વનાયમ્ ।
વિલાસિની લોલવિલોચનાલિ-
પીતો વ્રજે નન્દસુતો નનન્દ ॥ ૫૭૦॥

જમ્બૂફલાનિ પતિતાનિ જલેઽમ્બુજાક્ષ-
સ્ત્વમ્બૂકૃતામ્બુરય સમ્પ્લવને ઝષાભઃ ।
બિમ્બાધરોષ્ઠપુટસઙ્ગ્રહણેન ખાદન્
જમ્બૂફલદ્યુતિરખેલદયં સ્રવન્ત્યામ્ ॥ ૫૭૧॥

ઉપદંશદંશનવિકૂણિતેક્ષણઃ
ક્ષણભઙ્ગુરભ્રુમધુરોદનાશનઃ ।
સુહૃદાં મુખેષુ કબલાનિ પાતયન્
યમુનાતટીષુ વિજહાર વેણુભાક્ ॥ ૫૭૨॥

ગિરિતટબહુગૈરિકપ્રલિપ્તઃ
નવમુદિરદ્યુતિરુચ્ચપિઞ્છચૂડઃ ।
બહુવનસુમમાલિકાઞ્ચિતાઙ્ગો
વ્યલસદયં સુરચાપનાકકલ્પઃ ॥ ૫૭૩॥

અજગરં વિતતાસ્યમઘાસુરં
નિજસુહૃદ્ગણરક્ષણકાઙ્ક્ષયા ।
ઉદરગો નિજઘાન જનાર્દનો
વનતટે પૃથુપર્વતસન્નિભમ્ ॥ ૫૭૪॥

અઘરૂપમઘં કૃષ્ણસ્સદ્ગતિં સમનીનયત્ ।
કો વેત્તિ નિપતેત્તસ્ય દયા કસ્મિન્ કદા કથમ્ ॥ ૫૭૫॥

ઘટીયન્ત્રદેશ્યા દયા તે દયાબ્ધે
કઠોરાવિલં તુચ્છમન્તશ્ચ પાત્રમ્ ।
પ્રહૌ દ્રાઙ્ નિપાત્યામૃતાસ્વાદસક્તં
વિધાયોદ્ગતિં હન્ત! તસ્મૈ દદાતિ ॥ ૫૭૬॥

મુષિતેષુ વત્સ નિવહેષુ કાનને
વિધિના તદૈવ વસુદેવનન્દનઃ ।
પરિલબ્ધતત્તદવિશેષવિગ્રહો
નિજમાતૃદુગ્ધસુહિતોઽભવત્સમામ્ ॥ ૫૭૭॥

પૌગણ્ડવયસા કૃષ્ણો
વ્યક્તાવયવસૌષ્ઠવઃ ।
દયાલક્ષ્મીલસન્નેત્રો
વૃન્દાવનમનન્દયત્ ॥ ૫૭૮॥

બર્હાવતંસશ્ચરમાઙ્ગ બદ્ધ-
બર્હાવલિર્ભુગ્નગલો નતાસ્યઃ ।
કેકાભનાદો વનબર્હિવૃન્દં

નન્દાત્મજો નર્તયતિ સ્મ હૃષ્ટમ્ ॥ ૫૭૯॥

ગિરિનિર્ઝરૌઘપૃષદાચિતાઙ્ગકો
રવિધૃષ્ટિપાતકૃતશક્રચાપકઃ ।
રચનાદમિશ્રિતનિજસ્વનો ધુની-
પિહિતસ્સુહૃદ્ભિરભવદ્ગવેષિતઃ ॥ ૫૮૦॥

ઝરીયવનિકાતિરસ્કૃતતનુઃ પયોમુગ્રુચિઃ
ગવેષણપરૈર્વને નિજસુહૃદ્ભિરન્વેષિતઃ ।
વિલોક્ય નવનીલરુગ્રુચિરનીરપૂરં તદા
હસદ્ભિરુપવીક્ષિતસ્સ્મિતમુખો બભૂવાચ્યુતઃ ॥ ૫૮૧॥

અબ્ધૌ દુગ્ધમયે શયાલુરપિ તત્સન્દર્શનોદ્વેજિતઃ
ભીત્યા તદ્વ્રજમન્દિરેષુ રહસિ સ્તોકં હરંસ્તૃપ્તિભાક્ ।
કૃષ્ણોઽભૂત્સુલભે તુ વસ્તુનિ સદા પ્રાયસ્સમીપસ્થિતે
ભોગ્યેઽપિ સ્વયમીહિતેઽપિ બહુલે સ્યાત્ ખલ્વવજ્ઞા ચિરમ્ ॥ ૫૮૨॥

પૃષ્ઠાઙ્ઘ્રિધૂનનકઠોરવિરાવરૂક્ષ-
ચક્ષુઃકરાલરદદર્શિતહિંસ્રચેષ્ટમ્ ।
ઉત્પાત્ય ધેનુકમપાસુમપાતયત્તં
તાલાત્ફલૈસ્સહ ખરં ભુવિ નીલચેલઃ ॥ ૫૮૩॥

દીપ્રાશ્મદિવ્યમકુટાર્હશિરાઃ પિનદ્ધ-
ગુઞ્જાસરાઞ્ચિતશિરા વનમાલિકોરાઃ ।
વન્યપ્રસૂનરુચિરઃ કમલાસખોઽપિ
ગોપીપ્રિયો વ્રજગતો વ્યલસન્મુકુન્દઃ ॥ ૫૮૪॥

સન્માર્ગદર્શનપરં ગુરુમમ્બુજાક્ષઃ
ત્યક્ત્વા હલાયુધમયં વિપિનં પ્રયાતઃ ।
ગોચારણાય વરવેણુધરો ભુજઙ્ગ-
ક્ષ્વેલાનલે હ્રદજલે નિપપાત કૃષ્ણઃ ॥ ૫૮૫॥

તથા નાપીડયત્કૃષ્ણં
હ્રદસ્ફીતવિષોદકમ્ ।
વિલાપાશ્રુજલં તીક્ષ્ણં
યથા તીરવ્રજૌકસામ્ ॥ ૫૮૬॥

કાલીયનીલવિષકાલાયમાનતનુરાલોલચિક્કણફણાં
આરુહ્ય તાણ્ડવપદન્યાસઝઙ્કૃતિજતાલાનુભુગ્નશિરસમ્ ।
શોણોરુશોણિતમુખાલોલનીલદલજિહ્વાતરઙ્ગકલિલં
કાલીયમમ્બુનિધિવાસાય કાલયતિ દારૈસ્સ્મ શૌરિરચિરાત્ ॥ ૫૮૭॥

ભક્તરક્ષણકૃતે મુરવૈરિન્
આત્મનો ન ગણયસ્યપિ કષ્ટમ્ ।
યત્સમુત્પ્લુતિગતો વિષનીરે
હન્ત! તે નિરુપમા કરુણા હિ ॥ ૫૮૮॥

ભવત્પાદસંસ્પર્શમાત્રેણ લોકે
વિષં સ્યાત્સુધા હન્ત! હિંસ્રોઽપિ સાધુઃ ।
ભવત્પૂતનામ્નાં સ્મૃતૌ ચેચ્છુભં સ્યાત્
કિમુ ત્વત્સમીપસ્થિતૌ ચક્રપાણે ॥ ૫૮૯॥

વને ગ્રાહ્યક્રીડાપરકપટગોપાલવપુષા
પ્રલમ્બેનોઢોઽયં દનુજરિપુભીતેન હલભૃત્ ।
વ્યતાનીચ્છ્રીકૃષ્ણપ્રણિહિતગિરા સક્થિયુગતઃ
પ્રલમ્બગ્રીવં તં વ્યસુમપસૃતસ્ફીતનયનમ્ ॥ ૫૯૦॥

વાચાટકૂટકુટવાટનટત્સ્ફુલિઙ્ગ
તુઙ્ગાદ્રિકન્દરદરાજગરપ્રસારમ્ ।
દાવાનલં શ્રિતસુહૃજ્જનગોગણાનાં
રક્ષાકૃતે તરુગતોઽગિલદમ્બુજાક્ષઃ ॥ ૫૯૧॥

ગોપ્યસ્સર્વાસ્તરુણિમલસત્સ્વાઙ્ગમૌગ્ધ્યાભિરામાઃ
કામાશ્લિષ્ટાસ્તપસિ શરદિ પ્રાપ્તકૃષ્ણાખ્યજીવાઃ ।
કાશ્ચિદ્ધ્યાનાત્તદનુકરણાત્કાશ્ચિદપ્યુચ્ચગાનાત્
વૃન્દારણ્યે કરણમખિલં સાર્થયામાસુરેવમ્ ॥ ૫૯૨॥

દયાધુની તે વ્રજવાસિનીનાં
શૌચવ્રતાચારપરાઙ્મુખીનામ્ ।
ચિત્તાનિ સઙ્ક્ષાલયતિ સ્મ શૌરે!
યથા ભવેયુર્ભવદેકભાઞ્જિ ॥ ૫૯૩॥

વેણું કૂણિતરાગમુગ્ધનયનઃ કૃષ્ણઃ કલિન્દાત્મજા
તીરારૂઢ મહીરુહાન્તરગતો નીલદ્યુતિર્વાદયન્ ।

દૂરાત્કોકિલવદ્ધનપ્રિયતયા પુષ્ટઃ પરેણાપ્યયં
ગોપીરાહ્વયતિ સ્મ મૃગ્યમધુરસ્વીયાકૃતિર્નાદતઃ ॥ ૫૯૪॥

ગોપીનાં ગમનં નિરીક્ષ્ય પશવઃ ફેનાક્તઘાસાનનાઃ
કર્ણોત્ક્ષેપણદર્શિતોરુમુરલીહૃદ્યસ્વનૈકાદરાઃ ।
હુઙ્કારપ્રકટીકૃતાત્મગમનોત્સાહા રણદ્ ઘણ્ટિકાઃ
ધાવન્તિ સ્મ વિકુઞ્ચિતોદ્ધૃતચલદ્વાલા મુકુન્દાન્તિકમ્ ॥ ૫૯૫॥

હેમન્તશીતપવનાભિહતાસ્તુ મુગ્ધાઃ
કૃષ્ણાપ્તિકામરુચિરવ્રતમજ્જનેચ્છાઃ ।
વાસાંસ્યુષસ્યભિવિમુચ્ય નિવેશ્ય તીરે
મન્દં કલિન્દતનયાં વિવિશુર્વિવસ્ત્રાઃ ॥ ૫૯૬॥

પરસ્પરજલાહતિસ્મિતવિહારસક્તાસુ તા-
સ્વયં રહસિ સઞ્ચરન્નપહૃતાનિ તાનિ દ્રુમે ।
નિધાય મુરલીસ્વનસ્વકકૃતાક્ષિસઞ્ચાલનાઃ
વિધાય રચિતાઞ્જલીઃ કરુણયાંશુકાન્યાર્પયત્ ॥ ૫૯૭॥

કૃષ્ણસ્ય નર્મવચનૈકવશાસ્સખાયઃ
કાન્તારચઙ્ક્રમણજ ક્ષુદવાપ્તબાધાઃ ।
સૂર્યાતપગ્લપિત વિશ્લથધૂસરાઙ્ગાઃ
ભિસ્સાર્થિનો મુરરિપું શરણં પ્રપન્નાઃ ॥ ૫૯૮॥

કૃષ્ણોક્ત્યા વ્રજબાલકાસ્સવ ભુવં પ્રાપ્યાવનમ્રા દ્વિજાન્
ઊચુર્નન્દસુતો નિજાગ્રજયુતઃ ક્ષુત્પીડિતઃ પ્રાહિણોત્ ।
હવ્યાર્થી વિતરન્તુ હવ્યમિતિ તચ્છ્રુત્વાઽપ્યુદાસીનતઃ
વિપ્રાસ્તાનવહેલનેન વિમુખાંશ્ચક્રુઃ કિમેષ ક્રતુઃ? ॥ ૫૯૯॥

વિના કારુણ્યં તે કથમિહ ભવન્તં દ્વિજવરાઃ
અપિ પ્રાપ્તં સાક્ષાત્સવનપુરુષં કૃષ્ણ! વિદિતુમ્ ।
સમર્થાસ્સ્યુઃ કર્મપ્રવણમનસો જ્ઞાનવિમુખાઃ
સ્વશક્ત્યા બાહ્લીકોદ્વહનભરખિદ્યત્ખર નિભાઃ ॥ ૬૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
ષષ્ઠશતકં સમ્પૂર્ણમ્ ।

## ૭. સપ્તમશતકમ્

શ્રીઃ ।

શ્રીમતે રામાનુજાય નમઃ ।

શ્રીમતે લક્ષ્મીદાસાય નમઃ ।

શ્રીમદ્વેદાન્તદેશિકાય નમઃ ।

અથ દયાસહસ્રે સપ્તમશતકમ્ ।

તત્પત્ન્યઃ પતિભિર્નિરુદ્ધગમના અપ્યમ્બુજાક્ષાય ત-
દ્ધવ્યં ભોગ્યતમાન્નપાયસપયોહય્યઙ્ગવીનાન્વિતમ્ ।
ભક્ત્યાદાય સમર્પ્ય તાસ્તુ મુમુદુઃ કૃષ્ણોઽપિ મિત્રૈસ્સમં
તદ્ભુક્ત્વા સુહિતોઽભવત્સ ભગવાન્ ભક્ત્યેકવશ્યઃ ખલુ ॥ ૬૦૧॥

કર્મણા કિમુ વશઙ્ગતો હરિઃ જ્ઞાનવૈભવનિમિત્તતઃ કિમુ ।
પ્રીતિમાત્રરચિતાર્પણસ્તદા સોઽન્વગૃહ્ણદબલા દ્વિજન્મનામ્ ॥ ૬૦૨॥

કિં કૃતં તપ ઉત વ્રતં ક્ષિતૌ
ધ્યાનવર્ત્મનિ ચિરસ્થિતિઃ પુરા ।
વિપ્રદારવિષયે કુતસ્તથા
માધવ! પ્રકટિતા દયા ત્વયા ॥ ૬૦૩॥

વિદિતપ્રવૃત્તિરપિ ગોપસમ્ભ્રમે
શિશુભાવયોગ્યમધુરાનુયોગતઃ ।
જનનીમુખાદવગતાદિકારણો
નિજગાદ સાધુ જરતો જનાર્દનઃ ॥ ૬૦૪॥

વયોવૃદ્ધા યૂયં કિમિદમુચિતં યચ્ચ સુચિરાત્
સમારબ્ધં કર્મ પ્રકૃતમવિચારૈકસુભગમ્ ।
કિમર્થં કર્તવ્યં કિમુ ફલમિહ દ્રવ્યવિલયાત્
મુધૈવૈતન્મન્યે સુરપતિમખં દુઃખબહુલમ્ ॥ ૬૦૫॥

કથં શ્રીમાનિન્દ્રસ્ત્રિદિવનિલયસ્તોયદપતિઃ
કુતસ્તસ્મૈ કાર્યં વ્રજવસતિભિઃ પૂજનમિહ ।
પયોજ્યોતિર્ધૂમપ્રભૃતિવલનં યાતિ ઘનતાં
સ્વયં વર્ષત્યમ્બુ પ્રસરદિતિ વાત્યાહતતનુઃ ॥ ૬૦૬॥

કર્માનુરૂપિણી ભૂમૌ સ્થિતિસ્સર્વશરીરિણાં ।

પુરાકૃતસ્વકર્માનુરૂપમશ્નન્તિ તે ફલમ્ ॥ ૬૦૭॥

અસ્મદ્રક્ષણભારમુદ્વહતિ હિ શ્રીમાનયં પર્વતઃ
ઘાસામ્બુપ્રભૃતિપ્રદાનનિરતો ગોવર્ધનાખ્યો મહાન્ ।
તસ્માત્સમ્પ્રતિ સાદરં વયમમું સમ્ભારભારાન્વિતાઃ
પ્રાર્ચિષ્યામ ઇતીરયન્ વ્રજજનાન્ નિઘ્નાનતાનીદયમ્ ॥ ૬૦૮॥

એવં કુર્વત્સુ સર્વેષ્વતિકુપિતતુષારાટ્ પ્રણુન્નેષુ મેઘે-
ષ્વારાદ્વર્ષત્સુ ઘોરં પટુકુટિલરટત્સ્ફૂર્જથુધ્વાનભાક્ષુ ।
ગોપાલૈઃ પ્રાર્થિતોઽયં પશુભિરપિ મુહુસ્સાશ્રુ સંવીક્ષ્યમાણઃ
હસ્તેનોત્પાટ્ય ગોત્રં નિજકરકલિતં છત્રવત્સોઽપ્યબિભ્રત્ ॥ ૬૦૯॥

જિતશ્શ્રીમાન્વજ્રી ધવલગજરાડ્વાહનગતો
વિનમ્રસ્સ્તુન્વન્ સન્સુરભિસહિતઃ પ્રાઞ્જલિશિરાઃ ।
સબાષ્પં ગોવિન્દેત્યસકૃદભિધાયામૃતકણૈઃ
અષિઞ્ચદ્બાલં તં યદુપરિબૃઢં મિત્રવિનુતમ્ ॥ ૬૧૦॥

ઐશ્વર્યદૃપ્તમપિ વિસ્મૃતસર્વશક્તં
કૃત્વા કથઞ્ચિદવનાય ચ સમ્મુખીનમ્ ।
ઉત્પાદયસ્યયિ! દયે! ભગવત્યપારાં
ભક્તિં મહીધરભિદત્ર ભવેદ્ધિ સાક્ષી ॥ ૬૧૧॥

પ્રાયોવિરોધકૃદિહૈવ ભવત્કટાક્ષ-
પાત્રં ભવત્યનિતરામવિશેષભાગ્યમ્ ।
તત્પૂતનાપ્રભૃતિવૃત્રનિષૂદનાન્તાઃ
સર્વેઽપ્યવાપુરમલામ્બુજપત્રનેત્ર ॥ ૬૧૨॥

નન્દાદયો નિગમવેદ્યમમું મુકુન્દં
કારુણ્યદર્શિતમહાદ્ભુતદિવ્યચેષ્ટમ્ ।
સ્તુત્વા ચરન્તમિહ બાલિશગોપબાલૈઃ
તે મેનિરે નિજજનિં સફલાઞ્ચ ધન્યામ્ ॥ ૬૧૩॥

યમુનાપ્રવાહવિનિમગ્નમઞ્જસા
વરુણોપનીતમવકર્ણ્ય નન્દજ ।
પિતરં પુનશ્ચ સમનીનયો વ્રજં
કરુણા ન કારયતિ કિં ત્વયાચ્યુત ॥ ૬૧૪॥

શરજ્જ્યોત્સ્નાકાન્તે વિમલપુલિને સૂર્યતનયા-
તટે કૃષ્ણે વેણું મધુરમધુરં વાદયતિ તાઃ ।
નિશમ્યારાદ્ગોપ્યો નિજસદનકર્મવ્યતિકરં
વિહાયોત્તસ્થુર્દ્રાક્પતિગુરુનિરુદ્ધા અપિ તદા ॥ ૬૧૫॥

કાશ્ચિદ્દોહં કતિચન શિશૂન્ કાશ્ચિદપ્યાર્યકાર્યં
કાશ્ચિન્નાથં કતિચન નિજાલઙ્કૃતિં પાકમર્ધમ્ ।
ત્યક્ત્વા ગોપ્યો યદુપતિહૃદઃ પ્રાપ્તસઙ્ઘા વિયાતાઃ
યાતાસ્તસ્મિન્વિહરતિ મુદા નન્દજસ્તં પ્રદેશમ્ ॥ ૬૧૬॥

નન્દાત્મસમ્ભવ! કિશોર! વિશાલનેત્રે
દૃષ્ટે ત્વયિ સ્મિતમુખે ભુવિ બાલિશાશ્ચ ।
ત્યક્ત્વાત્મબન્ધુપતિમિત્રકલત્રપુત્રાઃ
સ્નિહ્યન્તિ નાથ! ભવતીતિ કિમત્ર ચિત્રમ્ ॥ ૬૧૭॥

ક્રીડન્તીર્યદુપુઙ્ગવેન યમુનાતીરે કૃતામણ્ડલાઃ
તત્સંશ્લેષવિજૃમ્ભિતસ્મરમહાવૈદગ્ધ્યરાસોત્સવાઃ ।
ગાયન્તીર્વ્રજયોષિતો હતહૃદોઽહઙ્કારમાનોન્નતાઃ
ત્યક્ત્વાહઙ્કૃતિનાશનાય વિહરન્નન્તર્દધે માધવઃ ॥ ૬૧૮॥

કરુણયા યદિ દર્શયસિ સ્વયં
નિજમનોહરદિવ્યસુવિગ્રહમ્ ।
અનુભવન્તિ ભવન્તમિહાશ્રિતાઃ
યદિ તથા ન કિમુ પ્રભવન્તિ તે ॥ ૬૧૯॥

સન્નિધાપયતિ સંરિરક્ષયા
ત્વાં દયા ભવદવાપ્તિગર્વિતે ।
આશ્રિતે બત તિરોહિતં તથા
તન્વતી હરતિ ગર્વમચ્યુત ॥ ૬૨૦॥

કદાચિદમ્બિકાવનં પ્રવિશ્ય માધવસ્સુહૃદ્ વૃતઃ
પ્રસૂનકાર્ચિતામ્બિકો વિહારતત્પરશ્ચિરં વને ।
ભુજઙ્ગમાદ્ ગૃહીતમાત્મનન્દમઞ્જસા વ્યમોચયત્
ભુજઙ્ગમઞ્ચ શાપતઃ પદાભિમર્શનેન પાવયન્ ॥ ૬૨૧॥

અનુગ્રહાય શાપોઽપિ કલ્પતે હિ તપસ્વિનામ્ ।
યત્કૃષ્ણચરણસ્પર્શમન્વભૂત્ સ સુદર્શનઃ ॥ ૬૨૨॥

સુખં દુઃખં સર્વં કમલનયન! પ્રાક્તનવિધેઃ
ભવેદ્યદ્ભવ્યં તત્ત્વદમિતકૃપૈકાયતિકૃતે ।
દિને ઘર્મે સૂર્યપ્રતપનપરોસ્રપ્રસરણ-
પ્રતપ્તા ક્ષોણી સ્યાન્નવજલધરાસારશિશિરા ॥ ૬૨૩॥

શઙ્ખચૂડમુપયાતમરણ્યે લીલયૈવ વિનિપાત્ય શિરસ્સ્થમ્ ।
રત્નમગ્રજકરે વિનિવેશ્ય ક્રીડતિ સ્મ સુચિરં વનમાલી ॥ ૬૨૪॥

ભ્રષ્ટરાજ્યકુલે જાતોઽપ્યહરચ્છીર્ષરત્નકમ્ ।
સર્વેષાં રત્નહારિત્વં દર્શયન્નિવ શૈશવે ॥ ૬૨૫॥

ભાઙ્કારભીકરરવં સમુદગ્રપક્ષ્મ-
રક્તેક્ષણં પૃથુલલોલકકુત્કરાલમ્ ।
સૂત્કારવાતધુતભૂમિમૃદં સુશૃઙ્ગં
તં જઘ્નિથાશુ વૃષભં ખુરકીર્ણમૂત્રમ્ ॥ ૬૨૬॥

વ્યાદાય વક્ત્રમભિદર્શિતશુભ્રતીક્ષ્ણ-
દન્તં કરાલનયનં કટુતારહેષમ્ ।
તં કેશિનં ખુરવિઘટ્ટનદીર્ણગોત્રં
વક્ત્રપ્રસારિતભુજો નિજઘાન કૃષ્ણઃ ॥ ૬૨૭॥

વ્યોમાસુરં કપટગોપતનું નિહત્ય
તેનાપહૃત્ય ગિરિકન્દરસન્નિરુદ્ધાન્ ।
ગોપાર્ભકાન્પરિવિમોચ્ય રરક્ષિથ ત્વં
કારુણ્યકાર્યમખિલં ખલુ પઙ્કજાક્ષ ॥ ૬૨૮॥

યથા તુચ્છીકુર્યુઃ પરમપદમપ્યુચ્ચવિભવં
સદાનન્તાનન્દં મધુમથન! કારુણ્યજલધે! ।
ભવલ્લીલાલીના મુખકમલભૃઙ્ગા વ્રજજુષઃ
તથાભૂવન્મગ્નાઃ ભવદનુભવાનન્દજલધૌ ॥ ૬૨૯॥

મધુરાધરચુમ્બિરમ્યવેણું
ચલવલ્લીમિવ ભઙ્ગુરાઙ્ગભઙ્ગીમ્ ।
પરિરભ્ય મુરારિરેષ રાધાં
અભિરેમે સ્મરશાસનાનુરોધામ્ ॥ ૬૩૦॥

નૈવૈકરૂપં કિમપીહ લોકે
દ્વન્દ્વાત્મકે વર્તત ઇત્યભીક્ષ્ણમ્ ।
શંસન્નિવાગાન્નૃપકંસનુન્ન-
સ્સોઽક્રૂરનામા ભગવત્સકાશમ્ ॥ ૬૩૧॥

અક્રૂરઃ પશુબૃન્દમધ્યવિસરદ્ધૂલ્યસ્ફુટાઙ્ગં કન-
ત્સન્ધ્યારાગવિજૃમ્ભમાણકનકત્વિડ્ભાસુરૈકામ્બરમ્ ।
ઘણ્ટાટઙ્કૃતિતાલમિશ્રમુરળીનાદં સુહૃદ્વેલ્લિતં
દૃષ્ટ્વાયાન્તમરણ્યતો મુરરિપું સ્વં ધન્યમામન્યત ॥ ૬૩૨॥

મધુરિપુબલરામૌ સ્યન્દનાન્તર્નિષણ્ણૌ
રચિતસલિલગાહસ્તૌ વિલોક્યામ્ભસિ દ્રાક્ ॥

કિમિદમિતિ સ નીરાદુત્થિતસ્સ્યન્દનસ્થૌ
તદમિતકરુણાં તાં સંસ્મરન્નભ્યનન્દત્ ॥ ૬૩૩॥

રથવરે વિનિવેશ્ય મધુદ્વિષં
હલધરેણ સ સારથિતાઙ્ગતઃ ।
સમનયન્મધુરાં મધુરાનનં
સ્વકૃતપુણ્યફલં મનસિ સ્મરન્ ॥ ૬૩૪॥

સ્મારં સ્મારં તદમિતકૃપાં બાષ્પદિગ્ધેક્ષણોઽયં
દર્શં દર્શં નવઘનરુચં પુણ્ડરીકાયતાક્ષમ્ ।
રોમાશ્લિષ્ટો મનસિ કલયન્ કંસશંસ્યોપકારં
નૈવાક્રૂરઃ પ્રમદજલધેઃ પારદર્શી બભૂવ ॥ ૬૩૫॥

દુષ્ટકંસવશવર્તિનીં ભુવં
પાવયન્નિવ પદાબ્જચઙ્ક્રમઃ ।
કામપાલકલિતો વિલોકયન્
પ્રાવિશત્સ મધુરામધોક્ષજઃ ॥ ૬૩૬॥

કલભગમનં શૌરે! દ્રષ્ટું ભવન્તમિહાદરાત્
કિમિવ રચિતં પુણ્યં કિંવા તપો મધુરાજનૈઃ ।
તવ તુ કરુણાં કિં વા બ્રૂમસ્તપસ્વિસુદુર્લભં
નવઘનનિભં દિવ્યં રૂપં પ્રદર્શિતવાનહો ॥ ૬૩૭॥

મધુરાગૃહમેધિનો ભવન્તં

પરિપીયાક્ષિપુટૈર્હરે! નનન્દુઃ ।
અહમસ્મિ તદા ભવત્કૃપાયાઃ
ન હિ પાત્રં ક્વ ગતઃ કથં સ્થિતિર્મે ॥ ૬૩૮॥

તદા માં નાદ્રાક્ષીરિતિ હૃદિ વિચિન્ત્યાઘિનિ કલૌ
મદર્થં શેષાદ્રૌ કિમુ વસસિ દિવ્યાર્ચ્યતનુભૃત્! ।
અહો તે કારુણ્યં દુરિતનિલયે મય્યપિ હરે!
કૃતાર્થો જાતોઽહં ભવદનુભવેનાદ્ય સુકૃતી ॥ ૬૩૯॥

અધિગતસકલાર્થોઽપ્યર્થયંશ્ચેલમેકં
રજકમકૃતચેલસ્પર્શનં કંસવશ્યમ્ ।
કરહતિગલિતાસું પાતયંશ્ચેલધારી
સપદિ મુમુદિષે ત્વં ચિત્રચેષ્ટોઽસિ શૌરે ॥ ૬૪૦॥

યાચ્ઞાવૃત્તિસ્તવ બહુમતા પ્રાયશો ભૂમિભાગે
લબ્ધ્વા ક્ષોણીં બલિબલિકરાદન્વગૃહ્ણઃ પુરા તમ્ ।
કુબ્જાહસ્તાત્પરિમલયુતં ચન્દનં યાચમાનો
મુગ્ધાં તામપ્યરચય ઇહાનુગ્રહાર્થં હિ યાચ્ઞા ॥ ૬૪૧॥

દિવ્યગન્ધહૃદયઙ્ગમસ્સદા
ચન્દનેન કિમનેન તેઽચ્યુત ।
તાન્તુ વક્રતનુમાર્જવોત્તમાં
કર્તુમેવ કરુણા તવાનઘા ॥ ૬૪૨॥

વિવેકવિકલાન્ સ્વયં સમુપગમ્ય સન્માર્ગગઃ
કથઞ્ચિદપિ કૈતવાત્પ્રકટિતાત્મચિત્રક્રિયઃ ।
કઠોરકુટિલાશયાન્ કૃપણકાનપિ સ્વેચ્છયા
રિરક્ષસિ રમાપતે! વિતનુતે કૃપા ત્વાં તથા ॥ ૬૪૩॥

પાપી કુબ્જો ભવતિ જનિમાન્ વક્ર ઇત્યપ્યુદીર્ણં
સેયં કુબ્જા કુમનુજપતેઃ ભૃત્યભાવં પ્રપન્ના ।
સત્યપ્યેવં યદુકુલમણે! ત્વત્સમાશ્લેષસૌખ્યં
ભેજે રૂપં સ્થિતિમપિ નહિ પ્રેક્ષતે તેઽનુકમ્પા ॥ ૬૪૪॥

કૃતાગસમપિ પ્રભો! ત્વમપદેશતઃ પાલય-
સ્યહો! કિમુત? સંશ્રિતે તવ પદાબ્જદાસે જને ।
ગતોઽસિ તત એવ તત્પ્રસવમાલિકાજીવિકં

ભવદ્ભજનતત્પરં નનુ ગવેષયન્મન્દિરમ્ ॥ ૬૪૫ ॥

સુમનસ્સુ મે તુ મહતી મુદિત્યમું
તવ ભાવમત્ર પરિદર્શયન્નિવ ।
સુમમાલ્યજીવિકગૃહં ગતો ભવાન્
અકરોત્કૃપૈકસદનં તમાદરાત્ ॥ ૬૪૬ ॥

વનમાલાલઙ્કૃતાઙ્ગોઽપ્યરિમાલાભિલાષવાન્ ।
કિમર્થમભવશ્શૌરે! કિં ભક્તાનુજિઘૃક્ષયા ॥ ૬૪૭ ॥

રાજાર્હં પરિમળબન્ધુરં વિચિત્રૈઃ
પુષ્પૌઘૈઃ ગ્રથિતમનોજ્ઞસન્નિવેશમ્ ।
માલ્યં તન્નિજહલિના સ્વયં સમર્પ્ય
ગ્રીવાયાં પ્રમુદિતમાનસોઽભવસ્ત્વમ્ ॥ ૬૪૮ ॥

માલાલઙ્કૃતમમ્બુજેક્ષણમયં નન્દાત્મજો માનયન્
માલાકાર ઇદં મદીયભવનં પૂતં ત્વદઙ્ઘ્ર્યર્પણાત્ ।
ધન્યોઽસ્મીતિ વદન્ સબાષ્પનયનો નૃત્યન્ સતાલં મુહુઃ
શૌરે કિઙ્કરવાણિ તે તુ કરુણાં સઞ્ચિન્ત્ય મૂઢોઽસ્મ્યહમ્ ॥ ૬૪૯ ॥

ઇત્યુદીર્ય કૃતમસ્તકાઞ્જલિઃ
કૃષ્ણપાદનિહિતાત્મમસ્તકઃ ।
બાષ્પવારિપરિમૃષ્ટતત્પદો
હર્ષવારિનિધિમજ્જિતોઽભવત્ ॥ ૬૫૦ ॥

ગત્વા સ્વયં તદ્ગૃહમમ્બુજાક્ષ!
પુષ્પસ્રજા યાચિતયાતિહૃષ્ટઃ ।
તદ્વંશજેભ્યોઽપ્યપવર્ગદોઽભૂઃ
કથં દયાં તાં તવ વર્ણયેયમ્ ॥ ૬૫૧ ॥

પત્રં વા ફલમપિ વા પ્રસૂનમેકં
યો ભક્ત્યા વિતરતિ તેઽમ્બુજાયતાક્ષ! ।
સ્વીકૃત્ય સ્વયમખિલં તદત્ર તસ્મૈ
યચ્છસ્યપ્યનિતરલભ્યમાશુ ભાગ્યમ્ ॥ ૬૫૨ ॥

બાલ્યે ધનુર્વિદલનં રઘુપુઙ્ગવસ્સન્
કૃત્વા વિદેહતનયાકરપીડિતોઽભૂઃ ।

અદ્યાપિ કૃષ્ણ! યદુરાટ્ ધનુષો વિભઙ્ગાત્
કિં પાણિપીડનમુપૈષિ જયશ્રિયસ્ત્વમ્ ॥ ૬૫૩ ॥

ક્ષીરં નિપીય શકટસ્ય તલપ્રદેશે
સુપ્ત્વાનિશં હિમમયીં અતિવાહ્ય શૌરે! ।
ઉત્તિષ્ઠતિ સ્મ સ ભવાન્ ભગવન્! પ્રભાતે
ધિઙ્માનુષત્વમિદમત્ર દયૈકકાર્યમ્ ॥ ૬૫૪ ॥

વાત્સલ્યપૂર્ણહૃદયસ્ય તવોચિતેયં
ગોપાલકૈશ્શકટમૂલતલેઽપિ શય્યા ।
અસ્નાતગોપતનુદોષસુભોગ્યતાત્ત-
હર્ષપ્રકર્ષપરિપુષ્ટમના યતસ્ત્વમ્ ॥ ૬૫૫ ॥

ઇન્દ્રાદયોઽપિ સવનાહુતહવ્યભાગ-
માદાતુમત્ર નરદોષપરાઙ્મુખાસ્યાઃ ।
આયાન્ત્યગોચરશરીરવરા મુરારે!
શક્રાર્ચિતાઙ્ઘ્રિકમલોઽપ્યસિ ગોપબાલૈઃ ॥ ૬૫૬ ॥

જ્ઞાતોદન્તસ્સ તુ કુવલયાપીડમાસાદ્ય મત્તં
નાગેન્દ્રં દ્રાગુપરિ પતિતં શુણ્ડયા તાડયન્તમ્ ।
ઉત્પાટ્યૈકં મુસલસદૃશં દન્તમાહત્ય તેન
સ્ફીતે કુમ્ભે વિવિધગમનઃ પાતયામાસિથોર્વ્યામ્ ॥ ૬૫૭ ॥

ગજે નિપતિતે કૃષ્ણઃ કિશોરઃ ખેલનોત્સુકઃ ।
રેજે શિલોચ્ચયપ્રસ્થે ઘનપોત ઇવ સ્થિતઃ ॥ ૬૫૮ ॥

કૃષ્ણાયેદમિતિ પ્રશસ્તકુસુમસ્રક્ચ્યૂતરમ્ભાવલિં
શ્વેતોલ્લોચતલાભિલોલવિલસન્મુક્તાકલાપાઞ્ચિતમ્ ।
કંસો મણ્ડપમાવિશન્યદુશિશોરભ્યાગમે કૌતુકી
ભીત્યા સન્તતકૃષ્ણનામહૃદયો નિર્ણિક્તપાપોઽભવત્ ॥ ૬૫૯ ॥

સમુત્સારિતજિહ્માગ્રકુન્તલો મધુસૂદનઃ ।
ચાણૂરં ચૂર્ણયામાસ ચારુચન્દ્રનિભાનનઃ ॥ ૬૬૦ ॥

શુભ્રતૂલકૃતકન્દુકોપમો
મલ્લતલ્લજકરે વિવલ્ગનઃ! ।
મુષ્ટિપાતહતમુષ્ટિકોઽભવ -

દ્રઙ્ગવાધલયચઙ્ક્રમો હલી ॥ ૬૬૧॥

ક્વ શિક્ષિતા નાથ! નિયુદ્ધવૈખરી
પ્રચણ્ડમલ્લપ્રતિયુદ્ધપણ્ડિતઃ ।
કિશોર એવાસિ હિ સર્વશક્તતા
ક્વ યાતિ તે મર્ત્યતનોરપિ પ્રભો ॥ ૬૬૨॥

ગોવર્ધનં ગિરિવરં શ્રિતરક્ષણાર્થં
એકાઙ્ગુલીશિખરતો દિવસાંશ્ચ સપ્ત! ।
બાલ્યે પ્રભો! ધૃતવતસ્તવ લીલયૈવ
મલ્લાઃ કિયન્ત ઇહ સલ્લપનપ્રફુલ્લાઃ ॥ ૬૬૩॥

કર્તવ્યશૂન્યહૃદયં કૃતદૌસ્થ્યચિન્તં
વ્યર્થોદ્યમં ભયવિઘૂર્ણિતમાશુ કંસમ્ ।
સિંહાસનાદ્ભુવિ નિપાત્ય સમુત્પ્લુતસ્ત્વં
મુષ્ટ્યાહતિપ્રહતમાતનુષે સ્મ કૃષ્ણ ॥ ૬૬૪॥

વિધિવિલસિતં કર્તું કોવાન્યથા ચતુરો ભવેત્
યદભિહનને કંસો હિંસ્રાન્મુહુઃ પરિનોદયન્ ।
અપિ વિનિહતસ્તેનૈવાયં દુરધ્યવસાનતઃ
તદિહ કરુણા શૌરેઃ પાપાત્મનાં શરણં સદા ॥ ૬૬૫॥

ધન્યઃ કંસો યદનવરતં કૃષ્ણનામૈકચિત્તો
દર્શન્દર્શં સ્વયમુપગતં તસ્ય સૌન્દર્યમુગ્ધઃ ।
સાક્ષાત્તેન પ્રયતતનુના સ્પૃષ્ટમાત્રો ગતાસુઃ
તત્પાદાબ્જે વિનિહિતશિરાઃ ધ્વસ્તપાપો બભૂવ ॥ ૬૬૬॥

નિન્દા ભક્તિર્ભીતિરપ્યત્ર યેન
પ્રાયસ્ત્વય્યેવાર્પ્યતે કાપિચૈકા ।
તસ્મૈ શ્રીમંસ્ત્વત્કૃપા તારતમ્યં
ત્યક્ત્વા શ્રેયો દાસ્યતિ પ્રાપ્તકામા ॥ ૬૬૭॥

યદ્યપ્યચ્યુત! તે તુ માતૃસદૃશી સર્વૈકરૂપા કૃપા
શ્રેયો દાસ્યતિ તત્ર નૈવ બહુશઃ કાર્યા હિ ચર્ચા હરે! ।
સત્યપ્યમ્બુજપત્રનેત્ર! ભવતિ પ્રીત્યૈવ યો વર્તતે
તસ્યાનન્દલવોઽસ્તિ કિં ભુવિ તયોસ્તદ્ભિન્નયોરન્યયોઃ ॥ ૬૬૮॥

પિતરૌ વિમોચ્ય નિગલાદ્ ઘનદ્યુતિઃ
તદવાપ્તગાઢપરિરમ્ભણોત્સવઃ ।
ગલિતાશ્રુલોચનચિરાવલોકિતઃ
કૃતકૃત્યતામમનુતાત્મનિ પ્રભુઃ ॥ ૬૬૯॥

સંસારઘોરનિગલાત્પરિમોચયિત્રે
તુભ્યં નમોઽસ્તુ કરુણાકર! દિવ્યમૂર્તે! ।
અસ્માદયોનિગલનાત્પરિમોચિતોઽસ્મી-
ત્યત્ર પ્રમુગ્ધહૃદયઃ કિમહં વદેયમ્ ॥ ૬૭૦॥

અભયદાતરિ હન્ત! ભવત્યપિ
પ્રતિકલં રિપુભીતિરશઙ્ક્યત! ।
વિતનુતે ત્વયિ વત્સલતા તથા
ન મમ યાતિ મતિસ્તવ શક્તિષુ ॥ ૬૭૧॥

આમનન્તિ નિગમૈકગોચરં
પણ્ડિતા નનુ ભવન્તમચ્યુત! ।
વેદ્મ્યહં મમ ભવન્તમર્ભકં
માયયૈવ તવ મોહિતોઽસ્સ્મ્યતઃ ॥ ૬૭૨॥

એકૈકમદ્ભુતતમં તવ બાલ્યકાર્યં
સઞ્ચિન્ત્ય વર્ષ્મ પુલકાઞ્ચિતમમ્બુજાક્ષ! ।
આસીત્તથાપિ મમ પુત્રતયાતિખિન્નો
નૈવાસ્મરં સકલદુઃખહરં ભવન્તમ્ ॥ ૬૭૩॥

નન્દસ્ય ભાગ્યમિહ મે ન હિ નન્દસૂનો!
બાલ્યે મનોહરવિહારપરમ્પરાં તે ।
ભૂયોઽનુભૂય મુદિતો ભવસારપારં
પશ્યન્ કૃતાર્થિતજનિર્યદભૂદ્વ્રજે સઃ ॥ ૬૭૪॥

યશોદાયા ભાગ્યં કિમિતિ નિગદેયં કથમહં
પિબન્તં સ્તન્યં ત્વાં મરકતનિભં સ્વાઙ્કુશયિતં! ।
પ્રફુલ્લાસ્યામ્ભોજપ્રહિતનયનં વીક્ષ્ય મુમુદે
તદેતદ્દેવક્યા ન હિ ખલુ મહાભાગ્યમવનૌ ॥ ૬૭૫॥

પૂતોદકૈસ્સ્નાપનમન્નદાનં
પુષ્પાદ્યલઙ્કારપરિષ્કૃતિઞ્ચ ।

કૃત્વા યશોદા યદુનાથ! તુભ્યં
સા ધન્યધન્યા મુદિતા બભૂવ ॥ ૬૭૬॥

શઙ્કમાનહૃદયઃ પ્રતિક્ષણં
દુષ્ટકંસભયમચ્યુત! ત્વયિ ।
જર્ઝરીકૃતમનાસ્સદાભવં
હન્ત! સોઽપિ નિહતો હિ ઘાતુકઃ ॥ ૬૭૭॥

કિં ભાગ્યં વ્રજવાસિનાં કિમુ ગવાં કિં બાલકાનાં તથા
બૃન્દાખ્યસ્ય વનસ્ય કિં રવિસુતાનદ્યા વધૂનાં કિમુ ॥

વત્સાનાં કિમુ તૈઃ પુરા વિરચિતં પુણ્યં તપો વા વ્રતં
હે ગોવિન્દ! ભવત્પદામ્બુજરજોધન્યાસ્સમસ્તા અપિ ॥ ૬૭૮॥

ઇત્યુક્તવન્તં પિતરં પ્રણમ્ય
કૃષ્ણોઽબ્રવીત્તાત! ભવદ્વિયુક્તઃ ।
નાહં ત્વદાનન્દકૃદર્હસિ ત્વં
ક્ષન્તું હિ મન્તું મમ સમ્પ્રતીતિ ॥ ૬૭૯॥

સઙ્કર્ષણં સર્વજનાક્ષિકર્ષણં
ગાઢં સમાલિઙ્ગ્ય જગાદ દેવકી ।
પશ્યામિ દિષ્ટ્યા નનુ વત્સ! ગોવ્રજે
ત્વાં ક્લિષ્ટમિષ્ટૈર્વનચઙ્ક્રમૈરિતિ ॥ ૬૮૦॥

બદ્ધં તં સપદિ વિમોચ્ય ચોગ્રસેનં
રાજાનં પુનરપિ કારયન્ સ કૃષ્ણઃ ।
સ્વં ધર્મં પ્રકટિતવાન્યદૂદ્વહાનાં
પ્રભ્રષ્ટક્ષિતિપરિભૃટ્ત્વ રૂપમીડ્યઃ ॥ ૬૮૧॥

અસઙ્ખ્યબ્રહ્માણ્ડપ્રકટિતનિજૈશ્વર્યવિભવઃ
સમસ્તાન્તર્યામી યદુકુલમણે! કિન્તવ ભુવા ।
નરૈસ્સર્વૈરેવં વિધિનિયમવશ્યત્વમનિશં
સુપાલ્યં ધીરૈરિત્યનુરચિતકર્મોપદિશસિ ॥ ૬૮૨॥

નિયામકત્વે સ્વત એવ સિદ્ધે
કેનાપિ દાતવ્યમિહાસ્તિ કિન્તે ।
તથાપિ લોકાનુસૃતૌ કૃતાત્મા

ભ્રષ્ટોऽસિ રાજ્યાદિતિ તદ્વિચિત્રમ્ ॥ ૬૮૩॥

સઙ્કલ્પમાત્રપરિકલ્પિતસર્વજન્તુ-
વૃત્ત્યુત્થમત્યનુગુણપ્રચુરપ્રવૃત્તિઃ ।
ત્રૈલોક્યરક્ષણપરોऽસિ યદૂત્તમ! ત્વં
રાજેવ શાસનપરઃ કિમુ રક્ષણાર્થમ્ ॥ ૬૮૪॥

અન્તઃ પ્રવિષ્ટશ્ચ ચરાચરાણાં
યથોચિતસ્થાનનિવેશયોગ્યાન્ ।
બિભર્ષિ તાનમ્બુજપત્રનેત્ર!
સૂત્રં વિચિત્રાનિવ રત્નસઙ્ઘાન્ ॥ ૬૮૫॥

નન્દં વિલોક્ય કરુણારસપૂરિતાક્ષો
બૃન્દાવનં કિમભિયાસિ સુહૃત્સમેતઃ ।
વાત્સલ્યપૂર્ણહૃદયો મયિ મન્મનાસ્ત્વં
સર્વસ્વદાનનિરતસ્સમપાલયો મામ્ ॥ ૬૮૬॥

ઇતિ નિગદિતં શ્રુત્વા નન્દોऽપ્યાનન્દિતમના મનાક્
નિજભુજસમાશ્લિષ્ટં કૃષ્ણં સબાષ્પનયનોऽબ્રવીત્ ।
કિમિદમુચિતં કૃષ્ણ! શ્રીમંસ્ત્વયૈવ પરિરક્ષિતાઃ
વયમિહ મુહુશ્શત્રુવ્રાતાત્કૃપૈકનિલયાચ્યુત ॥ ૬૮૭॥

ત્વય્યાગતે તૃણજલાદિસમૃદ્ધિરાસીત્
ગાવોऽપિકુમ્ભપયસઃ પરિપુષ્ટગાત્રાઃ ।
હૃષ્ટા બભૂવુરખિલા વ્રજબાલકાશ્ચ
યોષાઃ ભવત્સહવસત્યનઘાત્મ ભૂષાઃ ॥ ૬૮૮॥

ત્વત્પાદપઙ્કજરજઃપરિપૂતધન્યં
બૃન્દાવનં સકલભાગ્યનિતાન્તભોગ્યમ્ ।
સાન્નિધ્યતસ્તવ મહોત્સવપુષ્ટમાસીત્
તત્ત્વાં વિના કથમહં વિકલં વિશેયમ્ ॥ ૬૮૯॥

ત્યક્ત્વા તૃણં જલમપિ પ્રતિપન્નમૌનાઃ
ગાવોऽપિ કૃષ્ણ! ભવદાગમનાધ્વનેત્રાઃ ।
હુઙ્કારમાત્રપરિદર્શિતદૈન્યદુઃખાઃ
ગોષ્ઠેષુ સન્તિ કથમેત્ય વિલોકયેયમ્ ॥ ૬૯૦॥

કંસં નિહત્ય પુનરપ્યભિયાસ્યતીતિ
ગોપાઙ્ગનાઃ કૃતધિયસ્ત્વદનન્યભાવાઃ ।
રાત્રન્દિવં નનુ હરે! પ્રતિપાલયન્તિ
મામેકમાગતમવેક્ષ્ય કથં ભવેયુઃ ॥ ૬૯૧॥

પુષ્પાણ્યરણ્યે વિવિધાનિ કૃષ્ણ!
મ્લાનાનિ તત્રૈવ પતન્તિ ભૂમૌ ।
રાજ્યે સ્થિતે ત્વય્યપિ તાનિ કો વા
સાનન્દમાદાસ્યતિ ધારણાર્થમ્ ॥ ૬૯૨॥

યા ભીત્યા નવનીતદુગ્ધદધિભૃદ્ભાણ્ડોપગૂહોત્સુકાઃ
તા એવાદ્ય સમર્પણાય ભવતે હસ્તોદ્ધૃતં ત્વત્પ્રિયમ્ ।
એહ્યેહીતિ સબાષ્પગદ્ગદગિરસ્ત્વામાહ્વયન્ત્યાદરાત્
તદ્ગોવિન્દ! મયૈવ સમ્પ્રતિ સમાયાહિ વ્રજં સાગ્રજઃ ॥ ૬૯૩॥

રાધેવ ગાનવિમુખી મુરલી મુકુન્દ!
વાતાતપાભિનિહતા ભવદાપ્તિકામા ।
ભૂમૌ લુઠત્યવિરતં દયનીયશોભા
તત્સાન્ત્વનાય સમુપૈહિ મયા વ્રજં ત્વમ્ ॥ ૬૯૪॥

શ્રુત્વા નન્દવચો વિયોગશિથિલં હૃદ્દ્રાવિ કૃષ્ણોઽબ્રવીત્
કર્તવ્યં બહુ વર્તતેઽત્ર નિતરામાયાતુમેવોત્સહે ।
નાહં સમ્પ્રતિ યાતુમર્હથ પુનર્દ્રષ્ટું વ્રજેયં વ્રજં
ત્વિત્થં સાન્ત્વનતત્પરો મુરરિપુસ્સમ્પ્રેષયામાસ તાન્ ॥ ૬૯૫॥

સવિધિ સમુપનીતૌ રામકૃષ્ણૌ સ્વપિત્રા
ગુરુમુખમધિગન્તું સર્વવિદ્યાઃ પ્રયાતૌ ।
વિનમિતશિરસૌ સાન્દીપનિં પ્રાપ્ય હૃષ્ટૌ
નિજગુરુવરિવસ્યાસક્તચિત્તૌ સમાસ્તામ્ ॥ ૬૯૬॥

સકૃદુક્તં પુનર્નૈવ વિષયગ્રાહિણોસ્તયોઃ ।
વિદ્યાધિદેવતે તૌ તુ લોકસઙ્ગ્રહતત્પરૌ ॥ ૬૯૭॥

અનુગ્રહકૃતાદરં કલયતિ પ્રિયા સા દયા
ભવન્તમિહ યોજયત્યનિયતક્રિયાયાં છલાત્ ।
જગદ્ગુરુમપિ સ્વયં ગુરુવશં વ્યતાનીત્તથા
વ્યદાપયદહો! ગુરોસ્તનયમબ્ધિગં દક્ષિણામ્ ॥ ૬૯૮॥

એવં ક્ષિતૌ મનુજતાકૃતચિત્રકર્મા
શ્રી વેઙ્કટેશ! કરુણાપરિચોદિતસ્સન્ ।
મૌઢ્યાદ્ભવત્પરિભવૈકહૃદો મનુષ્યાન્
સઞ્ચિન્ત્ય પર્વતતટેઽસિ કિમર્ચ્યમૂર્તિઃ ॥ ૬૯૯॥

કથમપ્યમતીન્નરાનધીનાન્
કરવાણીતિ કૃતપ્રતિજ્ઞ એવ ।
અહિશૈલતટે વિચિન્તયન્ કિં
જનભાવસ્મરણાત્કૃતસ્મિતોઽસિ ॥ ૭૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
સપ્તમશતકં સમ્પૂર્ણમ્ ।

## ૮. અષ્ટમશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમદ્વેદાન્તદેશિકાય નમઃ ।
અથ દયાસહસ્રે અષ્ટમશતકમ્ ।

અભિહિતં વચનં પરિરક્ષિતું
પુનરપિ પ્રતિપદ્ય યશસ્વિનીમ્ ।
સુરભિચન્દનદાં મધુરાનનાં
તદભિલાષમપૂરયદચ્યુતઃ ॥ ૭૦૧॥

નિરાતઙ્કાપરિચ્છિન્નસદાનન્દઘનસ્ય તે ।
અન્યાપેક્ષા મુદે કિં વા કૃપાકાર્યમિદં ખલુ ॥ ૭૦૨॥

ભક્તાનાં મુદમેવ હન્ત! મનુષે સ્વીયાં મુદં શ્રીપતે!
તેષાં દુઃખમવૈષિ દુઃખમમિતં સ્વીયં કૃપાવારિધે! ।
તદ્ભક્તૈર્યદપેક્ષ્યતે તદચિરાત્સમ્પૂરયસ્યાદરાત્
આત્માર્થં ન કિમપ્યપેક્ષિતમયે! સમ્પૂર્ણકામો ભવાન્ ॥ ૭૦૩॥

સ્વકીયાવિર્ભાવં સફલયિતુકામો યદુપુરી-

નિવાસશ્શ્રીવાસો ઘનરુચિપટપ્રેમમુદિતઃ ।
વધાય પ્રત્યર્થિપ્રવરનિકરાણાં કૃતમનાઃ
મનાગ્બીજાવાપં સપદિ કૃતવાન્ કંસમુખતઃ ॥ ૭૦૪॥

અનેકવારં મગધેશ્વરેણ
સંયુધ્ય તં કાલયસિ સ્મ શૌરે! ।
સમસ્તશક્તસ્ય કિયાનયં તે
ક્રીડસ્યહો! માનુષયોગ્યકૃત્યઃ ॥ ૭૦૫॥

સૃષ્ટિં સ્થિતિં લયમપિ પ્રભવં ત્રિલોક્યાઃ
સઙ્કલ્પતો રચયિતું કિમિદં મુકુન્દ! ।
આજ્ઞાનુવર્તિ સકલાયુધચક્રવર્તિ
જાગર્તિ ચક્રમનિશં ભવદીયપાણૌ ॥ ૭૦૬॥

એકતો યવનપીડનં જરા-
સન્ધયુદ્ધમપરત્ર ચિન્તયન્ ।
દ્વારકાં જલનિધાવકારયો
દિવ્યસમ્પદમયે! મયેન હિ ॥ ૭૦૭॥

રત્નાકરોપરિ સુરત્નપુરી ત્વદીયા
સા દ્વારકા સુરપુરીતરુરત્નદીપ્રા! ।
વેદાન્તવેદ્યમહિમા તવ વાગતીતઃ
સત્યેવમપ્યનુકરોષિ મનુષ્યચેષ્ટામ્ ॥ ૭૦૮॥

કથં વા શૌરે! ત્વં જલનિધિજલે દિવ્યનગરીં
વિશાલાં નિર્માપ્ય સ્ફુરદુદધિના ધારયસિ તામ્ ।
પુરા રામત્વેઽપિ પ્રબલજલધૌ સેતુમતુલં
નલેનૈતદ્યુક્તં તવ તુ વિતતં કારિતવતઃ ॥ ૭૦૯॥

ભયકૃદ્ભયનાશનોઽપિ શૌરે!
યવનાદ્ભીત  ઇવ પ્રધાવ્ય દૂરમ્ ।
અમુના યવનેન વીક્ષ્યમાણો
હ્યવિશઃ પર્વતકન્દરોદરં દ્રાક્ ॥ ૭૧૦॥

ધન્યોઽયમેવ યવનો યદમું ભવન્તં
પીતામ્બરં ઘનરુચિં નલિનાયતાક્ષમ્ ।
પઞ્ચાયુધાઞ્ચિતચતુર્ભુજદણ્ડમીડ્યં

મત્તેભધાવનમપશ્યદચિન્ત્યરૂપમ્ ॥ ૭૧૧॥

મુચુકુન્દદૃશા વિનાશ્ય વીરં યવનં તત્પ્રતિબોધનાપરાધમ્ ।
પ્રકટીકૃતવાન્ ફલં હ્યવાર્યં ભગવદ્ભક્તકૃતાગસાં મુકુન્દ ॥ ૭૧૨॥

જીમૂતકાન્તરુચિપઙ્કજપત્રનેત્રં
ચક્રાબ્જનન્દકગદારમણીયહસ્તમ્ ।
કસ્તૂરિકાતિલકફાલમરાલવાલં
દિવ્યસ્વરૂપમયિ! દર્શિતવાનમુષ્મૈ ॥ ૭૧૩॥

સુપ્તં વ્યુત્થાપ્ય કરુણે! મુચુકુન્દં વ્યદાપયઃ ।
દિવ્યરૂપં મુકુન્દસ્ય તસ્મૈ યોગિભિરીપ્સિતમ્ ॥ ૭૧૪॥

જરાસન્ધાદ્ભીતો હલધરયુતો ધાવનપટુઃ
સમુત્સેધે શૈલે પિહિતતનુરપ્યલ્પમતિના ।
ગિરૌ દગ્ધે તસ્માત્પ્લુતિગતધરઃ ક્વાપિ નિરગાઃ
વિચિત્રા લીલા તે પરમપુરુષસ્યાપિ ધરણૌ ॥ ૭૧૫॥

નવનીતચૌર્યચિરવાસનાબલાત્
નવનીતકોમલતરાચ્છમાનસામ્ ।
અપહર્તુમેવ કૃતધીરભૂઃ કિમુ
પ્રસભં મુકુન્દ! ભવદીયરુક્મિણીમ્ ॥ ૭૧૬॥

નિકષોપલકૃષ્ટહેમરેખા-
સદૃશી તાવકવક્ષસિ પ્રસક્તા ।
મુમુદે નનુ રુક્મિણી મુરારે!
ભવદીયાપ્તિવિધાવપિ શ્રમસ્તે ॥ ૭૧૭॥

પ્રમથ્યાબ્ધિં પૂર્વં સમધિગતવાન્ પદ્મનિલયાં
ધનુર્ભઙ્ગાત્સીતાં જનકતનયામાપિથ હરે! ।
ઇદાનીમપ્યેવં યુધિ જિતરિપુર્ભીષ્મકસુતાં
શ્રમેણ સ્વાયત્તીકૃતચકિતદારોઽસિ કિમિદમ્ ॥ ૭૧૮॥

અથવા સતિ પુષ્કલેઽપિ વિઘ્ને
તદપોહ્યાશ્રિતરક્ષણં તનોમિ ।
ઇતિ દર્શયિતું કિમમ્બુજાક્ષ!
શ્રમનિર્વાસિતવિઘ્ન એવ જિષ્ણુઃ ॥ ૭૧૯॥

દયિતયા પ્રતિષિદ્ધવધં હરે!
સમભિરક્ષિતવાનપરાધિનમ્ ।
કરુણયા નનુ રુક્મિણમાહવે
પુરુષકારધુરા વચનાતિગા ॥ ૭૨૦॥

પુરા યેનાકારિ પ્રધનભુવિ સાહ્યં નિરુપમં
નિયુદ્ધં તેનાસીત્તવ જરઠભલ્લૂકપતિના ।
અનુગ્રાહ્યે જન્તૌ કથમપિ હરે! કામપિ દયાં
વિતન્વન્મોહાત્તં વિઘટયસિ દત્તાત્મવિભવઃ ॥ ૭૨૧॥

સ્વાઙ્ગાભિમર્શનસુખાનુભવેન બાલ્યે
નીરાભિખેલનવિધૌ જનિતાનુરાગામ્ ।
સૂર્યાત્મજાં ત્વદનુચિન્તનધન્યધન્યાં
આમોદયઃ કરુણયા પરિણીય શૌરે ॥ ૭૨૨॥

મન્દાક્ષમન્દધિષણાન્ ધુતગર્વગન્ધાન્
આન્દોલયન્નરપતીંશ્ચિરનિન્દનાર્હાન્ ।
ગોવિન્દ! સુન્દરમુખીં નનુ મિત્રવિન્દાં
વિન્દન્નનન્દિથ મિલિન્દ ઇવારવિન્દમ્ ॥ ૭૨૩॥

દુર્દાન્તદૃપ્તદુરવગ્રહદુર્વિનીતાન્
સપ્તાપિ કૃષ્ણ! વૃષભાન્ દમનેન વશ્યાન્ ।
સપ્તાકૃતિર્નનુ વિધાય કરગ્રહેણ
સત્યામવાપિથ ચ નાગ્નજિતીં કૃપાલો! ॥ ૭૨૪॥

શ્રુતકીર્તિસુતાં મુકુન્દ! ભદ્રાં
નનુ ભદ્રાવયવાં કુરઙ્ગનેત્રીમ્ ।
વિધિવત્કરપીડનેન શૌરે!
દયિતામાપિથ મોદયન્ કૃપાલો! ॥ ૭૨૫॥

મદ્રાધિનાથતનયાં નનુ લક્ષ્મણાઞ્ચ
ભૂપાલમણ્ડલપરિષ્કૃતમણ્ડપસ્થામ્ ।
સર્વેષુ રાજસુ મિષત્સુ ચ જહ્રિથ દ્રાક્
તાર્ક્ષ્યસ્સુધામિવ જનાર્દન! તાર્ક્ષ્યકેતો! ॥ ૭૨૬॥

નરકં વિનાશ્ય નરકં યથા નૃણાં
નિગલીકૃતાસ્તુ સુરસુન્દરીસમાઃ ।

નિજરૂપસક્તહૃદયા નિતમ્બિનીઃ
સમનીનયો હિ કૃપયા પુરં સ્વકમ્ ॥ ૭૨૭॥

નરકાપહૃતે સુકુણ્ડલે ત્વિ-
ડ્ઢસિતાદિત્યરુચી સમર્પ્ય તસ્યૈ ।
કૃપયા કુલિશાયુધસ્ય માત્રે
કૃતકૃત્યત્વમદર્શયો હિ શૌરે ॥ ૭૨૮॥

એવં સાહ્યકૃદપ્યમેયવિભવો વજ્રાયુધેનાહવે
દ્વિષ્ટસ્તં પ્રવિજિત્ય દિવ્યમધુલિટ્ ઝઙ્કારસુસ્વાગતમ્ ।
તાર્ક્ષ્યે ન્યસ્ય ચ પારિજાતમમિતામોદપ્રસૂનાઞ્ચિતં
સત્રાજિત્તનયાવનીં સમનયો માયાહ્યચિન્ત્યા તવ ॥ ૭૨૯॥

માનાપનોદાય નર્મોક્તિવેત્તા
શ્રીરુક્મિણીદૃઙ્હૃત્કૃન્તનોક્ત્યા ।
તાં રોદયન્ સાન્ત્વનોક્ત્યાપિ શૌરે!
પ્રાહર્ષયઃ પ્રાણિસદ્ધર્મકાઙ્ક્ષી ॥ ૭૩૦॥

સ્વપુત્રપૌત્રાદિવિવાહકાલે
તાનન્તરાયાન્ પ્રવિજિત્ય શત્રૂન્ ।
અમાનુષેણાત્મબલેન શૌરે!
ત્વદીયરક્ષાં બહુધા વ્યતાનીઃ ॥ ૭૩૧॥

ત્વદીયાર્થં શ્રીમન્મનુજતનુરપ્યદ્ભુતવિધિઃ
ધરણ્યાં પ્રત્યૂહપ્રશમનકૃતે ક્લેશમમિતમ્ ।
સમારોપ્ય શ્રેયો વિતરસિ નતેભ્યો યદુપતે!
દયાં તે નિસ્સીમાં કથયિતુમનીશસ્ત્વમપિ હિ ॥ ૭૩૨॥

કૃકલાસમનલ્પવર્ણદેહં
મુહુરાવલ્ગિતમસ્તકં પ્રહિસ્થં! ।
કૃપયાનુજિધૃક્ષુરાત્મહસ્તા-
દુદબિભ્રસ્તવ કાર્યમેતદેવ ॥ ૭૩૩॥

નૃગચક્રવર્તિનમનલ્પદાયિનં
દ્વિજયુગ્મધર્ષણનિરસ્તવૈભવમ્ ।
સમુદસ્ય કૂપકુહરાત્કૃપાનિધે!
પતિતોદ્ધરત્વમભિદર્શિતં ત્વયા ॥ ૭૩૪॥

મુનિપુઙ્ગવૈર્મુહુરભિષ્ટુતો ભવાન્
ધરણીસુરેષુ દૃઢદર્શિતાદરઃ ।
દ્વિજવિત્તચૌર્યફલમપ્યુદાહરન્
નૃગચક્રવર્તિકથયૈવ રૌરવમ્ ॥ ૭૩૫॥

નીલામ્બરો વ્રજમુપેત્ય પુનશ્ચ તત્ર
નિર્વર્તિતોત્સવનિરુત્સુકદેશકલ્પે! ।
તેષાં મુકુન્દવિરહાતુરમાનસાનાં
બાષ્પૈસ્સ્વયઞ્ચ સમભાગભવદ્વિયોગે ॥ ૭૩૬॥

પૌણ્ડ્રકવાસુદેવમુપકલ્પિતતાર્ક્ષ્યરથં
કૃત્રિમશઙ્ખચક્રભુજમીપ્સિતતત્પ્રધનમ્ ।
ચક્રનિકૃત્તમસ્તકમપતયદલ્પમતિં
કૃષ્ણ! ભવાન્ દુરધ્વગવિનાશકૃતે ત્વમભૂઃ ॥ ૭૩૭॥

કાશીં તત્પ્રભુમપ્યનાદિનિધને કૃત્યાનિકૃત્યુત્સુકં
ચક્રેણ જ્વલનત્વિષા સમદહસ્સ્ફીતસ્ફુલિઙ્ગાર્ચિષા ।
દૈત્યધ્વાન્તદિવાકરે ત્વયિ ભવન્ત્યૌદ્ધત્યદુર્માર્ગગાઃ
જ્વાલાયાં શલભા ઇવ પ્રતિભટાઃ કિં ચિત્રમત્રાચ્યુત ॥ ૭૩૮॥

રઘુવીરરામચરણાબ્જભક્તિભાક્
અભવત્પુરાણકપિપુઙ્ગવસ્તુ યઃ ।
યદુવીરરામપરિપન્થિનં સ તં
દ્વિવિદં જઘાન યુગધર્મ ઈદૃશઃ ॥ ૭૩૯॥

યદુનાથષોડશસહસ્રસુન્દરીઃ
સમકાલ એવ સમસઙ્ખ્યકાયભાક્ ।
સમનન્દયસ્સુરતિકેલિકોવિદઃ
તવ કારણં હિ કરુણા તથાસ્થિતેઃ ॥ ૭૪૦॥

સઙ્કલ્પિતં નાથ! યથા તથૈવ
ભક્તાવનાર્થં ક્રિયતે ત્વયા હિ ।
શક્તોઽપિ ભીમેન ગતાસુમાજૌ
ત્વં કારયામાસિથ માગધં તમ્ ॥ ૭૪૧॥

બન્ધાદ્વિમોચ્ય નૃપતીન્ પ્રવિતીર્ય તેભ્યો

વસ્ત્રાદિ વસ્તુ વિનુતો વિનતૈર્મુદા તૈઃ ।
સ્વીયેષુ રાજ્યવિભવેષુ પુનર્નિયોજ્ય
તાનાવિથાચ્યુત! દયા તવ વાગતીતા ॥ ૭૪૨॥

પ્રત્યૂહવિધ્વંસનપૂર્વકં ત્વત્-
પદાબ્જસેવારતમાનસાનામ્ ।
સત્કર્મ નિર્વર્તયસીહ શૌરે!
ચિત્રં ન ચૈતત્કરુણા તવૈવમ્ ॥ ૭૪૩॥

યુધિષ્ઠિરમખં હરે! સુમુખમન્તરાયં વિના
સહોદરભુજાર્જિતૈઃ કનકવસ્ત્રવસ્વાદિભિઃ ।
યથાવિધિ વિધાપયન્નિગમપારગૈસ્તાપસૈઃ
નૃપોત્તમશિરોમણિં વ્યતનુથાઃ પૃથાયાસ્સુતમ્ ॥ ૭૪૪॥

યસ્સમતન્તુતનુભૃધ્દુતભુક્ સ્વરૂપો
મન્ત્રાત્મકસ્સુરમયો હુતહવ્યભોક્તા ।
તસ્મિંસ્થિતે ત્વયિ ધુરિ ક્રતુરાજમેનં
ધર્મો વ્યધાદિતિ કિમત્ર મુકુન્દ! ચિત્રમ્ ॥ ૭૪૫॥

શ્રિયશ્શ્રીસ્ત્વં શ્રીમન્યદુકુલમણે! કામપિ કૃપાં
વિતન્વન્નિર્વ્યાજં નિવસસિ સુહૃદ્યત્ર નિતરામ્ ।
કથં ન સ્યાત્તસ્મિન્નિરવધિ નિધીનામુપચયઃ
તદસ્મિન્નિર્હેતુ પ્રહિણુ કરુણાં તાદૃશગુણામ્ ॥ ૭૪૬॥

વિતર્કસન્દિગ્ધમનસ્સુ સભ્યે-
ષ્વભ્યર્હણે જ્ઞસ્સહદેવ એકઃ ।
ભવન્તમેકં નનુ નિશ્ચિકાય
સર્વેઽપ્યમિત્યચ્યુત! ધન્યધન્યઃ ॥ ૭૪૭॥

સભાજનાર્હં બહુધા વિગર્હન્
સભાજનાર્હં કમલાસખ! ત્વામ્ ।
સ ચેદિરાજસ્સુકૃતી કિમાહો-
સ્વિત્પાપકૃદ્યત્તવ પાદમાપ ॥ ૭૪૮॥

નાનાશાસ્ત્રપ્રબલધિષણા અપ્યપારાર્હણાર્હાઃ
વિદ્વાંસસ્ત્વાં યદુકુલમણે! નૈવ જાનન્તિ દૃપ્તાઃ ।
કારુણ્યં તે યદુપરિ પતત્યમ્બુજાક્ષ! પ્રતીક્ષ્યં

લક્ષ્મીશં ત્વાં પ્રથિતવિભવં શુદ્ધસત્વસ્સ વેત્તિ ॥ ૭૪૯॥

ચેદિરાજચરિતાનુચિન્તના-
ન્નષ્ટભીતિરહમસ્મિ સામ્પ્રતમ્ ।
નિન્દતેઽપિ નિજપાદપઙ્કજં
યચ્છસિ સ્મ કૃપયા યદચ્યુત ॥ ૭૫૦॥

સજ્જોઽભવો હિ સવનાગતમાનવાનાં
પાદાવનેજનવિધૌ યદુનાથ! તીર્થૈઃ ।
કિં ન્યાય્યમેતદમરાર્ચિતપઙ્કજાઙ્ઘ્રેઃ
તે ભક્તનૈઘ્યમથવા પ્રકટીકૃતં નુ ॥ ૭૫૧॥

શતાનન્દસઙ્ક્ષાલિતાઙ્ઘ્રિસ્રુતાયાઃ
સ્રવન્ત્યાઃ પયઃ પ્રોક્ષ્ય યે ધન્યધન્યાઃ ।
અહો! કૃષ્ણ! તેષાં પદક્ષાલનેન
સ્વયં ધન્યમામન્યસે સ્વં કિમેતત્ ॥ ૭૫૨॥

ભક્તા યથા ભવત્પ્રાણાઃ
ભક્તપ્રાણસ્તથા ભવાન્ ।
તત્તે યુક્તમિદં શૌરે!
યદ્ભક્તાઙ્ઘ્ર્યવનેજનમ્ ॥ ૭૫૩॥

ત્રિપુરરિપુવરેણ પ્રાપ્તમાયન્તુ સાલ્વં
પ્રતિભટયદુવીરપ્લોષણોપાત્તદર્પમ્ ।
શ્રિતજનપરિરક્ષાબદ્ધદીક્ષસ્વચક્ર-
પ્રહરણવિનિકૃત્તગ્રીવમાશુ વ્યતાનીઃ ॥ ૭૫૪॥

દન્તવક્રમપિ હન્ત! સઙ્ગરે
હન્તિ સ સ્મ ગદયા ભવાન્ હરે! ।
તસ્ય કણ્ઠતલનિર્ગતા દ્યુતિઃ
પ્રાવિશત્તવ પદં કૃપા રિપૌ ॥ ૭૫૫॥

ભૂદેવનૈપથ્યનિગૂઢશૌર્યાન્
ધર્માત્મનઃ પાણ્ડુસુતાન્નિરક્ષુઃ ।
સંયોજય પાઞ્ચાલિકયા મુકુન્દ
સન્તોષયામાસિથ તે દયાહો ॥ ૭૫૬॥

દુરોદરનિરઙ્કુશાન્ પરિહરન્તિ સત્સમ્પદો-
પ્યરાલધરણીપતીનુપસરન્તિ દામોદર! ।
ઇતિ વ્યસનિનાં નૃણાં પ્રકટયન્નિવાત્માશ્રિત-
પ્રચણ્ડબલપાણ્ડવાવનતિમત્ર કિં સેહિષે ॥ ૭૫૭॥

તથાપિ ભક્તાન્નવિમુઞ્ચસિ ત્વં
કદાપિ ગોવિન્દ! સવાગ્નિજાતામ્ ।
તાં દ્રૌપદીં ત્વચ્ચરણૈકસક્તાં
રરક્ષિથાચ્છાદનદાનતો યત્ ॥ ૭૫૮॥

અમ્બરાદ્યદુપતે! હ્યવતેરુ-
શ્ચિત્રિતામ્બરપરમ્પરિકા દ્રાક્! ।
ત્વદ્દયોર્મય ઇવ પ્રયતાત્મ-
દ્રૌપદીહૃદયચન્દ્રવિવૃદ્ધાઃ ॥ ૭૫૯॥

ગોવિન્દેતિ સુદૂરવર્તિનમપિ ત્વામાહ્વયન્તીં મુહુઃ
માનત્રાણપરાયણાં સ્વપતિભિસ્ત્યક્તાત્મસંરક્ષણામ્ ।
પાઞ્ચાલીં ભવતો રરક્ષ કિમુ તન્નામાથવા કિં ભવાન્
સા તે કિં કરુણાથવા શ્રિતમહાદુઃખાપહન્ત્રી હરે ॥ ૭૬૦॥

ગોવિન્દેતિ યદાક્રન્દત્ કૃષ્ણા માં દૂરવાસિનં!
ઋણં પ્રવૃદ્ધમિવ મે હૃદયાન્નાપસર્પતિ ॥

દુર્વાસઃ પ્રભૃતિ મુનીન્દ્ર કુક્ષિપૂર્તિં
કૌન્તેયક્ષતિહરણાર્થમમ્બુજાક્ષ! ।
શાકાલ્પં સ્વયમુપભુજ્ય કલ્પયન્ સન્
સર્વાન્તર્નિજવસતિં વ્યદર્શયો હિ ॥ ૭૬૧॥

દૂતો ભૂત્વા મૃધહતિકૃતે પાણ્ડવાર્થં ગજાહ્વ
સ્થાનં યાતઃ કુરુકુલપતિં યાચમાનશ્ચ સન્ધિં! ।
મોઘીભૂતપ્રચુરયતનસ્સન્નિવૃત્તઃ કિમર્થં
ક્ષોણીભારપ્રશમનકૃતે તે તુ સઙ્કલ્પ એવમ્ ॥ ૭૬૨॥

ગીતા ગીતા સપદિ ભવતા વિશ્વરૂપં વ્યદર્શિ
શ્રીમન્ સર્વં સમભવદહો! યાતયામં કિમેતત્! ।
માયૈવૈવં કલયતિ કલૌ માનુષેષુ ત્વદીયા
તસ્માદ્દીનસ્તવ તુ કરુણાં પ્રાર્થયે ભક્તિદાત્રીમ્ ॥ ૭૬૩॥

પુરુહૂતનીલમણિકાન્તિમઞ્જુલઃ
સિતમુગ્ધવાજિગણચોદનોન્મુખઃ! ।
પ્રધનાજિરેઽપિ વિજયસ્ય સારથિઃ
નનુ કસ્ય કૃષ્ણ! ન ચકર્ષિથેક્ષણમ્ ॥ ૭૬૪॥

સૌન્દર્યં તે પ્રધનભુવિ યે સમ્પ્રહારૈકનિષ્ઠાઃ
તેષાં ચક્ષૂંષ્યપિ વિવશયન્નિર્નિમેષાણ્યકાર્ષીત્! ।
દર્શં દર્શં યદુકુલમણે! ત્વાં પ્રભુપ્રેર્યમાણાઃ
અપ્યાસંસ્તે ત્વયિ કૃતહૃદસ્ત્યક્તકર્તવ્યકાર્યાઃ ॥ ૭૬૫॥

દુષ્ટાત્મકાન્નપરિપોષિતદેહબન્ધાઃ
પ્રજ્ઞાતિમાન્દ્યકૃતકાપથગાનુમોદાઃ ।
વધ્યા ઇતિ પ્રથયિતું કિમુ ભીષ્મમુખ્ય-
વૃદ્ધાદિનાશનવિધૌ રચિતાનુમોદઃ ॥ ૭૬૬॥

શિલીમુખવિદારિતસ્ફુટિતપાણિરપ્યઞ્જસા
સુપર્વવરનિમ્નગાસુતમભિદ્રવંશ્ચક્રભૃત્ ।
ચલત્કુટિલકુન્તલપ્રચુરફાલદેશો હરે!
નિજાકૃતિમદર્શયો બત! રિપોઃ કૃપા તેઽનઘા ॥ ૭૬૭॥

આત્માનમાયોધનભૂમિભાગે
સન્દર્શ્ય બાણાહતિપાતિતેન ।
ભીષ્મેણ ભાવ્યાત્મપરત્વશંસાં
શ્રોતું વ્યતાનીઃ કિમુ જીવિનં તમ્ ॥ ૭૬૮॥

કપિકેતુરક્ષણકૃતે રણેઽભવો
ભગદત્તમુક્તવરવૈષ્ણવાસ્ત્રભાક્ ।
ઉરસા પયોધિતનયૈકસદ્મના
શ્રિતરક્ષણે હિ દયિતાઞ્ચ નેક્ષસે ॥ ૭૬૯॥

પરેણ યુદ્ધૈકરતસ્ય શૌરે!
પાર્થેન ભૂરિશ્રવસો ભુજં દ્રાક્ ।
અચ્છેદયસ્ત્વત્પરિચોદિતેન
નાવેક્ષસે ધર્મમપિ શ્રિતાર્થમ્ ॥ ૭૭૦॥

પિશિતપઙ્કનિમગ્નરથાઙ્ગક-

સ્વભુજકોટિસમુદ્ધરણોન્મુખમ્ ।
રવિસુતં નનુ મારયસિ સ્મ તં
વિજયતસ્સુકૃતં તવ યન્મતમ્ ॥ ૭૭૧॥

કુન્તીતનૂજમપિ કર્ણમયે! મુરારે!
પ્રાઘાપયસ્સિતહયાવનબદ્ધદીક્ષઃ! ।
એવં વિધાતુમપિ કારણમસ્તિ તસ્ય
દુર્વૃત્તમાનિવિભુવર્ધિતસાન્દ્રમૈત્રી ॥ ૭૭૨॥

વદાન્યસ્તત્સમાનોઽત્ર
વદાન્યઃ કોઽસ્તિ માધવ! ।
તદ્ગુણો નેક્ષિતો યસ્માત્
રાધેયો ઘાતિતસ્ત્વયા ॥ ૭૭૩॥

એકં પશ્યસિ ધર્મપક્ષપતનં નાન્યં ગુણં શ્રીપતે!
સાધુષ્વાત્મરતેષુ કિન્તુ કરુણાં સર્વાત્મસન્તોષિણીમ્ ।
યસ્મિંસ્તદ્દ્વયમપ્યબાધિતગતિ સ્નિહ્યસ્યહો તત્ર હિ
વ્યર્થત્વેન પરાન્ ગુણાન્ ગણયતા કિં સ ત્વયા ધ્વંસિતઃ ॥ ૭૭૪॥

કર્મ કિન્નુ જનનાન્તરાર્જિતં
સમ્પ્રતીહ રચિતં વિલોક્ય વા ।
દિત્સસિ પ્રતિફલં નૃણાં હરે!
દુષ્પ્રવેશ કરુણા હ્યઘાત્મકાઃ ॥ ૭૭૫॥

દુર્યોધનં હ્રદનિમગ્નમપાસ્તધૈર્ય-
મુત્થાપ્ય ભીમગદયોરુતટેઽભિઘાત્ય ।
કાપટ્યતો મુરરિપો! તમપાતયો હિ
કર્માનુરૂપમિહ દર્શયિતું ફલં કિમ્ ॥ ૭૭૬॥

શાઠ્યેન ધર્મસુતસમ્પદમક્ષકેલ્યાં
પૈશુન્યનિષ્ઠસુહૃદાં વચસાપહૃત્ય ।
કિં સૌખ્યભાગભવદત્ર સુયોધનોઽયં
શૌરે! પરસ્વહરણેન સુખી ન મર્ત્યઃ ॥ ૭૭૭॥

યથાલાભસન્તુષ્ટચિત્તો ભવેદ્યઃ
કૃપાપાત્રતાં યાતિ શૌરે! સ તેઽત્ર ।
પરસ્વાપહર્તા તુ ચિન્તાપરસ્સ્યાત્

અતસ્સ્વાપતેયં હરેન્નાન્યદીયમ્ ॥ ૭૭૮॥

દૃષ્ટ્વા બાન્ધવપુત્રમિત્રસહજાન્યુદ્ધે હતાંશ્ચક્ષુષા
માની દૈન્યહતો ગતાસુરભવદ્દુર્યોધનો ધૂર્વહઃ ।
શ્રીમંશ્ચક્રધર! ત્વદીયવચસાં ધિક્કારમૂલા કિમુ
સ્યાદેતાદૃગનર્થસન્તતિરહો! કારુણ્યદૂરીકૃતા ॥ ૭૭૯॥

ભગવંસ્ત્વયિ નિર્મિતોઽપરાધઃ
કથમપ્યચ્યુત! સહ્યતે ત્વયૈવ ।
તવ ભક્તજને કૃતોઽપરાધો
ન હિ સહ્યોઽત્ર સ કૌરવસ્તુ સાક્ષી ॥ ૭૮૦॥

રજોગુણવિમૂઢધીર્વિષયવાગુરાયન્ત્રિતઃ
પરસ્વહરણોત્સુકો હૃતસુરક્ષણે વ્યાકુલઃ ।
નિરસ્તસુખનિદ્રકો વિગલિતક્ષુધાત્તામયઃ
ભવેદિહ નરો હરે! કરુણયા સ્પૃહાં વારય ॥ ૭૮૧॥

ધર્માત્મા શમનસુતો નિરીહચિત્તઃ
કાન્તારે પ્રયતધુનીકૃતાવગાહઃ ।
અભ્યર્ચન્મુનિચરણાન્ સુખી ન્યવાત્સીત્
કારુણ્યપ્રવણમનાસ્તવામ્બુજાક્ષ! ॥ ૭૮૨॥

બહુના વચસા કિમત્ર શૌરે!
ભગવન્! રક્ષિતુમિચ્છસિ સ્વયં યમ્ ।
વિતરસ્યખિલાંશ્ચ સદ્ગુણાંસ્ત્વં
નનુ તસ્મૈ કરુણાકટાક્ષપાતૈઃ ॥ ૭૮૩॥

હુતભુક્ પ્રવીતીર્ણમદ્ભુતાઙ્ગં
કપિકેત્વર્જુનવાજિમણ્ડિતઞ્ચ ।
રથવર્યમનન્યવીરદમ્યં
ભગવંશ્ચારયસિ સ્મ ફલ્ગુનાર્થમ્ ॥ ૭૮૪॥

યન્નિમિત્તમુપદાપિતસ્ત્વયા
સ્યન્દનસ્સિતહયાય માધવ! ।
સામ્પરાયકમપૂર્યતાપિ ત-
ન્નિર્વૃતોઽસિ ધરણીભરવ્યયાત્ ॥ ૭૮૫॥

પ્રાણેભ્યોઽપ્યધિકપ્રિયં રથગતં પાર્થં રિરક્ષૂ રથાત્
પ્રાક્તં દ્રાગવતાર્ય રોષણતયા તેનૈવ વાગ્ભર્ત્સિતઃ ।
સ્મેરાસ્યસ્તદનુ સ્વયં રથવરાદુત્પ્લુત્ય દગ્ધાત્તતઃ
સ્વાયત્તં હિ રરક્ષિથાચ્યુત! કૃપાં તે કિં બ્રવીમ્યાશ્રિતે ॥ ૭૮૬॥

નિનિન્દ શિશુપાલકો નનુ ભવન્તમબ્જેક્ષણ!
પ્રિયોઽપિ પુરુહૂતજસ્ત્વયિ કૃતાત્મભારોઽપ્યયમ્ ।
ઉભાવપિ સમૌ ખલુ પ્રતિકલં નિજાત્મોન્નતૌ
દ્વિઙેક ઇહ તે કથં સુહૃદભૂદ્દ્વિતીયો હરે ॥ ૭૮૭॥

ધર્માત્મજં ક્ષિતિધુરન્ધરમાકલય્ય
સિંહાસને સમુપવિષ્ટમપારભક્તિમ્ ।
હૃષ્ટો બભૂવિથ મુકુન્દ! દયાપયોધે!
ભક્તપ્રમોદભર એવ હિ તેઽપિ હર્ષઃ ॥ ૭૮૮॥

નિજપરત્વમુદીરિતમાત્મના
રણમુખેઽર્જુનકૈતવતો હરે! ।
અનુપયુક્તમવેત્ય પુનર્નદી-
સુતમુખાત્પ્રકટીકૃતવાન્ કિમુ ॥ ૭૮૯॥

કરુણાકર! નાકિવન્દ્યપાદ!
પ્રથયન્નાત્મપરત્વમજ્ઞનૃભ્યઃ ।
કથમપ્યનુકમ્પયોદ્દિધીર્ષુઃ
યતસે તે તુ પરાઙ્મુખાસ્તથાપિ ॥ ૭૯૦॥

સમોઽહમખિલેષ્વપીત્યભિદધત્સ્વયં શ્રીપતે!
સ્વભક્તપરિપન્થિનો નિજરિપૂન્ ભવાન્ ભાવયન્ ।
દયાનિધિરપિ શ્રિતાવનપરઃ પરાનાસુરાન્
વિનાશ્ય ધરણીભરં પરિજહાર યુક્તન્ત્વિદમ્ ॥ ૭૯૧॥

બ્રહ્માદયોઽપિ વિતતાણ્ડકુટીરકીટાઃ
વિશ્વાત્મકસ્ય તવ યસ્ય પરાત્પરસ્ય ।
સ ત્વં ક્ષિતૌ કફલુઠત્ક્રિમિકલ્પમર્ત્યૈઃ
ચિક્રીડિથાચ્યુત! કથં કરુણાત્ર હેતુઃ ॥ ૭૯૨॥

સઙ્કલ્પમાત્રપરિકલ્પિતભસ્મશેષાન્
યોધાન્વિધાતુમપિ માધવ હન્ત! દક્ષઃ ।

પ્રત્યર્થિશસ્ત્રમથિતસ્ત્વમભૂઃ કિમર્થં
કિં સ્વાશ્રયાર્થમુપગચ્છતિ કોઽપિ વેતિ ॥ ૭૯૩॥

ક્વચિદ્યુદ્ધરુદ્ધઃ ક્વચિત્કાન્દિશીકઃ
ક્વચિદ્વિશ્લકાયઃ ક્વચિદ્બાણવિદ્ધઃ ।
ક્વચિચ્ચક્રધારી ક્વચિદ્વિપ્રલાપી
શ્રિતાર્થં વિચિત્રક્રિયોઽભૂર્મુરારે ॥ ૭૯૪॥

યુદ્ધાઙ્ગણે પ્રહરણપ્રવણાઃ પ્રવીરાઃ
ક્રોધાભિભૂતહૃદયા અપિ ધન્યધન્યાઃ ।
પ્રાણાત્યયાવસરદૃષ્ટભવન્મનોજ્ઞ-
રૂપાસ્સુયોગિસદૃશા હ્યભવન્ હરે! યત્ ॥ ૭૯૫॥

કર્માનુરૂપફલભોગપરાંસ્તુ જીવાન્
એવં સમસ્તહૃદયાન્તરગસ્સમીક્ષે ।
ઇત્યાસ્થિતો રથમુખે રણવીક્ષણૈક-
તાનઃ કિમુ સ્વયમસક્ત ઇવાભવસ્ત્વમ્ ॥ ૭૯૬॥

કરુણા તવ માનસાધિવાસા
શરણાયાતજનાવનૈકતાના ।
અરુણામ્બુજલોચન! શ્રિતાર્તેઃ
પરિણામપ્રતિપાદિનીવ ભાતિ ॥ ૭૯૭॥

ભવન્તં જગદ્ગર્હણીયઞ્ચ દૂતં
દયા તે વ્યતાનીત્તદા વાવદૂકમ્ ।
અહો! શૂદ્રગેહાન્નભોક્તારમેવં
હયપ્રેરકઞ્ચ શ્રિતાર્થં મુરારે ॥ ૭૯૮॥

સર્વજ્ઞોઽપિ શ્રિતજનકૃતે મૂઢવન્માનુષાત્મા
નાનાક્લેશવ્યતિકરજહદ્દિવ્યભોગાનુભૂતિઃ ।
સામસ્તુત્યોઽપ્યતિકટુજનારુન્તુદપ્રાપ્તનિન્દઃ
શ્રીમન્ લક્ષ્મીરમણ! કરુણાનિઘ્ન એતાદૃશોઽભૂઃ ॥ ૭૯૯॥

શ્રીમન્! ફણીન્દ્રધરણીધરભવ્યશૃઙ્ગે
વિશ્રાન્તિસૌખ્યમધિગન્તુમિવાર્ચ્યમૂર્તિઃ ।
ભક્તૌઘકાઙ્ક્ષિતવરપ્રતિપાદનાર્થં
મૌનેન તિષ્ઠસિ કિમુ શ્રિતપારિજાત ॥ ૮૦૦॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
અષ્ટમશતકં સંપૂર્ણમ્ ।

## ૯. નવમશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમન્નિગમાન્તમહાદેશિકાય નમઃ ।
અથ દયાસહસ્રે નવમશતકમ્ ।

યદ્યપ્યસ્તિ દયા નાથ! ત્વયિ નિત્યાનપાયિની ।
દુર્વૃત્તકણ્ટકાકીર્ણે પ્રવિશેન્મયિ સા કથમ્ ॥ ૮૦૧॥

અંહસ્સંહતિભારભુગ્નહૃદયં સંસારસિન્ધ્વાપ્લુતં
વ્યાધ્યાધિપ્રમુખાતિકર્કશમહાનક્રાર્ધજગ્ધોજ્ઝિતમ્ ।
દારાપત્યનિરન્તરપ્રવિસરદ્વાત્યાભિસઙ્ઘૂર્ણિતં
શેષાદ્રીશ! કદા ત્વદીયકરુણા સા માં સમાધાસ્યતિ ॥ ૮૦૨॥

મદાન્ધમમ્ભોરુહપત્રનેત્ર!
કન્દર્પવશ્યં પરવિત્તગૃધ્નુમ્ ।
નૃશંસમેનં લલનાવિલોલં
કદા સમાધાસ્યતિ તે દયા મામ્ ॥ ૮૦૩॥

આશા વિશાલભુવનેશિતૃભાવલબ્ધ્યા-
પીશાનમિત્રવરકોશવશાભિલાષા ।
શ્રીશ! ત્વદઙ્ઘ્રિશતપત્રવિશેષશેષા
કારુણ્યતસ્તવ ભવિષ્યતિ મે કદા વા ॥ ૮૦૪॥

શ્રીવેઙ્કટાદ્રિશિખરપ્રકટીકૃતાત્મન્ !
બુદ્ધિસ્સદા વિષયમાર્ગણલમ્પટા મે ।
ત્વત્પાદપઙ્કજમરન્દમિલિન્દભાવં
યાસ્યત્યહો! કરુણયા તવ સા કદા વા ॥ ૮૦૫॥

દુઃખાત્મકેષુ વિષયેષુ સુખત્વબુદ્ધિઃ

હા ! હન્ત ! પાપવશતસ્સમુદેતિ નિત્યમ્ ।
તેષ્વમ્બુજાક્ષ! ભવદીયદયાવિશેષાત્
આવિર્ભવિષ્યતિ કદા બત ! મે જિહાસા ॥ ૮૦૬॥

દૌર્ગત્યાદ્ધનલિપ્સુતા તદનુ તત્પ્રાપ્ત્યર્થમન્યાશ્રયઃ
તદ્દાસ્યેન મનશ્શ્રમોઽપ્યસમયે ચિન્તા કદન્નાશનમ્ ।
તેનાપ્યામયપીડનઞ્ચ ગૃહિણીધિક્કારવાણી હરે!
નૈરાશ્યં સ્વતનૌ ભવન્તિ ભવિતા તત્ત્વદ્દયાસ્મિન્ કદા ॥ ૮૦૭॥

નાનાક્લેશપરમ્પરા જનિમતો મે નાત્મશાન્તિર્હરે!
ત્વત્પાદામ્બુજયુગ્મચિન્તનવિધિં નૈવાનુમોદેત હૃત્ ।
કિં તાપત્રયજર્ઝરીકૃતતનુસ્સત્કર્મ કુર્યાત્કથં
કારુણ્યં મયિ તે પતિષ્યતિ કદા ત્વત્પાદસેવાપ્રદમ્ ॥ ૮૦૮॥

ચઞ્ચલં મન ઇદં મુકુન્દ! તે
પાદતામરસપર્યુપાસને ।
નિશ્ચલત્વમુપયાતિ મે કથં
સ્થાપયિષ્યતિ કદા સ્થિરં દયા ॥ ૮૦૯॥

મદીયમિદમપ્યદસ્તદપિ સર્વમેતન્મમે-
ત્યનલ્પમમતાધિયા ક્ષુભિતમત્તચિત્તક્રિયઃ ।
સમુજ્ઝિતભવત્પદસ્મરણમમ્બુજાક્ષ! પ્રભો!
કદા તવ દયા તુ મામમમમેનમાધાસ્યતિ ॥ ૮૧૦॥

માયાજાલમભેદ્યરન્ધ્રમબુધગ્રાહ્યં વૃષાદ્રિપ્રભો !
વિસ્તીર્યાદ્ભુતયત્નતો ભવમહારણ્યે નરાખ્યાન્ મૃગાન્ ।
જીવગ્રાહમહો! ગ્રહીતુમસકૃન્નાનાસ્વરૂપો ભવાન્
તિષ્ઠન્નેવ કિમેકમપ્યલભત શ્રીમન્! દયાં તત્કુરુ ॥ ૮૧૧॥

ક્ષણં ક્ષણમપિ ક્ષિપન્ ક્ષપયતિ ક્ષિતાવક્ષતઃ
નૃણાં સ મહદાયુરપ્યહહ! કાલ એષ પ્રભુઃ ।
સરન્ધ્રઘટિકાગતપ્રચુરતૈલવચ્છ્રીપતે!
તદદ્ય દયયા તવ સ્મરણબુદ્ધિમાપાદય ॥ ૮૧૨॥

ક્ષણાર્ધકૃતદુષ્કૃતસ્મરણમાત્રસઙ્ઘૂર્ણિતો
નૃણાં યદિ વિધાસ્યસિ પ્રતિફલં ત્વઘોચ્છિત્તયે ।
તદા તુ નરકાન્તરપ્રચુરસર્જનં શ્રીપતે!

ભવેદ્ધિ કરુણા તવ પ્રતિભટૈવ તત્કર્મણે ॥ ૮૧૩॥

આશા પ્રવિષ્ટા પ્રથમં મનો મે
વામા તતો વેશ્મ દયાપયોધે!
આશાપ્રણુન્નો દયિતાભિલાષં
સમ્પૂરયન્નસ્મિ કુતસ્સ્મૃતિસ્તે ॥ ૮૧૪॥

બાલ્યે ક્રીડન્ જનકજનનીલાલિતો યૌવનેઽહં
યોષાશ્લેષપ્રવણહૃદયો ભોગલાભૈકતાનઃ ।
વાર્ધક્યેઽપિ પ્રશિથિલતનુર્વ્યાધિભિઃ પીડ્યમાનઃ
ત્વત્પાદાબ્જસ્મરણસમયો બ્રૂહિ શૌરે! કદા મે ॥ ૮૧૫॥

શ્વઃ કરિષ્યામિ તે ધ્યાનમિતિ શૌરે! વદન્તિ યે ।
તેઽપિ ધન્યા યતોઽત્ર ત્વદ્ ધ્યાનકર્તવ્યધીરભૂત્ ॥ ૮૧૬॥

કાર્યાન્તરપ્રસૃતચિત્તતયા મનુષ્યઃ
ત્વત્પાદપદ્મમનનં વિદધાતુ મા વા ।
ત્વચ્છેષભાવધિષણા યદિ તસ્ય શૌરે!
ધન્યસ્સ એવ તવ યત્કરુણૈકપાત્રમ્ ॥ ૮૧૭॥

ફલોન્મુખચિરન્તનપ્રચુરકર્મ નિર્વાપય-
ત્યનલ્પચિરદુઃખદં ત્વચિરદભ્રદુઃખપ્રદમ્ ।
દયા તવ વિતન્વતી શરણમીયુષાં શ્રીપતે!
ભવન્તમિહ વેદનાસહતયૈવ નામગ્રહમ્ ॥ ૮૧૮॥

શીતલાપિ કરુણા તવ શૌરે! વહ્નિવદ્દહતિ પાપમમેયમ્ ।
તત્સદા મૃગયતિ પ્રસરન્તી માદૃશં દુરિતમેવ સદેહમ્ ॥ ૮૧૯॥

ઇન્દ્રિયાણિ વિષયૈકપરાણિ પ્રાપ્તપાટવતયાતિબલાનિ ।
ત્વત્કૃપા કલયિતા તવ સેવાકૌતુકીનિ કમલાક્ષ! કદા મે ॥ ૮૨૦॥

ઉદરભરણનિષ્ઠો દુષ્ટસેવાતિખિન્નો-
પ્યનધિગતસુતૃપ્તિર્દીનદીનો મુરારે !
ગૃહતનયકલત્રત્રાણસન્ત્રસ્તચિત્તઃ
શરણમુપગતોઽહં ત્વાં ન ભક્ત્યા દયાલુમ્ ॥ ૮૨૧॥

દયસે યદિ માદૃશં મુરારે!
પરદુઃખાદિકદુઃખિતાસ્વરૂપા ।

કરુણા તવ સાર્થકા તદાનીં
ન તથા ચેદ્ભુવિ સા વૃથા ભવેદ્ધિ ॥ ૮૨૨॥

વૃષાદ્રીશ! શ્રીમન્! ક્વચિદપિ કદાપિ પ્રયતધીઃ
સવિશ્વાસં તુભ્યં પ્રણતિમપિ નાહં રચિતવાન્ !
કથા કા વા દ્રવ્યવ્યયફલસુમસ્પર્શનવિધૌ
નિરાલમ્બો નિત્યં તવ તુ કરુણાયાચક ઇહ ॥ ૮૨૩॥

સંસારદાવદહનોદરદહ્યમાનો
પ્યાશાવિશેષવશમાનસબદ્ધદેહઃ ।
ઈશાનફાલશલભાયિતકામવશ્યઃ
શ્રીશ! ત્વદીયકરુણાં બત! કામયેઽહમ્ ॥ ૮૨૪॥

લૂતાસ્યૂતવિચિત્રજાલજઠરાલગ્નસ્ફુરન્મક્ષિકા-
કલ્પં સંસૃતિઘોરસાન્દ્રજટિલાનાયસ્ફુરદ્વિગ્રહં !
કો વા મોચયતિ પ્રચણ્ડદુરિતગ્રન્થ્યુલ્બણાબન્ધનં
તચ્છેષાચલનાથ! મોચય દયાશસ્ત્રેણ કૃન્ત્વાદ્ય મામ્ ॥ ૮૨૫॥

સદાચાર્યાબન્ધો જગતિ બહુશો દુર્લભ ઇહ
પ્રસન્ને સમ્પ્રાપ્તેઽપ્યહહ જનસામાન્યધિષણા ।
ન વિશ્વાસસ્તસ્મિન્મદનુગુણસર્વવ્યવહૃતૌ
કૃપાં તસ્માત્પાપે પ્રહિણુ વૃષશૈલાલય! મયિ ॥ ૮૨૬॥

માયાં પ્રસાર્ય વિષયેષુ સુખત્વબુદ્ધિ-
મુત્પાદ્ય સર્વવિષયાન્ પ્રવિદર્શ્ય નાથ!
મત્પાદપદ્મવિમુખોઽયમિતીહ જન્તૂન્
નૈવેક્ષસે કિમુચિતં કરુણાં નિધેહિ ॥ ૮૨૭॥

યદ્યપ્યયં સદુપદેશવશાત્કથઞ્ચિત્
સ્વીયેન્દ્રિયાણિ બલવન્તિ નિયન્તુમેવ ।
યત્નીભવન્નપિ પુમાન્વિષયાભિલાષી
તન્નિઘ્ન એવ ભવતીહ દયાં નિધેહિ ॥ ૮૨૮॥

યોગૈકસક્તહૃદયા અપિ ભોગ્યવસ્તુ-
સન્દર્શનસ્ખલિતમાનસસુસ્થિરત્વાઃ ।
ભ્રષ્ટા ભવન્તિ કિમુતાત્ર તુ માદૃશેષુ
શેષાદ્રિનાથ! કરુણાં પ્રહિણુ પ્રસીદ ॥ ૮૨૯॥

પ્રીતિસ્સ્વદારસુતબન્ધુષુ યાદૃશી સ્યાત્
તાદૃક્ત્વયીહ યદિ તાં પ્રવદન્તિ ભક્તિમ્ ।
શ્રુત્યેકવેદ્યવપુષિ ત્વયિ સા કથં વા
પ્રાદુર્ભવેત્સપદિ તે કરુણા ગતિર્મે ॥ ૮૩૦॥

યસ્મિન્ દયા પતતિ તે વૃષશૈલનાથ !
ધીમાનયં સ હૃદયઙ્ગમભાષણેન ।
આકર્ષતીહ સકલાનપિ મોદયન્ સન્
દિગ્વ્યાપિકીર્તિવિષયઃ પરિપૂજ્યમાનઃ ॥ ૮૩૧॥

પતિતાનપિ પામરાન્ શ્વપાકાન્
પરપીડાપરપાણિપાશઘોરાન્ !
કરુણા તવ કૈતવેન કેના-
પ્યુદધાર્ષીદત એવ નિર્ભયોઽસ્મિ ॥ ૮૩૨॥

ઘણ્ટાકર્ણો હિમગિરિતટે પર્યટન્ ભૂતવર્ગૈઃ
કિં વા કર્મ શ્રુતિવિહિતમુદ્ભ્રાન્તચિત્તો વ્યતાનીત્ !
સાક્ષાચ્છ્રીમન્! સ્વયમુપગતસ્તત્ર તસ્મૈ પ્રદર્શ્ય
સ્વીયં રૂપં તદભિમતમપ્યન્વગૃહ્ણાઃ કૃપાતઃ ॥ ૮૩૩॥

વિપ્રં હત્વા તમપિ શકલીકૃત્ય ગોવિટ્ પવિત્રે
ન્યસ્ય ક્ષેત્રે પિશિતમશિવં યાતુ પૂતત્વબુદ્ધ્યા !
પ્રાદાત્તુભ્યં યદુકુલમણે! વિપ્રમુજ્જીવયન્ સન્
અઙ્ગીચક્રે તદપિ ચ ભવાન્ હન્ત! ભક્તે કૃપા તે ॥ ૮૩૪॥

કરુણાવશવર્તિતા મુરારે!
શરણાયાતજનાર્તિકીર્તનેન ।
તનુતે સતતં ભવન્તમાર્તં
ક્વનુ તે ભૂમિતલે સુખાનુભૂતિઃ ॥ ૮૩૫॥

સૃષ્ટાસ્ત્વયા તરુલતોલપકુઞ્જપુઞ્જાઃ
નાનાવિધાદ્ભુતપતઙ્ગમૃગેન્દ્રકીટાઃ !
સર્વેઽપિ માનુષકૃતે સ તુ નૈવ તેભ્યઃ
મર્ત્યેષુ નાથ! કરુણા તવ સન્નિકૃષ્ટા ॥ ૮૩૬॥

દત્તં જ્ઞાનં પ્રિયહિતમતિસ્સત્પથૈકપ્રવૃત્તિઃ

વસ્તુષ્વેવં સુખકરમિદં દુઃખદં ત્વેતદિત્થં !
સત્યપ્યેવં તવ તુ કરુણામસ્મરન્તો મનુષ્યાઃ
આશાભ્રષ્ટા વિષયચપલાઃ ક્લેશિનઃ પર્યટન્તિ ॥ ૮૩૭॥

ચાતુર્વર્ણ્યં નિજગુણમહત્કર્મસમ્ભાગશો ય-
ત્સૃષ્ટં તત્તદ્વિહિતનિયતાજીવિકં વેઙ્કટેશ !
વ્યત્યસ્તં તત્કલિમલતલસ્પર્શિ વૈષમ્યપાત્રં
તસ્માદત્ર પ્રહિણુ કરુણામુદ્દિધીર્ષુસ્ત્વદીયમ્ ॥ ૮૩૮॥

કૃત્યાકૃત્યવિવેકલેશવિકલા મર્ત્યા મૃગાપેક્ષયા
ક્ષુદ્રા દ્રોહપરાઃ પરસ્વહરણે નિસ્સાધ્વસાસ્ત્વત્રપાઃ !
આશાપાશકૃતાત્મધર્ષિતજગન્નિન્દા વૃષાદ્રિપ્રભો!
ત્વત્પાદાબ્જપરાઙ્મુખાઃ ખલુ તતસ્સમ્પ્રેષય ત્વત્કૃપામ્ ॥ ૮૩૯॥

સર્પાદ્ભયં ન હિ યતો નિજરૂપતસ્તં
દૃષ્ટ્વા જનાઃ પરિહરન્તિ મુકુન્દ! દૂરાત્ ।
વિસ્રમ્ભદર્શિતસુહૃત્ત્વવિલોભિતાસ્તે
નશ્યન્તિ હન્ત! શઠતઃ કરુણાં નિધેહિ ॥ ૮૪૦॥

વ્યાઘ્રાદયઃ પિશિતમાત્રકૃતે નૃશંસાઃ
કાન્તારવર્ત્મનિ ચરન્તિ તતો ભયં ન ।
દુષ્ટાઃ પરસ્વહરણાય સુહૃત્સ્વરૂપાઃ
દ્રુહ્યન્તિ માધવ! સ તે કરુણાં નિધેહિ ॥ ૮૪૧॥

વલ્મીકવજ્જગતિ હન્ત! બહિશ્શઠાસ્તે
દૃશ્યાત્મકા નનુ લસન્તિ તદન્તરઙ્ગમ્ ।
કો વેત્તિ વિપ્રિયપૃદાકુકરાલદંશં
ખિદ્યન્તિ સન્ત ઇહ તત્કરુણાં નિધેહિ ॥ ૮૪૨॥

કન્દર્પદર્પકૃતકર્પટકલ્પકાયો-
પ્યાશાવિશેષવિધૃતો વિષયપ્રણુન્નઃ !
ત્વત્પાદપઙ્કજયુગસ્મરણં કુતો મે
તત્પાહિ માં કરુણયા દુરિતાપહારિન્ ॥ ૮૪૩॥

સર્વેશ્વરત્વમભિદર્શિતમપ્યુદારં
દુર્યોધનપ્રભૃતયો દુરિતાકરાસ્તે ।
નૈવાપુરત્ર શરણં સશરા ભવન્તં

દૂરીકૃતાઃ કરુણયા કિમુ તે મુકુન્દ ॥ ૮૪૪॥

સર્વજ્ઞતા સકલશક્તિરપિ ત્વદીયા
માદૃગ્વિધેષુ ન હિ કાર્યકૃદાયતાક્ષ !
મય્યર્પયાદ્ય ચિરરૂઢમમત્વબુદ્ધૌ
શૌરે! દયાં વશયિતું સ તુ મામુપાયઃ ॥ ૮૪૫॥

ત્વત્પાદસારસવિષક્તહૃદો જનાસ્તુ
ક્લેશાકરા નનુ ભવન્તિ કુતો નિતાન્તમ્ ।
તેષાં હિતૈકમનસા તનુષે કિમેવં
જાનન્તિ નૈવ કરુણાં તવ નાથ! મૂઢાઃ ॥ ૮૪૬॥

યદ્યદ્ધિતં ચિરતરાર્જિતપાપરાશિ-
ભ્રષ્ટાત્મનાં તદવલોક્ય તનોષિ શૌરે!
ચિન્તા કિમત્ર મમ તાવકકિઙ્કરસ્ય
કારુણ્યમાત્રકુતુકી દિવસાન્ ક્ષિપામિ ॥ ૮૪૭॥

અજ્ઞેન નાથ! યદિ કોઽપિ મયા પુમર્થઃ
પ્રાર્થ્યેત સ ત્વહિતદો ભવિતા કદાપિ ।
ત્વય્યર્પિતાત્મભર એવ તદસ્તશઙ્કઃ
કાલં ક્ષિપામિ કરુણૈકચિરાભિકાઙ્ક્ષી ॥ ૮૪૮॥

જાત્યા યશ્શ્વપચ ઇહ પ્રકૃષ્ટ એવ
સ્યાત્કર્મશ્વપચવિમર્શને સ સાધુઃ ।
યત્કર્મ સ્વવિધિકૃતં તનોતિ નાન્યે
તસ્માત્તે પ્રહિણુ દયાં વૃષાદ્રિનાથ ॥ ૮૪૯॥

હિંસાત્મકં જગદિદં કલિકલ્મષાઢ્યં
ક્ષુદ્રૈર્જનૈર્નિચિતમલ્પમતિપ્રગલ્-ભૈઃ ।
શ્રીવેઙ્કટેશ! નનુ સાત્ત્વિકદુષ્પ્રવેશ-
મેવં સ્થિતેઽસ્મિ ભવદીયદયાવલમ્બઃ ॥ ૮૫૦॥

પાપાર્જનાય બહવો નનુ સન્તિ માર્ગાઃ
સદ્યસ્સુખં સ્ફુરતિ પર્યટતાઞ્ચ તેષુ ।
ક્લેશાવહં સુકૃતકર્મ તતો ભવન્તિ
પાપાત્મકા ભુવિ જનાઃ કરુણાં નિધેહિ ॥ ૮૫૧॥

તાતઃ કાપથગામિનં નિજસુતં સન્તાડયત્યઞ્જસા
માતા સાન્ત્વનતત્પરા કરપરામર્શાદ્ બ્રવીતિ પ્રિયમ્ ।
તસ્માચ્છેષગિરીશ! ભીતહૃદયો વર્તે ભવત્સન્નિધૌ
કાઙ્ક્ષે ત્વત્કરુણાં સુધીરહૃદયો ઘોરાપરાધોઽપ્યહમ્ ॥ ૮૫૨॥

વિષયગુણવિમર્શે પ્રાયશો નૈવ સૌખ્યં
યદિહ તદુપભોગાજ્જર્ઝરીભૂતદેહાઃ !
સપદિ જરઠભાવં તે ભજન્તે મનુષ્યાઃ
તદુપશમય ભોગે શ્રીશ! કાઙ્ક્ષાં કૃપાતઃ ॥ ૮૫૩॥

ભોગાભિલાષિજનમાનસમદ્વિતીયં
લબ્ધાધિકં યદભિકાઙ્ક્ષતિ વસ્તુ ભોગ્યમ્ ।
ઇન્દ્રેઽપિ દૃષ્ટચરમેતદહો! મુરારે!
તત્ક્ષાલયાશુ દયયા હૃદયં મદીયમ્ ॥ ૮૫૪॥

મારસ્તારાધિપસહચરશ્ચારયન્ ધીરવારં
દારોદારપ્રણયપરિરમ્ભોરુરમ્ભોરુસારં !
આરામારામમુરગધરાધીશ! કારુણ્યદૂરં
ઘોરારાવં રચયતિ ચિરાદ્રૌરવારબ્ધચારમ્ ॥ ૮૫૫॥

ક્લેશે સત્યપિ હન્ત! ચેતનગણા દેહાવસાનં કુતો
વાર્ધક્યેઽપ્યનુમન્વતે ન ગદભાગ્બાહ્યેન્દ્રિયે શ્રીપતે !
માયા તે વૃષશૈલનાથ! તનુતે જન્તૂંસ્તથા સસ્પૃહાં-
સ્તદ્યાચે કરુણાં તવેહ પશુતો નીચોઽપિ વાચા મુહુઃ ॥ ૮૫૬॥

ઉપર્યુપરિ માનસં સપદિ ચારયન્ પુણ્યવાન્
વિશેષસુખલિપ્સયા સુરપુરેઽપિ માત્સર્યતઃ ।
સ ખિદ્યતિ નિજાધિકપ્રથિતભોગભાગ્વીક્ષણાત્
વૃષાચલપતે! તતઃ પ્રહિણુ તે દયાં મોદદામ્ ॥ ૮૫૭॥

અનાથદીનાદિષુ તે દયા ક્ષિતૌ
મુકુન્દ! જાગર્તિ રિરક્ષયા સદા ।
ઇદન્તુ યુક્તં વિકલં પ્રસૂસ્સુતં
વિશેષદૃષ્ટિં દધતી રિરક્ષતિ ॥ ૮૫૮॥

સ્વભાવાનપાયઃ પ્રસિદ્ધો હિ વસ્તુ
ષ્વતોઽહં સ્વભાવં ન મુઞ્ચામિ શૌરે !

સ્વસઙ્કુલ્પતશ્ચેચ્છિલાનામિવાબ્ધૌ
સ્વભાવચ્યુતિસ્સ્યાત્કૃપાલો મમાપિ ॥ ૮૫૯॥

કામં સન્તુ ધનાધિકા ધવલિતપ્રોત્સેધસૌધાશ્રયાઃ
કિંવા તૈર્ભવદીયપાદવિમુખૈસ્સ્ત્રીવિભ્રમૈકોન્મુખૈઃ ।
કિન્તુ ત્વત્પદપદ્મચિન્તનપરૈર્ભિક્ષાત્તભિસ્સાશનૈઃ
દીનૈરસ્તુ સહાનુભૂતિરિહ મે શ્રીશાનુકમ્પાબલાત્ ॥ ૮૬૦॥

ભવદનુગ્રહવર્ધિતસમ્પદો
ભુવિ જનાઃ પ્રતિભાર્જિતબુદ્ધયઃ ।
ગુરુતિરસ્કૃતિગર્વિતમાનસાઃ
પ્રહિણુ તેષ્વપિ તે કરુણાં હરે ॥ ૮૬૧॥

કરણશુદ્ધિરહો! ભવિતા કથં
મનસિ વાચિ ચ કર્મણિ ભિન્નતા ।
યદિ ભવેદ્વૃષશૈલવિભો! કૃપાં
પ્રહિણુ તન્મયિ શાઠ્યવિદૂષિતે ॥ ૮૬૨॥

કનકપર્વતકૂટગતોઽપિ ય-
ન્નિજચિરન્તનકર્મવિપાકતઃ ।
સ લભતે સુખદુઃખપરમ્પરાં
તદિહ તે કરુણા ગતિરચ્યુત ॥ ૮૬૩॥

વિધિલલાટવિલેખનમાર્જનં
રચયિતું ભુવિ કોઽપિ ન શક્નુયાત્ ।
સ તુ વિલોક્ય ચ કર્મ લિખેન્નૃણાં
તદિહ તે કરુણા ગતિરચ્યુત ॥ ૮૬૪॥

મનુજતા ખલુ જન્મિષુ દુર્લભા
તદપિ વિપ્રકુલેઽપ્યથ વૈષ્ણવે ।
જનનમચ્યુત! તે કૃપયા કદા-
પ્યત ઇહ ત્વયિ ભક્તિરપેક્ષ્યતે ॥ ૮૬૫॥

જનનનાશવશાઃ ખલુ ચેતનાઃ
કટુપરિભ્રમભઙ્ગુરવિગ્રહાઃ ।
અશનપાનવિહારરતા હરે!
હ્યભિલષન્તિ કૃપાં તવ નૈવ તે ॥ ૮૬૬॥

ભગવન્નભિરક્ષિતું યમિચ્છ-
સ્ચવનૌ તં નનુ યોજયસ્યતન્દ્રમ્ ।
ભુજગાચલનાથ! મેધયા દ્રા-
ક્કરુણા કારણમત્ર તેત્વહેતુઃ ॥ ૮૬૭॥

ત્વદધીનશરીરિસાધ્યમસ્મિન્
ભુવને કિં બત! વર્તતે મુરારે!
ભવતા ભુવનાન્તરપ્રવિષ્ટં
સકલં ત્વત્કૃપયા વિચાલ્યતે હિ ॥ ૮૬૮॥

કાલુષ્યદૂષિતવપુર્જનસન્નિધાન-
માત્રેણ શુભ્રતનુરુદ્વિજતે હિ લોકે ।
બાહ્યાન્તરાવિલમયૈર્મનુજૈર્વિતીર્ણ-
મઙ્ગીકરોષિ ભગવન્! કરુણા વિચિત્રા ॥ ૮૬૯॥

પ્રકૃત્યનુગુણં ચલન્ત્યખિલજન્તવસ્સન્તતં
પ્રકૃત્યનુગતં ખલુ પ્રતિપદં તદાગસ્સ્વયં !
ભુજઙ્ગધરશેખર! ત્વમનવેક્ષ્ય દોષં નૃણાં
નિપાતય કૃપામૃતં ભવદપાઙ્ગસમ્પાદિતમ્ ॥ ૮૭૦॥

યુગત્રયવિપર્યયઃ કલિયુગે ભવેદિત્યયે !
ત્વયૈવ નનુ કલ્પિતં તદિહ કોઽસ્તિ દોષો નૃણામ્ ।
યથેચ્છમવશા જના વિષયભોગતૃષ્ણાકુલાઃ
ચરન્તિ પશુવત્તતઃ પ્રહિણુ તે કૃપામચ્યુત ॥ ૮૭૧॥

વર્ધયત્યનિશમમ્બુજાક્ષ! ય-
ચ્છાસ્ત્રધીર્બુધમનસ્સમુન્નતિમ્ ।
નૈવ તે ચરણભક્તિકારિણી
તત્પ્રદેહિ દયયા ભવત્ સ્મૃતિમ્ ॥ ૮૭૨॥

કૃત્યં ત્યજન્તિ મનુજા ભુવનેત્વકૃત્યં
હર્ષાદ્ભજન્તિ સુલભં કિલ યત્ર સૌખ્યમ્ ।
જાનાતિ કઃ પરગતિં નિતરાં પરોક્ષાં
તત્તે કૃપાં પ્રહિણુ સત્પથબુદ્ધિદાત્રીમ્ ॥ ૮૭૩॥

લોકે વ્રતાદિનિયમાચરણે હિ યાદૃક્

ક્લેશસ્સુખાસ્પદપદાર્થસમાર્જનેઽપિ !
તાદૃગ્ભવેન્ન મનુતે મનુજસ્સુખેપ્સુઃ
તત્તે વિવેકજનનીં કરુણાં નિધેહિ ॥ ૮૭૪॥

કુર્વન્તિ કામ્યં ભુવિ કર્મ મર્ત્યાઃ
કૈઙ્કર્યબુદ્ધ્યા ભવતો ન શૌરે!
તસ્માદ્ભવારણ્યગતાશ્ચરન્તિ
યાચે કૃપાં તેષુ નિપાતયેતિ ॥ ૮૭૫॥

સર્વે સ્તુવન્તુ ભવતસ્ત્વપદાનમુચ્ચૈઃ
યદ્દૈત્યરાવણમુખારિનિશારણાદિ ।
ત્વદ્વૈભવે બત! કિયન્ત ઇમે મુરારે!
કીટાત્મકાઃ ખલુ તદત્ર દયૈકકાર્યમ્ ॥ ૮૭૬॥

હિરણ્યાક્ષહત્યૈ વરાહસ્વરૂપં
જગદ્ગર્હ્યમત્રાભ્યુપેયં કુતો વા ।
સ્વસઙ્કલ્પવધ્યેઽપિ કીટે મુરારે!
કૃપાકાર્યમેતદ્ધિ સર્વાત્મકસ્ય ॥ ૮૭૭॥

એકસ્ય કીટસદૃશસ્ય મુકુન્દ! શત્રોઃ
હત્યૈ હિરણ્યકશિપોર્નરસિંહરૂપઃ ।
સ્તમ્ભોદ્ગતો વિલસસિ સ્મ નખાયુધસ્સન્
કારુણ્યતો હરવરાનુસમર્થનાય ॥ ૮૭૮॥

સઙ્કલ્પમાત્રકૃતસુસ્થિરતાપિ ભૂમિઃ
પાતાલગેન કમઠાકૃતિના ત્વયાપિ ।
અશ્રાન્તમેવ મુરભિદ્ધ્રિયતે કિમર્થં
કારુણ્યકાર્યમિદમપ્યખિલાવનાર્થમ્ ॥ ૮૭૯॥

સર્વાઞ્ચ વેત્સિ ભગવન્! ભુવનોદરસ્થ-
નાનાશરીરિચિરકર્મપરમ્પરાં ત્વમ્ ।
તત્પ્રાર્થયે કુરુ તથા કરુણાવિશેષાત્
ઉજ્જીવનં જનિમતાં ભવિતા યથા વા ॥ ૮૮૦॥

લોકે દુર્ભરભારભુગ્નશિરસો ભારાપસારાદ્યથા
સૌખ્યં સમ્મનુતે તથૈવ મનુજઃ ક્લેશાપનોદાદપિ ।
નિત્યાનન્દમયસ્ય વર્ષ્મનિગલાજ્જીવસ્ય હા! દુર્દશા

શ્રીશ! પ્રેષય કર્દમોદરમણિપ્રખ્યે દયાં ચેતને ॥ ૮૮૧॥

ચિત્રં ચિત્રં મહદિદમહો ! ચેતના દીર્ઘતૃષ્ણાઃ
ક્લેશાવાસા અપિ ગદમયા દુર્ગતા અપ્યજસ્રમ્ ।
જીર્ણાસ્તુચ્છા અપિચ મરણાદ્ભીતભીતા મુરારે !
વર્તન્તે તત્ પ્રહિણુ કરુણાં હેયતાજ્ઞાનદાત્રીમ્ ॥ ૮૮૨॥

હૃદયસરસિજાશાસૌરભસ્સર્વતોઽપિ
પ્રસરતિ વશયન્ સન્ માનુષં વેઙ્કટેશ !
તદિહ કરુણયા ત્વં તન્મુખત્વં નિવાર્ય
ત્વદતુલચરણાબ્જામોદવશ્યં કુરુષ્વ ॥ ૮૮૩॥

અજસ્રં ત્વન્નામસ્મરણનિરતાન્ સાધુચરિતાન્
સ્વકાર્યૈકાસક્તાનનિતરનિહિંસાન્વરગુણાન્ ।
વિના હેતું નિન્દન્ત્યતિકટુહૃદો દુષ્ટચરિતાઃ
કથં વોજ્જીવેયુસ્તવ તુ કરુણાં તેઽચ્યુત વિના ॥ ૮૮૪॥

કાર્યાન્તરપ્રવણચિત્તતયા કદાપિ
ત્વન્મન્દિરાન્તિકગતાન્નિજકાર્યસક્તાન્ ।
ઇચ્છાં વિનાપિ સકૃદઞ્જલિબન્ધને વા
સઞ્ચોદયાચ્યુત! દયામય! નાસ્તિકાંશ્ચ ॥ ૮૮૫॥

નિહીનકર્માપિ દુરધ્વચારોઽ
પ્યનલ્પપાપોઽપ્યહિશૈલનાથ !
વિચિન્ત્ય તે તાં કરુણાં વિલજ્જો
રક્ષેતિ યાચે ધુરિ ધૈર્યતસ્ત્વામ્ ॥ ૮૮૬॥

સ્વેચ્છાપ્રવૃત્તિકૃતદુર્જનદુષ્ટચેષ્ટાઃ
બાલા ભવન્તિ તદિદં સહજં કિલેહ ।
દૌષ્ટ્યાનવેક્ષણગુણે કરુણે! વૃષાદ્રિ-
નેતુસ્તતોઽસિ જગતાં જનની કિલ ત્વમ્ ॥ ૮૮૭॥

કારુણ્યમૂર્તિરપિ સંશ્રિતરક્ષકોઽપિ
જીવાન્તરાવસથગોઽપિ વૃષાદ્રિનાથ!
જીવસ્ય જીવનમહો! ભુવિ જીવ એવે-
ત્યેવં વ્યધાઃ કિમુચિતં તદિદં દયાયાઃ ॥ ૮૮૮॥

પ્રતિક્ષણમહં ક્ષિતૌ જઠરપોષણાયાદયઃ
ત્રિવિક્રમ! ભવત્પદસ્મરણમપ્યકુર્વન્નૃણામ્ ।
તિરસ્કૃતિસમુત્થિતામનુભવન્ વ્યથાં પ્રાણિમિ
શ્રિતાર્તિહર! તત્કૃપાં મયિ કુરુ પ્રપન્ને ક્ષણમ્ ॥ ૮૮૯॥

ગલિતેન્દ્રિયોઽપિ મલિનાશયસ્સદા
વિષયાનુભૂતિકુતુકી કૃતોદ્યમઃ ।
અભિલાષમાત્રસુહિતો ભવત્યહો
મનુજસ્તદત્ર કરુણાં કુરુ પ્રભો ॥ ૮૯૦॥

લીલાવિભૂતિરિતિ કર્મસુ સર્વભાર-
મારોપ્ય ચેતનગણાન્ સુખદુઃખભાજઃ ।
પશ્યંસ્સ્થિતોઽસિ મધુરસ્મિતકાન્તવક્ત્રઃ
શ્રીવેઙ્કટાચલપતે! ક્વ ગતા કૃપા તે ॥ ૮૯૧॥

શ્રુતયો વદન્તિ ભવતો ગુણાન્ શુભાન્
ન ભવાન્ કદાપિ જનગોચરોઽસ્તિ ચ ।
કથમમ્બુજાક્ષ! ભવતિ ત્વયિ સ્થિરા
નનુ ભક્તિરત્ર કરુણામતઃ કુરુ ॥ ૮૯૨॥

શાખોપશાખનિગમપ્રતિપાદ્યમાનાઃ
અર્થાઃ પુનર્મનુજસંશયવર્ધકા હિ ।
નિર્ણેતુમત્ર પરતત્ત્વમિદં બુધાશ્ચ
ક્લિશ્નન્તિ તત્કુરુ કૃપાં વૃષશૈલનાથ ॥ ૮૯૩॥

કૃષિમાતનોતિ વિધિવત્ કૃષીવલો
જલમુઙ્ ન વૃષ્ટિમભિપાતયેદ્યદિ ।
કિમુ તેન તદ્વદિહ સાધકો વ્રતી
કરુણાં વિનૈવ ગતિભાગ્ભવેત્કથમ્ ॥ ૮૯૪॥

કરુણા યદિ વેઙ્કટેશ! ન સ્યા-
ત્કિમુ કર્માદિભિરત્ર માનવાનામ્ ।
કરુણા યદિ પાતિતા તદાનીં
કિમુ કર્માદિભિરત્ર માનવાનામ્ ॥ ૮૯૫॥

ક્ષુદ્રા દદત્યચિરમેવ નિજેપ્સિતાર્થાન્
યદ્દેવતાસ્તદિહ તા મનુજા ભજન્તિ ।

તાન્ ક્ષુદ્રસમ્પદભિલાષિતયા મુકુન્દ !
ભક્તાન્વિધેહિ કૃપયા ભવદઙ્ઘ્રિપદ્મે ॥ ૮૯૬॥

મૂઢપ્રાયે જગતિ ભગવન્! શઙ્કરોપાસનેન
પ્રેષ્ઠં દૈવં કિમિતિ જનયન્ સંશયં માનવાનામ્ ।
ડોલારૂઢં કલયસિ મનસ્તત્ત્વલબ્ધ્યુત્સુકાનાં
તત્ત્વાંશે તત્કુરુ કરુણયા બુદ્ધિદાર્ઢ્યં મુરારે ॥ ૮૯૭॥

આશાવિશેષપરિગુણ્ઠિતસત્સ્વભાવાઃ
વિશ્વાસપાત્રમપિ હન્ત! સદાશ્રિતઞ્ચ ।
હા! વઞ્ચયન્તિ શઠતાકુટિલા મનુષ્યાઃ
તેષુ પ્રસીદ કૃપયા કુરુ સન્મતીંસ્તાન્ ॥ ૮૯૮॥

સુપ્તેષુ પન્નગસુચારનિર્ગલત્વં
સઞ્ચિન્ત્ય કો નુ મનુતે નિજરક્ષણે સ્વમ્ ।
સ્વાપૈકલીનહૃદયાન્ કૃપયાવસીતિ
મત્વા ભજન્તુ મનુજા નૃહરે! ભવન્તમ્ ॥ ૮૯૯॥

વક્ષસ્યમોઘમણિહારપરિષ્કૃતે તે
લક્ષ્મીસ્સદા વસતિ ભોગિગિરિપ્રભો ! યત્ ।
તન્મત્કૃતે પુરુષકારપરાનુકમ્પા
સમ્પાતિની યદહમાર્જિતકિલ્બિષોઽસ્મિ ॥ ૯૦૦॥

નિર્ભયોઽસ્મિ દુરિતાકરોઽપ્યહં નિર્ભરોઽસ્મિ કરુણાકરાચ્યુત !
ત્વદ્દયાસ્તિ જનની હિ વત્સલા માદૃશાવનનિબદ્ધકઙ્કણા ॥ ૯૦૧॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
નવમશતકં સમ્પૂર્ણમ્ ।

## ૧૦. દશમશતકમ્

શ્રીઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીલક્ષ્મીદાસાય નમઃ ।
શ્રીમદ્વેદાન્તદેશિકાય નમઃ ।
અથ દયાસહસ્રે દશમશતકમ્ ।

પદ્માક્ષં પદ્મનાભં પતગપતિપદં પૂતપાથોધિતલ્પં
પ્રાપ્તાનેકાવતારં શ્રિતદુરિતહરં શ્રીધરોદારદારમ્ ।
દિવ્યૈઃ પઞ્ચાયુધૈશ્ચ પ્રકટિતવિભવં નીલજીમૂતકાન્તં
શાન્તં પીતામ્બરન્તં મમ ચ નયનયોર્દર્શયાદ્યાનુકમ્પે ॥ ૯૦૨॥

નિર્લિપ્તો નિર્વિકારઃ ખગપતિગમનસ્ત્વં ક્વ દેવેશ! ગોપ્તા
સ્ફીતાઘસ્થેમધામા કુચરિતનિરતઃ ક્વાહમલ્પાર્થલિપ્સુઃ ।
નિર્લજ્જોઽહં તથાપિ પ્રણિપતનપરો ભક્તિલેશં વિનૈવ
ત્રાયસ્વેતીહ યાચે પ્રગુણગુણનિધે! તે તુ વીક્ષ્યાનુકમ્પામ્ ॥ ૯૦૩॥

નાહં શક્તોઽસ્મિ રામાવરજમુનિકૃતે ત્વત્સપર્યાવિધૌયત્
કર્તવ્યે નિત્યકર્મણ્યપિ જડહૃદયો નૈવ નિષ્ઠાં વહામિ ।
ત્વદ્ભક્તાનાં મુરારે શ્રુતિમધુરગિરાં સંશ્રવે મે ન સક્તિઃ
ભક્તિર્નૈવ ત્વદીયે પદકમલયુગે તત્પ્રતીક્ષેઽનુકમ્પામ્ ॥ ૯૦૪॥

નિષ્પ્રત્યૂહં વિધાતું વિધિવદિહ બુધૈરપ્યશક્તં સુકર્મ
શ્રીશાર્ચૈકસ્વરૂપં વિઘટનપટુભિઃ પઞ્ચભૂતૈર્વિકૃષ્ટૈઃ ।
ચિત્તં ચાઞ્ચલ્યમત્ત ક્ષણમપિ ન ભવેત્ત્વત્પદધ્યાનસક્તં
શેષગ્રાવાગ્રદીપ! પ્રહિણુ તવ કૃપાં તત્સમસ્તાઘહન્ત્રીમ્ ॥ ૯૦૫॥

પશ્ચાત્તાપોઽપિ નોદેત્યનુદિનમપિ દુષ્કર્મણામાર્જનેઽપિ
પ્રાયો જાનન્તિ કૃત્યં સુકૃતમિતિકૃતં લોભલાભાભિભૂતાઃ ।
સૂનાગારે પશૂનાં હનનમિવ કૃતં નિર્દયો ઘાતુકો યત્
તેષામુજ્જીવનં હા! કથમિતિ નૃહરે! વેદ્મિ નાહં કૃપાલો ॥ ૯૦૬॥

યત્ર ક્વાપિ સ્થિતં માં વિવિધતનુજુષં પ્રાપ્તતાપત્રયઞ્ચ
શ્રીમન્ શેષાદ્રિનાથ! ત્વદરુણચરણધ્યાનસક્તં વિતન્વન્ ।
તદ્ધ્યાનપ્રાપ્તહર્ષં વિદલિતહૃદયધ્વાન્તમધ્વાવબોધ-
ત્વદ્ભક્તાઙ્ઘ્રિપ્રસક્તં વિતનુ કરુણયા પાપવર્માવગુપ્તમ્ ॥ ૯૦૭॥

ધૂર્તોઽયં મે વિપક્ષસ્સુહૃદયમિતિ યદ્ભેદમાકલ્પ્ય મૌઢ્યાત્
મર્ત્યેષુ સ્વીયભાવપ્રગુણિતચરિતો દુઃખભાઙ્મોદભાક્ સ્યામ્ ।
સંલિપ્તાચ્છોરુગન્ધે ધુરિ નિજભુજયોશ્છેદકેઽપિ પ્રમોદં
સ્વસ્વાન્તેત્વેકરૂપં વિતર કરુણયા મે ભુજઙ્ગાદ્રિનાથ ॥ ૯૦૮॥

એતત્કર્માભિનુન્નં ફલમિદમિતિ યત્સઞ્ચિતેષુ ક્રમેણ
સ્રષ્ટા નેષ્ટેઽપિ વક્તું હ્યવિરતકરણાત્કર્મણાં ભેદભાજામ્ ।

વ્યાસેનાપ્યુક્તમેતદ્બતિરપિ બહુધાહો વિચિત્રેતિ તસ્માત્
શ્રીમન્ શેષાદ્રિનાથ! પ્રહિણુ તવ કૃપાં કર્મહન્ત્રીં જનેષુ ॥ ૮૦૯॥

સર્વજ્ઞોઽપિ પ્રકૃત્યા બહુવિધકુટિલક્રૂરકર્માભિષક્તાં-
સ્તત્તત્કર્માનુરૂપં તનુવિતરણતશ્ચેતનાન્પાતયેશ્ચેત્ ।
ક્લેશપ્રાયે જગત્યપ્યનુભવશિથિલાસ્ત્વત્પદધ્યાનસક્તાઃ
ભૂયાસુસ્તે કથંવા વૃષશિખરિપતે! તત્કૃપાં પાતયાશુ ॥ ૯૧૦॥

બ્રહ્માણ્ડાન્તર્ગતાનાં વિવિધતનુજુષામન્તરાવિશ્ય તત્ત-
ત્તત્તત્કર્મપ્રવૃત્ત્યા વૃષશિખરિપતે! પ્રેરયન્નૈહિકેષુ ।
તાંસ્તાન્ દ્વન્દ્વાભિષિક્તાનનવરતમપિ પ્રેક્ષમાણો વિભાસિ
સ્વીયં ભવ્યસ્વરૂપં પ્રકટય કૃપયા ભક્તિસમ્પ્રાપણાર્થમ્ ॥ ૯૧૧॥

માતુર્ગર્ભે વસન્સન્ પરવશવિચલત્પિણ્ડકશ્ચણ્ડપીડઃ
માત્રાભુક્તાન્નનાનારસપરિણમનપ્રાપ્તવૃદ્ધિસ્સ્વકોશે ।
જીવોઽયં સઞ્ચિતાનાં ફલમનુભવિતું કર્મણાં જાયતે યત્
તસ્માદભ્યર્થયે ત્વાં પ્રહિણુ મયિ કૃપાં જન્મહન્ત્રીં કૃપાલો ॥ ૯૧૨॥

દત્વા શાસ્ત્રં નરેભ્યઃ પ્રકૃતિમપિ તથા તાવકીં કલ્પયન્સન્
આજ્ઞાચ્છેદીતિ રુષ્ટઃ ક્ષિપસિ વિષયગાન્માયયા મોહિતાંસ્તાન્ ।
યુક્તં કિં વા તવેદં સતતસુખધિયઃ ક્ષિપ્રસૌખ્યેપ્સવસ્તે
માદ્રાક્ષીર્દોષમેષાં તદિહ કરુણયા રક્ષ શેષાદ્રિનાથ ॥ ૯૧૩॥

આહારસ્નાનભોગાદ્યખિલમપિ ચ યન્માનુષો નિત્યમસ્યાં
મેદિન્યાં સાભિલાષં મુહુરનુભવતિ શ્રીનિવાસાત્મમિત્રૈઃ ।
ચિત્રં તત્તજ્જિહાસા ન હિ ભવતિ કદાપ્યેવમસ્ય ત્વદીયા
સા માયા કારણં તત્પ્રહિણુ તવ કૃપાં હેયતાજ્ઞાનદાત્રીમ્ ॥ ૯૧૪॥

માતશ્શેષાદ્રિનેતુર્હૃદયકમલજે! સાનુકમ્પેઽનુકમ્પે !
તન્નાભીકૂપપદ્મપ્રભવશતધૃતેસ્સાહ્યકૃદ્ભાસિ નિત્યમ્ ।
યસ્માત્ત્વાં વીક્ષમાણસ્સ તુ સૃજતિ ચિરાત્કર્મવીક્ષાનપેક્ષઃ
જન્તૂનન્તાભિમન્તૂન્કલયસિ સતતં ત્વં યતશ્શ્રીશસક્તાન્ ॥ ૯૧૫॥

આકિઞ્ચન્યં ધનાદેઃ પ્રકટયિતુમહં ન ત્વયિ શ્રીશ ! સજ્જઃ
કૈઙ્કર્યાભાવરૂપં તદિતિ નિગદિતું હન્ત! જિહ્રેમિ નાથ!
યસ્માદાશાવિશેષાદ્ધનગૃહસુતદારાદિવશ્યસ્તદર્થં
દુષ્કર્મપ્રાપ્તપાપસ્તદિહ તવ કૃપાં પાપહન્ત્રીં નિધેહિ ॥ ૯૧૬॥

એકત્ર દ્વેષિવર્ગો ધનસુતદયિતાપ્રેમબન્ધઃ પરત્ર
સ્ફીતાશાન્યત્ર નિત્યં વૃષશિખરિપતે! પીડયન્ત્યેકદૈવ ।
અન્તઃ કામાદિદોષાઃ બહુવિધવિષયવ્યગ્રતાજગ્ધમેનં
દીનં માં પાતુ નિત્યં નિરુપમદુરિતાકમ્પમાનં દયા તે ॥ ૯૧૭॥

સ્યાન્નામૈતન્મુરારે! ત્રિવિધકટુમહાતાપસન્તપ્યમાને
લોકેઽસ્મિંસ્ત્વત્સપર્યાવ્યતિકરકરણેઽપ્યન્તરાયો મહાન્ હિ ।
આસ્તિક્યાદ્યઘતેત પ્રકૃતિવશતયા પુણ્યકર્મપ્રતીપો
વિઘ્નસ્સ્યાદેવ તસ્માત્સવિનયમધુના ત્વદ્દયાં પ્રાર્થયેઽહમ્ ॥ ૯૧૮॥

બ્રહ્માદ્યા દેવતા યચ્છ્રુતિમધુરવચશ્શ્રોતુકામાઃ પયોધેઃ
પારં પ્રાપ્ય સ્તવૈસ્તૈર્ઘટિતકરપુટા ભક્તિભાજસ્સ્તુવન્તિ ।
માતશ્શ્રીશાનુકમ્પે! વૃષશિખરિતટે મર્ત્યનેત્રૈકપેયં
કૃત્વા તં વેઙ્કટેશં પરમપદમુદં દાપયસ્યૈહિકેભ્યઃ ॥ ૯૧૯॥

કારુણ્યૈકાર્ણવસ્ત્વં દશશિરસિ કુતો નાકરોસ્ત્વદ્દયાં તાં
ધ્વાઙ્ક્ષે યામાતનોર્યત્પ્રણિપતનપરસ્સ ત્વયં નેતિ કિં વા ।
ગૃધ્રેશસ્યાભિહન્તા શરણમુપજુષો યદ્દયા તન્ન સક્તા
સ્થાને ભક્તાપરાધિષ્વયિ! ભવસિ કથં નાથ! કારુણ્યમૂર્તિઃ ॥ ૯૨૦॥

પ્રાચીનાનલ્પકર્મવ્યતિકરજનિતસ્ફીતદુઃખોપભુક્ત્યૈ
તુચ્છચ્છાગાદિયોનિષ્વધિગતજનનસ્સંસરન્નાસમત્ર ।
જાતશ્શ્રીવૈષ્ણવસ્સંસ્તવ તુ કરુણયા દિવ્યદેશેઽદ્ય નાથ!
ત્વદ્ભક્તાનાઞ્ચ સેવાકૃતમતિરભવં ધન્યધન્યોઽસ્મ્યતોઽહમ્ ॥ ૯૨૧॥

ગ્રાહગ્રસ્તં ગજેન્દ્રં પરમપદગતો રક્ષિતું હન્ત! શક્તોઽ-
પ્યારાત્સઙ્કલ્પતો યદ્વૃષશિખરિમણે! પઞ્ચહેતીશપાણિઃ ।
આકર્ષન્પીતચેલં સ્વયમહિરિપુમપ્યાત્તવેગોઽભિનુન્નઃ
કારુણ્યેનાશુ સાક્ષાદિભપતિમગમસ્તાદૃશં રક્ષ તન્મામ્ ॥ ૯૨૨॥

પાઞ્ચાલીં પઞ્ચપત્નીં સપદિ નૃપસભે દુષ્ટદુશ્શાસનેન
પ્રાકૃષ્ટાત્માંશુકાં તાં વિવિધવસનદસ્સ્વસ્થલસ્થોહ્યરક્ષઃ ।
એવં વા નાથ! માં ચ પ્રિયવૃષશિખરિન્! તત્ર તિષ્ઠન્કૃપાલો!
સંરક્ષેત્યાર્તચિત્તસ્સ્ત્વયિ નિહિતભરઃ પ્રાઞ્જલિઃ પ્રાર્થયે ત્વામ્ ॥ ૯૨૩॥

માતઃ કિં વાનુકમ્પે! ન દનુજરિપુણા કારયસ્યાશ્રિતાર્થં

યન્માતુર્ગર્ભકોશે મૃતમપિ તનયં જીવયન્નુત્તરાયાઃ ।
કૌન્તેયેભ્યઃ પ્રમોદં વ્યતરદયમહો! ચોદિતો હિ ત્વયૈવ
શ્રીમાન્શેષાદ્રિનાથઃ પ્રકથય કિમિતોઽપ્યસ્તિ વૈચિત્ર્યમન્યત્ ॥ ૯૨૪॥

વેદાધ્યાયી ન ધર્મપ્રવણસિતમના નાપિ તત્વપ્રવેત્તા
દ્રવ્યત્યાગી ન ચાહં ન નિજગુરુજનાસક્તચિત્તો ન શાન્તઃ ।
નાપ્યન્યક્લેશદુઃખી ન પરધનજિહાસુસ્તથા નોપકારી
માતશ્શ્રીશાનુકમ્પે! કથય જનમમું વલ્લભાયેદૃશં મામ્ ॥ ૯૨૫॥

આશાતૂદ્દામભૂમા બહુવિધવિટપા ધાવયત્યાશુ દૂરં
ત્રૈલોક્યાગારસારપ્રસૃમરમનસં માં વૃષગ્રાવનાથ ।
તસ્માદેકત્ર તિષ્ઠંસ્તવપદયુગલધ્યાનસક્તઃ કથં વા
ભૂયાસં ભૂમિભાગે પ્રહિણુ મયિ કૃપાં તત્સદા સ્થેમદાત્રીમ્ ॥ ૯૨૬॥

માયાસમ્મોહિતાનાં ધુરિ યદિ નૃહરે! ગોચરસ્સ્યા જનાનાં
આશાપાશાભિનુન્નૈરહમહમિકયા પ્રાર્થ્યમાનશ્ચ તૈસ્સ્તૈઃ ।
સર્વજ્ઞસ્સર્વશક્તોઽપ્યહહ સપદિ દિઙ્મૂઢતાં પ્રાપ્ય તિષ્ઠેઃ
અપ્રત્યક્ષસ્તદેતાનવસિ કરુણયા પ્રાર્થિતાર્થપ્રદાયી ॥ ૯૨૭॥

અર્ચારૂપી સ્વકીયાં શ્રિયમતિશયિનીં દર્શયન્પાપિનાઞ્ચ
શ્રીમંસ્તાક્ષ્યાર્ભિયાયિન્! સ્વયમતિમધુરાં મૂર્તિમપ્યાર્તિહન્ત્રીમ્ ।
તત્તત્કામાભિપૂર્ત્યૈ વિલસસિ શિખરે શેષશૈલસ્ય નિત્યં
કિં બ્રૂમસ્તેઽનુકમ્પાં ભુવિ તુ કિમથવા ભાગ્યમેતજ્જનાનામ્ ॥ ૯૨૮॥

સ્વાનુષ્ઠાનં વિના યે પ્રવચનપટવો બોધયન્તીહ શાસ્ત્રં
ગોવક્ત્રવ્યાઘ્રકલ્પાસ્સહૃદયજનતાવઞ્ચકાસ્સઞ્ચિતાર્થાઃ ।
તેષાં જ્ઞાનોપદેશાત્કથમિવ ભવિતા શુદ્ધચિત્તો જનોઽયં
શાસ્ત્રાનુષ્ઠાનસક્તાન્ વિરચય કૃપયા તાન્મુરારે! તદત્ર ॥ ૯૨૯॥

શેષાદ્રીશ! ત્વદીયસ્ફુટકમલપદધ્યાનધારૈકનિઘ્નં
સ્વાન્તં મે મોદમાનં ભવતુ કરુણયા પુણ્ડરીકાક્ષ! નિત્યમ્ ।
યદ્ધ્યાનાદૈહિકાનાં બહુવિધવિષયવ્રાતભાજાં જનાનાં
દૂરીભૂયાદતન્દ્રા સહવસતિરિહ પ્રાયશશ્શોકહેતુઃ ॥ ૯૩૦॥

લક્ષ્મીસ્ત્વાં વિશ્વબન્ધું ભજતિ નિરુપમપ્રીતિબન્ધાનુબદ્ધા
ત્વઞ્ચાસ્યા ભ્રૂવિલાસપ્રસરપરવશો વર્તસે નિઘ્નચેષ્ટઃ ।
નિત્યાવાસા દ્વયોસ્સા મનસિ ચ કરુણા સ્વાશ્રિતક્લેશહન્ત્રી

સત્યેવં ચિન્તયેયં ત્વયિ નિહિતભર શ્શ્રીશ! દાસઃ કિમર્થમ્ ॥ ૯૩૧॥

નાનાજન્મપ્રદાનં પ્રબલનિરવધિક્લેશદાનં કુવૃત્તિઃ
યદ્યત્કારુણ્યકાર્યં તદિહ ગુણનિધે! ચેતનાનાં જગત્યામ્ ।
ક્લેશૈઃ પાપપ્રણાશો ભવતિ તદનુ ચ શ્રેષ્ઠવંશપ્રસૂતિઃ
ભૂયાત્ત્વત્પાદપદ્મપ્રવણમતિરપિ શ્રીશ! સત્સઙ્ગ બોધઃ ॥ ૯૩૨॥

નિસ્સીમાશ્ચર્યકાર્યપ્રકટિતવિભવં માનુષાકારભવ્યં
દિવ્યાકારં ભવન્તં ચિરદુરિતગણધ્વાન્તરુદ્ધાન્તરાક્ષાઃ ।
ધિક્કુર્વન્તો મનુષ્યા નિકટપરિચયાન્નૈવ જાનન્તિ સેવ્યં
શૌરે! તન્માવતારં ભુવિ કુરુ કૃપયા દુષ્ટમેતજ્જગદ્ધિ ॥ ૯૩૩॥

ભક્તાધીનત્વમર્ચાકૃતિરિહ ભગવન્! શીતવાતાતપોત્થાન્
ક્લેશાન્ શશ્વત્સહિષ્ણુઃ પ્રકૃતિવશતયા સ્વાનુકૂલં કૃતાર્ચામ્ ।
અઙ્ગીકુર્વન્ સ્મિતાસ્યઃ પ્રકટયસિ હરે! શ્રીપતેસ્તે કિમેતત્
સ્વાતન્ત્ર્યં કુત્ર યાતં ભવસિ કરુણયા ચાથવા લોકનિઘ્નઃ ॥ ૯૩૪॥

નિત્યાનન્દાત્મકોઽપિ પ્રકૃતિવિકૃતિજદ્વન્દ્વસઙ્ઘૂર્ણિતાક્ષૈઃ
સ્વેચ્છાવૃત્તિપ્રવૃત્તૈષ્ષડરિગણવિશીર્ણાત્મકૈર્માનુષૈસ્ત્વમ્ ।
નિત્યઞ્ચાભ્યર્ચ્યમાનો વૃષશિખરિપતે! મન્દહાસાભિરામઃ
ક્ષાન્ત્યૌદાર્યોરુકાર્યં કલયસિ કરુણાપ્રેર્યમાણો ધરિત્ર્યામ્ ॥ ૯૩૫॥

દોષો નૈવૈષ નૃણામિહ કલિમહિમા તાદૃગિત્યમ્બુજાક્ષ ।
ત્વં મન્વાનસ્સપર્યાં કલુષિજનકૃતાં સાદરં સ્વીકરોષિ ।
કારુણ્યૈકાકરો હિ પ્રશમિતદુરિતસ્સંશ્રિતાનાં વૃષાદ્રૌ
ક્ષાન્ત્યૌદાર્યોરુકાર્યં કલયસિ સતતં પ્રાર્થિતાર્થપ્રદાયી ॥ ૯૩૬॥

પત્રં પુષ્પં ફલઞ્ચાપ્યુપહૃતમુદકં ભક્તિતોઽશ્નીતિ શૌરે ।
યત્પ્રોક્તં તચ્ચ કર્તું ત્વયિ મમ ન દૃઢા ભક્તિરસ્તીહ તાદૃક્ ।
સૃષ્ટં વસ્તુ ત્વયા તદ્ભુવિ કરયુગતો ભક્તિપૂતં ગૃહીત્વા
તુભ્યં દત્તાન્યમૂનીત્યહહ । ગદિતુમપ્યુદ્ધતોઽહં વિલજ્જે ॥ ૯૩૭॥

ઘોરારણ્યે જટાયુર્ધુતકુણપગણાઘસ્મરે ગૃધ્રવંશે
જાતોઽપિ સ્વામિભક્તો જરઠતનુરપિ પ્રાણનિર્ણિક્તરાગઃ ।
પૌલસ્ત્યૌદ્ધત્યહન્તા રઘુવરચરણન્યસ્તમસ્તોઽસ્તમાગાત્
તાદૃઙ્ નિષ્ઠા કથં સ્યાન્મયિ તવ કરુણાપાત્રતાં યલ્લભેય ॥ ૯૩૮॥

ભીષાસ્માન્માતરિશ્વા પવત ઇહ તથોદેતિ સૂર્યોऽપિ ભીષા
મૃત્યુર્ધાવત્યતન્દ્રો દ્રુહિણહરતુરાષાટ્ કિરીટાર્ચિતાઙ્ઘ્રે ।
એતત્સર્વં શરીરિપ્રકરપરિરિરક્ષાકૃતં સર્વવેત્ત્રા
કારુણ્યપ્રેરિતેન ત્રિભુવનવિભુના વેઙ્કટેશ! ત્વયા હિ ॥ ૯૩૯॥

સમ્પ્રાપ્તાનેકભોગોऽપ્યસકૃદિવ તવાનુગ્રહાદાશયૈવ
શ્રીમન્! શશ્વદ્ધનાર્થી ધનિજનસદનદ્વારસઞ્ચારશીલઃ ।
ધિક્કારાશીર્ણકર્ણો નિરુપમહૃદયક્લેશસન્દહ્યમાનો
મર્ત્યસ્સ્યાત્તેऽનુકમ્પાં તદિહ નરહરે! નિક્ષિપાશાનિહન્ત્રીમ્ ॥ ૯૪૦॥

દુષ્ટે શિષ્ટોપદિષ્ટા ભવતિ હિ ફણિતિર્વૃષ્ટિવચ્ચોષરે ય-
ત્તત્કષ્ટા દુષ્ટમૈત્રી જગદિદમનિશં ઘુષ્ટદૌષ્ટ્યૈકનિષ્ઠમ્ ।
સુસ્પષ્ટાષ્ટાપદશ્રીરિયમપિ જગતી શારિસઙ્ક્ષોભદક્ષા
હ્યક્ષપ્રક્ષેપશિક્ષાક્ષુભિતકુકિતવા તત્ક્ષિપાત્રાનુકમ્પામ્ ॥ ૯૪૧॥

સાધૂનાં પ્રાયશોऽસ્મિન્ જગતિ પરિભવસ્સમ્ભવત્યલ્પચિત્તૈઃ
દુષ્ટૈસ્તન્મૌનમુદ્રાપરિહૃતજનતાસ્તે વિસૃષ્ટાભિમાનાઃ ।
ત્વન્નામધ્યાનતુષ્ટા દલપિહિતશલાટુપ્રતીકાશકાયાઃ
લીયન્તે ક્વાપિ તાદૃક્સ્થિતિમિહ કૃપયા દેહિ મહ્યં કૃપાલો ॥ ૯૪૨॥

વિષ્ણો! પૌષ્ણોऽસિ કોષ્ણૈઃ કતિપયકિરણૈર્વ્યાધિમુન્મૂલયન્સન્
કૈશ્ચિત્તીક્ષ્ણૈઃ કરૈશ્ચ પ્રવિતતજલધેરમ્બુ જીમૂતયન્સન્ ।
કાલઞ્ચાકલ્પયન્સન્ પ્રયતવિધિકૃતે સર્વસાક્ષી નિયન્તા
ત્રય્યાત્માન્નપ્રદાતા નનુ તવ કરુણા હન્ત! વૈષમ્યમુક્તા ॥ ૯૪૩॥

કન્દર્પો દર્પદાતા જરઠમપિ મનોનોદનેનાનિનીષુઃ
કાન્તાભ્યર્ણં વિવર્ણં કિમુત! યુવજનેષ્વસ્ય ચેષ્ટાવિશેષે ।
જાનન્ત્યેતે યુવાનસ્સ્મરપરવશતાભ્રાન્તચિત્તાઃ પ્રમત્તાઃ
વિશ્વં કાન્તામયં તત્પરિહર કૃપયા મૌઢ્યમેતન્મુરારે ॥ ૯૪૪॥

દર્શં દર્શં મનુષ્યા યમસદનગતાન્પ્રાણિનસ્સ્થૈર્યમાત્મ-
ન્યામન્વાના નિજાસોશ્શમદમરહિતાઃ દ્રોહલબ્ધાન્યવિત્તાઃ ।
આત્માનં પોષયન્તસ્સતતમપિ પરોદ્વર્હણાસક્તચિત્તાઃ
કાલં સંયાપયન્તિ પ્રહિણુ તવ કૃપાં ત્વત્પદધ્યાનદાત્રીમ્ ॥ ૯૪૫॥

સૃષ્ટૌ યદ્વસ્તુ હેયં તદિહ જનિમતઃ કસ્યચિદ્ભોગ્યમેવ
પ્રાયશ્ચેદં હિ દૃષ્ટં કિટિરતિકલુષં હેયવસ્ત્વત્તિ ભોગ્યમ્ ।

ત્યાજ્યં યદ્ જ્ઞાનિનાં તદ્વિષયિપરવશાનાં ભવેદ્ભોગ્યભોગ્યં
તસ્માચ્છ્રી શ્રીનિવાસ! પ્રહિણુ તવ કૃપાં તેષુ મૂઢાત્મકેષુ ॥ ૯૪૬॥

સંરાડ્ ભૂત્વા સમન્તાદુપનૃપતિશિરોરત્નકોટીરનિર્ય-
દ્રોચિર્નીરાજિતાઙ્ઘ્રિશ્શશધરસદૃશચ્છત્રમૂર્ધા કદાચિત્ ।
દ્વિડ્ભિઃ પ્રભ્રંશિતસ્સન્નટતિ નિશિ પરાગારકદ્વારિ ભિસ્સા-
ભિક્ષાર્થી સ્થેમ કિઞ્ચિત્તદિહ ન નૃહરે! તેનુકમ્પા સ્થિરૈકા ॥ ૯૪૭॥

યદ્યદ્રૂપં મનોજ્ઞં ક્રમશ ઇહ વયોવ્યુત્ક્રમાત્તત્કરાલં
યદ્યત્ખાદ્યં સ્વભોગ્યં ક્રમગલિતરદાલેસ્તદુત્સાર્યમેવ ।
કાન્તાસ્રગ્ગન્ધભૂષાદ્યખિલમપિ તથા સ્યાજ્જિહાસૈકપાત્રં
ત્યાજ્યં ભોગ્યં ન કિઞ્ચિત્તદભિલષત તાં શ્રીનિવાસાનુકમ્પામ્ ॥ ૯૪૮॥

નિર્ધૂતાશેષપાપોઽપ્યનુસૃતસુકૃતસ્તત્ફલં ચાનુભોક્તું
રમ્ભોર્વશ્યાદિયોષાપટુકુટિલકટાક્ષૈકપાત્રં હિ નાકે ।
ભૂયાસં તત્કટાક્ષં પ્રહિણુ મયિ તથા ચિન્તયન્ત્યાં કૃતો યઃ
શ્રીમન્! શેષાદ્રિનાથ! ત્વદતુલકરુણાં કાઙ્ક્ષમાણોઽસ્મિ દીનઃ ॥ ૯૪૯॥

યદ્યદ્ભવ્યં ભવિષ્યત્યનુભવફલદં પ્રાયશસ્તત્તદેવ
શ્રીશાનુધ્યાનનિષ્ઠાં કુત ઇહ વયમપ્યાદ્રિયામો મુધેતિ ।
મૂઢા જલ્પન્તિ કેચિત્ત્વદમલકરુણાવૈભવં નો વિદુસ્તે
ત્વત્પાદધ્યાનયોગાદ્રચિતમપિ મહત્કર્મ તન્નશ્યતીતિ ॥ ૯૫૦॥

વિત્તે સત્યપ્યદાનાદનુભવવિરહાજ્જાયતે દુર્ગતસ્સન્
દૌર્ગત્યાત્પાપકર્મણ્યનુદિનનિરતઃ પાપતસ્તુચ્છજન્મા ।
તાદૃગ્જન્માત્તદુઃખપ્રસરણગલિતસ્વીયકર્મપ્રવૃત્તિઃ
તચ્છેષગ્રાવનાથ! પ્રહિણુ તવ કૃપાં દાનબુદ્ધિપ્રદાત્રીમ્ ॥ ૯૫૧॥

સા ત્રય્યપ્યાદરાત્ત્વદ્ગુણગણગણનારબ્ધસર્વપ્રયત્ના-
પ્યૈકૈકસ્યાન્તમન્તસ્સુચિરમનનતોઽપ્રાપ્ય ખિન્ના નિવૃત્તા ।
સત્યપ્યેવં દયાયા નિરવધિમહિમાકૃષ્યમાણા નિતાન્તં
સ્મારંસ્મારં વિલીના ભવતિ ખલુ સદા તન્મયી વેઙ્કટેશ ॥ ૯૫૨॥

સંવર્તે જ્ઞાનહીનાન્ગતકરણતયાપ્યાત્મરક્ષાવિયુક્તાન્
જીવાંસ્તાન્ સંરિરક્ષુશ્શિશુરપિ જઠરે પોષયન્સાવકાશે ।
સૃષ્ટૌ સ્પષ્ટાઙ્ગકાંસ્તાન્વિસૃજસિ જઠરાત્સેન્દ્રિયાન્ જ્ઞાનબુદ્ધાન્
શ્રીમન્! શેષાદ્રિનાથ! ત્વદમિતકરુણાકાર્યમેતદ્ધિ સર્વમ્ ॥ ૯૫૩॥

યુદ્ધાન્તે પ્રાર્થિતા યા પવનતનુભુવા રાક્ષસીચ્છેદનાર્થં
પાપાનાં વા શુભાનાં હનનસમુચિતાનાઞ્ચ કાર્યા કૃપેહ ।
નિર્દોષી કોઽસ્તિ લોકેત્વિતિ ગદિતવતી સાસ્તિ વક્ષસ્સ્થલે તે
નિર્ભીકો ઘોરપાપસ્તદહમિહ ફણિક્ષ્માભૃદીશાસ્મિ હૃષ્ટઃ ॥ ૯૫૪॥

અર્થાનામર્થિતાનાં પ્રવિતરણકૃતે શેષશૈલે વસન્સન્
લક્ષ્મીવક્ષાઃ ક્ષમાક્ષશ્શ્રયણવચનમાત્રેણ જાનન્સ્વભક્તમ્ ।
તત્ક્લેશઞ્ચ ક્ષિપન્સંસ્તદુદયમનિશં ભાવયસ્યાદરાદ્ય-
ન્મર્ત્યા જાનન્તિ નૈવ ત્વદમલકરુણાકાર્યમજ્ઞાનતસ્તત્ ॥ ૯૫૫॥

નિન્દાગર્ભૈર્વચોભિસ્સુચરિતજનતારુન્તુદૈસ્સપ્રમોદં
પાપાત્માનો મનુષ્યાસ્સમયમખિલમપ્યુત્સુકાસ્તે ક્ષિપન્તિ ।
આયુર્વ્યર્થં નુદન્તઃ ક્ષણમપિ ભવતો નામસઙ્કીર્તનાર્થં
બુદ્ધિં નાવર્તયન્તિ પ્રહિણુ તવ કૃપાં તેષુ તદ્વેઙ્કટેશ ॥ ૯૫૬॥

નાનાવિત્તાપહારાત્સ્વયમિહ ધનિકો જૃમ્ભમાણામયસ્સન્
સ્વીયદ્રવ્યોપભોગેઽપ્યનભિમતમનાસ્તાન્તનેત્રઃ ક્ષુધાર્તઃ ।
તદ્વિત્તં ભેષજાર્થં વિતરતિ ભિષજે ન ત્વદર્ચોપયુક્ત્યૈ
પાપં હિ દ્રવ્યમૂલં ત્વિતિ ચ ન મનુતે ત્વદ્દયા તત્ર દૂરે ॥ ૯૫૭॥

ત્વદ્દાસપ્રેષ્યદાસપ્રવરપદસરોજાત્તભક્તિં કૃપાલો!
તન્વન્મામપ્યમન્તું વિરચય કૃપયા યત્પ્રહૃષ્ટો ભવેસ્ત્વમ્ ।
ત્વય્યાગઃ ક્ષન્તુમર્હસ્યપિ તુ ભુવિ ભવદ્દાસવર્ગે કૃતં ત-
ત્ક્ષન્તું શક્નોષિ નૈવ પ્રિયવૃષશિખરિન્! વર્તયૈવં સદા મામ્ ॥ ૯૫૮॥

ઐશ્વર્યોન્મત્તચિત્તાસ્ત્રિદિવવિભવતો વિસ્મૃતત્વત્પદાબ્જાઃ
દેવા અપ્યાત્મલાભપ્રણિહિતમનસો ભક્તસૃષ્ટાપરાધાઃ ।
પ્રાપ્તે ક્લેશે તદાનીં ત્વદમલકરુણાં યાચમાના લભન્તે
સ્વાસ્થ્યં તત્તેઽનુકમ્પા નિરુપમમહિમા શેષશૈલાગ્રદીપ! ॥ ૯૫૯॥

ત્વદ્ધ્યાનસ્થાપિતાસું સવનધરણિજાં જાનકીં હન્ત! રામ ।
ક્રોધાન્ધસ્ત્વદ્ગિરા દ્રાગ્ઘુતવહપતિતાં વીક્ષમાણો વ્યતિષ્ઠઃ ।
ત્રૈલોક્યપ્રત્યયાર્થં વ્યવસિતમુચિતં કિં ક્વ યાતા દયા તે
દુષ્ટે હ્યેતજ્જગદ્યત્ત્રિભુવનજનનીં તાં તથાપ્યભ્યનિન્દત્ ॥ ૯૬૦॥

હન્તું તં સૈન્ધવં યત્પ્રકુપિતવિજયોદગ્રસોગ્રપ્રતિજ્ઞાં

સાર્થં કર્તું ચ કોટિદ્યુમણિરુચિજુષા ચક્રરાજેન નાકે ।
ચઞ્ચત્સૂર્યાપિધાનં પ્રધનભુવિ ભવાન્કારયામાસ શૌરે ।
ભક્તત્રાણાય કિં વા કલયસિ કૃપયા નાત્ર ચિત્રં ન કિઞ્ચિત્ ॥ ૯૬૧॥

ઉદ્દિશ્ય શ્વેતવાહં તપનતનુભુવા રક્ષિતાં શક્તિમેકાં
રક્ષસ્યક્ષોભ્યદાક્ષ્યે પવતનયજે પાતયિત્વા રજન્યામ્ ।
જિષ્ણું ભક્તાગ્રગણ્યં રણભુવિ વિપદો મોચયામાસિથાહો ।
ભક્તત્રાણાય કિં વા કલયસિ કૃપયા નાત્ર ચિત્રં ન કિઞ્ચિત્ ॥ ૯૬૨॥

ઉત્તુઙ્ગક્ષ્માભૃદગ્રાદ્ગગનગમનતસ્સ્ફીતશુભ્રાંશુકસ્સન્
લોકાયૈવં સુધાંશુસ્સમુપદિશતિ યન્માનસાન્માધવસ્ય ।
આવિર્ભૂતા દયા સાપ્યહમિવ તદિયં શીતલા ક્લેશહન્ત્રી
તદ્યૂયં સંશ્રયધ્વં વૃષશિખરિપતેસ્તામતન્દ્રા મનુષ્યાઃ ॥ ૯૬૩॥

શશ્વદ્ભોગાનુભૂત્યાપ્યુપરતિરિહ નૈવાનુભૂતૌ પુનસ્ત-
ત્કાઙ્ક્ષા ચોજ્જૃમ્ભતે યદ્ધુતઘૃતહુતભુક્કલ્પસઙ્કલ્પતારા ।
અસ્મિન્ સાક્ષી યયાતિસ્તદનુદિનમહં કામકોપાભિતપ્તઃ
શ્રીમન્! શેષાદ્રિનાથ! ત્વદમલકરુણાં શીતલામત્ર યાચે ॥ ૯૬૪॥

સ્વાર્થત્વેનાર્જિતેષુ પ્રચુરતરધનેષૂચ્ચશૃઙ્ગેઽપિ સૌધે
સેવાહેવાકભૃત્યેષ્વપિ નવરુચિરપ્રત્નરત્નેષુ માની ।
પ્રાયસ્સ્વીયાઙ્ગમેયે સ્વપિતિ ખલુ તલે કુક્ષિમેયં રસાન્નં
પ્રાશ્નાત્યન્યં પરાર્થં પ્રકૃતિવિવશતાકાર્યમેતત્કૃપાલો ॥ ૯૬૫॥

વૈકુણ્ઠાદ્દિવ્યધામ્નોઽપ્યુરગશયનતોઽપીન્દિરાસુન્દરાઙ્ગં
નિત્યાનન્દસ્વરૂપં ભવગહનગલત્પ્રાણિપીડાપનુત્યૈ ।
માતર્ધીરેઽનુકમ્પે! ત્રિભુવનસરણિં દર્શયન્ત્યાનયસ્ય-
પ્યારાદ્ભાગ્યં તદેતત્કથયિતુમહમસ્મ્યલ્પચિત્તો ન દક્ષઃ ॥ ૯૬૬॥

સદ્ભિસ્સંસેવ્યમાનં કુમતિવનકુઠારં મહાભાષ્યકારં
શ્રીમદ્રામાનુજાર્યં ગુરુવરમુરુહૃદ્ધ્વાન્તવિધ્વંસસૂરમ્ ।
સન્દર્શ્યાજ્ઞાય મહ્યં યદુપકૃતિમતાનીઃ કૃપાં કિં બ્રવીમિ
શ્રીમંસ્તચ્છ્રીનિવાસ! પ્રગુણગુણનિધે! નિર્ભયોઽસ્મ્યત્ર પાપઃ ॥ ૯૬૭॥

ક્ષીરાકૂપારકન્યા યદચલદયિતા યસ્ય સર્વેશ્વરત્વં
શ્રીવત્સો યસ્ય વક્ષસ્યભિકનતિ તથા કૌસ્તુભો વૈજયન્તી ।
યદ્વાહો વૈનતેયશ્શયનમહિપતિર્ધામ વૈકુણ્ઠનામ

ત્વં શેષાદ્રૌ સ એવ પ્રવિલસસિ કૃપા હન્ત! મર્ત્યેષુ કીદૃક્ ॥ ૯૬૮॥

દુર્માર્ગવ્યાપૃતાનાં કટુકપટહૃદામન્યવિદ્રોહિણાઞ્ચ
સ્વાધીનાત્યન્તશાન્ત સ્વવચનકરણાસક્તહિંસાપ્રદાનામ્ ।
સાહ્યપ્રોત્સાહકેસ્મિન્સતિ કલિપુરુષે સાર્વભૌમે મુરારે!
સન્તસ્ત્વદ્ધ્યાનસક્તાઃ કથમિવ નિવસેયુઃ કૃપાં તે વિનાત્ર ॥ ૯૬૯॥

પ્રામાણ્યેન ત્રયીં તાં નુ કતિચિદુરરીકૃત્ય યેપ્યામનન્તઃ
તદ્વ્યાખ્યાકૈતવાત્ત્વાં ગુણિનમગુણિનં હન્ત । મિથ્યા જગચ્ચ ।
ઇત્યેવં વઞ્ચયન્તિ પ્રિયવૃષશિખરિંસ્તૈઃ કલિભ્રષ્ટધીભિઃ
વ્યાપ્તેસ્મિન્ ભૂમિભાગે પરિહર વસતિં મે કૃપાલો કૃપાતઃ ॥ ૯૭૦॥

કૃત્યાકૃત્યાન્ધદુષ્ટપ્રચુરભુવનતો ભીતભીતઃ પ્રસર્પ-
જ્જ્વાલાજાજ્વલ્યમાનજ્વલનપરિગતાગારવાસીવ વર્તે ।
શશ્વદ્રક્ષાપ્રતીક્ષઃ ક્ષણમપિ યુગવદ્ભાવયન્ભૂમિભાગે
શેષક્ષ્માભૃત્ક્ષિતીશ । ત્વદમલકરુણાં કાઙ્ક્ષમાણઃ ક્ષમાર્થી ॥ ૯૭૧॥

ધર્મોયત્રાસ્તિ તત્ર પ્રવિલસતિ જયોપીતિ વાર્તાપિ મિથ્યા
પ્રાયો દૃષ્ટં કિલૈતત્કલિમલકલુષે  તત્પ્રતીપોત્ર જેતા ।
પ્રત્યક્ષૈકપ્રમાણો ન યદનુમનુતે શાસ્ત્રવેદ્યં પરોક્ષં
તસ્માચ્છ્રી શ્રીનિવાસ પ્રહિણુ તવ કૃપાં વેદવિશ્વાસદાત્રીમ્ ॥ ૯૭૨॥

શાસ્ત્રાનુષ્ઠાનહીના મુહુરભિદધતસ્સ્વીયવૈરાગ્યનિષ્ઠાં
સર્વેષ્વાસક્તચિત્તા જલકમલદલં સાધુ દૃષ્ટાન્તયન્તઃ ।
પૂર્વચાર્યોપદિષ્ટાં  સરણિમતિગતાસ્સ્વેચ્છયા સઞ્ચરન્તઃ
સન્તિ જ્ઞાનિત્વદૃપ્તાઃ નનુ કથય કુતસ્તેષુ તે નાનુકમ્પા ॥ ૯૭૩॥

ત્વત્કૈઙ્કર્યૈકતાનૈરહિપતિશયનસ્સૂરિભિર્ગીયમાનં
શ‌ૃણ્વન્યસ્સામગાનં સરસિજનિલયાવિદ્યુદુદ્યોતમાનઃ ।
ગામ્ભીર્યાવાસનેત્રઃ પ્રવિલસતિ યથાવાક્સદાધામ્નિ દિવ્યે
ભક્તાર્થં શેષશૈલે નિરવધિકૃપયૈવાર્ચ્ચરૂપસ્તથા સઃ ॥ ૯૭૪॥

દુર્વૃત્તક્ષીણપુણ્યઃ પુનરપિ નરકે સમ્પતન્દુઃખભાગી
શશ્વદ્ભોગાભિલાષી પ્રતિજનિ ભુવને પર્યટત્યેષ મર્ત્યઃ ।
જ્ઞાત્વૈતચ્છાસ્ત્રતોઽયં સુકૃતકૃતમતિર્ભોગલબ્ધ્યા પ્રહૃષ્ટઃ
ભૂયાત્તચ્છ્રીનિવાસ! ત્વદમલકરુણાં પ્રેષયાત્ર પ્રસન્નઃ ॥ ૯૭૫॥

યોગીન્દ્રા ધ્યાનયોગાદ્ભવદનુભવતઃ ફુલ્લરોમાઞ્ચિતાઙ્ગાઃ
આનન્દાશ્રુપ્રદિગ્ધાશ્શિથિલિતહૃદયા વિસ્મૃતૈતત્પ્રપઞ્ચાઃ ।
કાલં ત્વાનન્દરૂપં ભુવિ પરિકલયન્ત્યૈહિકાંસ્તુચ્છયન્તઃ
શ્રીમંસ્તાદૃગ્દશાં મે વિતર કરુણયા શેષશૈલાગ્રદીપ ॥ ૯૭૬॥

સર્વં દ્વન્દ્વાત્મકં હિ પ્રતિભટસહિતં યદ્યપીહ પ્રકૃષ્ટં
દુષ્ટૈર્વ્યાહન્યતે યજ્જયતિ ભુવિ તથાપ્યાગમત્યાજ્યમેવ ।
તસ્માત્સત્કર્મ લોકે પ્રચલતિ વિરલં સન્તિ સન્તોઽપ્યતન્દ્રાઃ
એવં તચ્છ્રીનિવાસ! પ્રહિણુ તવ કૃપાં સત્સમૃદ્ધિપ્રદાત્રીમ્ ॥ ૯૭૭॥

યોગાભ્યાસૈકનિષ્ઠોઽપ્યધિગતહૃદયસ્વસ્થભાવોઽપિ દીર્ઘ-
પ્રાણાયામાવરુદ્ધશ્વસનગતિરપિ સ્થેમસિદ્ધાસનોઽપિ ।
યોગી તત્સિદ્ધકાલે સુરપદવિભવાકૃષ્ટચિત્તો યિયાસુઃ
પ્રભ્રષ્ટસ્સ્યાદ્દયા તે ન યદિ મધુરિપો! પૂર્વસંસ્કારવશ્યઃ ॥ ૯૭૮॥

શ્રીમાન્કૂરાધિનાથઃ પથિગતદયિતાભીતિસન્નોદનાર્થં
દૂરે પ્રક્ષિપ્ય વસ્ત્રપ્રપિહિતકનકામત્રમત્રસ્તચિત્તામ્ ।
વ્યાતન્વન્નબ્રવીત્તાં ન ચ યદિ મમતા તત્ર ભીર્નેતિ ધીરઃ
તાદૃગ્બુદ્ધિં મુરારે! વિતર કરુણયા મે મમત્વાશ્રયાય ॥ ૯૭૯॥

જ્ઞાન્યગ્ર્યાદ્યાજ્ઞવલ્ક્યાદધિગતમમતાહીનતૈકોપદેશઃ
તત્સૃષ્ટાગ્નિપ્રદગ્ધં સ સપદિ જનકસ્સૌધમાકર્ણ્ય ધીરઃ ।
ઔદાસ્યેનોપદેશે વિનિહિતહૃદયો મે ન કિઞ્ચિત્ પ્રદગ્ધં
જ્ઞાનીત્યૂચે તથા માં કુરુ તવ કૃપયા ભોગિરાટ્ શૈલનાથ ॥ ૯૮૦॥

સ્નાનાનુષ્ઠાનહીના મૃગસહવસતિશ્ચાક્ષરજ્ઞાનશૂન્યા
વાર્ધક્યક્લિષ્ટકાર્યાપ્યવનિગતફલાન્વેષણાયાત્તચારા ।
ભક્ત્યા તાન્યર્પયિત્વા દ્યુમણિકુલમણે! તે શ્રમણ્યાપ હર્ષં
તસ્યા ભક્તેર્લવાંશોપ્યયિ ન મયિ વિભો । તેઽનુકમ્પા ગતિર્મે ॥ ૯૮૧॥

કાન્તારે વ્યાઘ્રભીતશ્શરણમુપગતો મર્કટં વૃક્ષસંસ્થં
કશ્ચિન્મર્ત્યોઽભિગુપ્તસ્તરુવિટપતટે તેન નિદ્રાલુમેનમ્ ।
કીશં તસ્મૈ ત્વદાત્તન્ન હિ જગતિ નરાત્સ્વાર્થિનો હા! કૃતઘ્નઃ
તસ્માચ્છ્રીવેઙ્કટેશ! પ્રહિણુ તવ કૃપાં સર્વસત્ત્વાભિરામામ્ ॥ ૯૮૨॥

દીક્ષાબદ્ધા દ્વિજાગ્ર્યાસ્સવહવનરતાસ્ત્વાં વિદુર્નૈવ શૌરે!
યજ્ઞારાધ્યં બુધાસ્તે કિમુ ફલમખિલજ્ઞાનતસ્તદ્ ગૃહિણ્યઃ ।

તુભ્યં યત્પાયસાદિ પ્રિયતમમનસૈવાર્પયામાસુરારાત્
શાસ્ત્રજ્ઞાનેન કિં વા ન યદિ તવ કૃપા વેઙ્કટક્ષ્માભૃદીશ ॥ ૯૮૩॥

સ્ખાલિત્યં ગચ્છતસ્સ્યાદિતિ નયમનુસૃત્યાપરાધાન્મદીયાન્
અજ્ઞાનોજ્જૃમ્ભિતાંસ્તાન્વૃષશિખરિપતે! ક્ષન્તુકામોઽસિ સત્યમ્ ।
ઇચ્છાપૂર્વં કૃતાનાં પ્રતિદિનમપિ ચોગ્રાગસાં મામકાનાં
ક્ષાન્તિસ્સા તે કથં વા તદહમિહ કૃપાં માતૃકલ્પાં તુ યાચે ॥ ૯૮૪॥

મત્તો જ્ઞાનં ત્વપોહસ્સ્મરણમપિ તથેત્યભ્યુદીર્ણં ત્વયૈવ
શ્રીમન્! કોઽહં તથાત્વે નિખિલમપિ ભવત્સિદ્ધસઙ્કલ્પનિઘ્નમ્ ।
તત્ત્વત્સઙ્કલ્પનિઘ્નઃ પશુસદૃશગતિઃ ક્ષુત્પિપાસાભિભૂતઃ
સર્વત્રાપિ ભ્રમામિ પ્રહિણુ તવ કૃપાં માથવા મે ન કિઞ્ચિત્ ॥ ૯૮૫॥

ગમ્ભીરામ્ભસ્સુજાતદ્યુમણિકરપરામર્શફુલ્લામ્બુજાક્ષ !
ત્વત્કુલ્યાકલ્પનેત્રે પ્રવહતિ કરુણા સાપરાધેષ્વપીહ ।
તસ્માદભ્યર્થયે ત્વાં મયિ દુરિતમયે પાતયેત્યેકવારં
શ્રીમંસ્તાદૃક્કટાક્ષં મધુમથન! મમ પ્રાર્થનાં સ્વીકુરુ ત્વમ્ ॥ ૯૮૬॥

સૌશીલ્યં યત્ત્વયા તત્પ્રકટિતમિહ ગોપાલકૈસ્સેવિતેન
સ્વાતન્ત્ર્યં ક્વાપિ લીનં યદુવરકુલજાતસ્ય તે વેઙ્કટેશ!
સઙ્કોચં ત્વદ્ગુણાનાં વિકસનમપિ તત્કાલયોગ્યં તનોષિ
પ્રાયસ્સર્વત્ર નિત્યં તવ ખલુ કરુણા ત્વેકરૂપા વિચિત્રમ્ ॥ ૯૮૭॥

ભેદાભેદશ્રુતીનાં ઘટકનિગમતોવારયન્નર્થદૌસ્થ્યં
જીવાન્તર્યામિતાં તે સદખિલમિતિ યો દર્શનાદર્શદર્શી ।
વ્યાચષ્ટે લક્ષ્મણાર્યં ગુરુવરમભજસ્તં કિમેતન્મુરારે!
સ્વં જ્ઞાતું ગુર્વપેક્ષા તવ ચ કિમથવા લોકમર્ત્યે કૃપાતઃ ॥ ૯૮૮॥

ઐશ્વર્યોદ્રિક્તચિત્તાઃ ક્ષણમપિ ન હિ માં સંસ્મરન્તીતિ મત્વા
દારિદ્ર્યક્લેશદાયી ભવદમલપદધ્યાનસક્તાન્વિતન્વન્ ।
પાપગ્રન્થ્યુજ્ઝિતાંસ્તાન્નનુ ભુવિ તનુષે નૈવ જાનન્તિ તે તુ
ત્વત્કારુણ્યં જનેભ્યસ્સુકૃત વિતરણે બદ્ધદીક્ષં હિ નાથ ॥ ૯૮૯॥

નિત્યસ્સન્નિર્વિકારઃ પ્રકૃતિમનુસરન્ બાલ્યકૌમારચઞ્ચ-
ત્તારુણ્યસ્થાવિરાન્તાસ્તદનુગુણગુણા ધારયન્સન્ દશાશ્ચ ।
રામત્વે યાદવત્વેઽપ્યનુભવરસિકો માનુષપ્રાપ્યભોગો
ભક્તાધીનો હ્યભૂસ્ત્વં વૃષશિખરિપતે! વચ્મિ કિં તેઽનુકમ્પામ્ ॥ ૯૯૦॥

કાચિદ્વાણી ત્રયીસ્થા ત્રિપુરરિપુનમસ્યાં વદત્યાદરાર્હં
કાચિદમ્ભોલિપાણેરપચિતિમુચિતાં સ્તૌતિ વહ્નેસ્તથૈવ ।
એવઞ્ચેદલ્પબુદ્ધેઃ કથમિવ ન ભવેચ્ચિત્તચાઞ્ચલ્યમસ્મિન્
તત્તે તાસ્તા ભજન્તિ ત્વદરુણચરણં નાનુકમ્પા ન તેષુ ॥ ૯૯૧॥

સર્વાન્તર્યામિતાન્તે ભુવિ મનસિ જના ભાવયન્તો નમસ્યાં
કુર્વન્ત્વેતે પરેભ્યો જલધિરિવ ગતિર્યન્નદીનાં ભવેસ્ત્વમ્ ।
તસ્યા વિસ્મૃત્ય ચ ત્વામચિરલઘુફલપ્રેપ્સવો દેવતાસ્તાઃ
વન્દન્તે મન્દમેધાસ્તદિહ કુરુ કૃપાં ત્વત્સપર્યાનુકૂલામ્ ॥ ૯૯૨॥

સાક્ષાદ્દ્રષ્ટા યતીનાં પ્રભુવરગુરુણા તાઞ્ચ વૈકુણ્ઠગદ્યે
પ્રોક્તાં સૂક્તિં સ્મરન્સન્પરમપદમહાવૈભવધ્યાનયોગાત્ ।
સર્વં કાલં ક્ષિપામિ દ્રુહિણમુખસુરાગમ્યદિવ્યપ્રદેશં
દ્રષ્ટું શક્તો મુકુન્દ! ત્વદમિતકરુણાપાતમત્રાન્તરા કઃ ॥ ૯૯૩॥

વેદા નિર્વેદવાદા હુતભુગપિ ધૃતં ચક્ષુષા નેક્ષતેઽપિ
વ્યાપાદાપાદનેચ્છા જગતિ ચ મનુજાસ્સજ્જનાકલ્પકલ્યાઃ ।
વન્ધ્યા સન્ધ્યોપસત્ત્યા ભગવદપચિતિશ્શોચનીયા વિચેયાઃ
ત્વદ્ભક્તા હન્ત! શૌરે! ચલતિ કલિબલે ત્વદ્દયૈકા ગતિર્મે ॥ ૯૯૪॥

એકા યદ્ધાતૃપીઠં વિદલયતિ તથા દૃષ્ટિરન્યા ત્વદીયા
સમ્ફુલ્લં તન્નિતાન્તં મુકુલયતિ હરે! લોકમેવં કટાક્ષૈઃ ।
હાસહ્રાસપ્રવૃત્તૌ ઘટયતિ તત એવાહુરેતદ્બુધેન્દ્રાઃ
દ્વન્દ્વાયત્તં જગદ્ધીત્યનુપમકૃપયા માં કુરુ દ્વન્દ્વમુક્તમ્ ॥ ૯૯૫॥

યાતાયાતાતિખિન્ના અપિ શઠપવનાચ્છન્નપૂર્વસ્મૃતિત્વાત્
નૂત્નત્વેનાત્તદેહભ્રમમુષિત બહૂત્પત્તિહેયત્વમેધાઃ ।
જીવાસ્તેજસ્સ્વરૂપાઅપિ જગતિ લુઠન્ત્યમ્બુજાક્ષપ્રતીક્ષાઃ
શિક્ષાહીના મુકુન્દ । પ્રહિણુ તવ કૃપાં ચેતનોજ્જીવનાર્થમ્ ॥ ૯૯૬॥

મૂર્ધા ત્વત્પાદનત્યાં નયનમપિ ભવદ્રૂપસન્દર્શને મે
જિહ્વા ત્વન્નામનુત્યાં કરયુગલમપિ ત્વત્પદાર્ચા વિધૌ ચ ।
પાદૌ ત્વન્મન્દિરાભ્યન્તરપરિસરણે ધ્યાનસક્તં મનસ્સ્યુઃ
શ્રીમન્! શેષાદ્રિનાથ! ત્વદમલકૃપયા પ્રાર્થયેત્વામિદન્તુ ॥ ૯૯૭॥

ધૂર્તાનાં વઞ્ચકાનાં કપટકટુહૃદામન્યયોષિજ્જુષાઞ્ચ

દ્રોહોદ્રિક્તાત્મકાનાં શ્રિતહૃદયારુન્તુદવ્યાહૃતીનામ્ ।
વાસો યત્રાસ્તિ તસ્મિન્ પરિહર કૃપયા મે સ્થિતિં દીનબન્ધો
શ્રીમન્! શેષાદ્રિનાથ! પ્રતિદિનમપિ તત્પ્રાર્થયે ત્વામિદન્તુ ॥ ૯૯૮॥

ત્વદ્દત્તાદ્ભોગભાગાદધિકતરસુખપ્રેપ્સયા મર્ત્યવર્ગઃ
કૃચ્છ્રાસાધ્યપ્રયત્નસ્સ્ખલતિ પતતિ ચાપ્રાપ્તકામોતિદુઃખી ।
યદ્ધાત્રા ફાલદેશે પરિલિખિતમતો નાધિકં પ્રાપ્સ્યતીતિ
પ્રાયો જાનાતિ નૈવ પ્રહિણુ તવ કૃપાં કામહન્ત્રીં કૃપાલો ॥ ૯૯૯॥

શ્રીમદ્રામાનુજાર્યપ્રયતપદયુગધ્યાનતશ્ચિત્તશુદ્ધિઃ
તચ્છ્રીસૂક્ત્યર્થચિન્તાદ્વિગુણિતપુલકસ્યાસ્તુ મે કાલયાપઃ ।
તદ્ભક્તાનાં પદાબ્જેષ્વનિશમતરલા ભક્તિરપ્યાવિરસ્તુ
શ્રીમન્ । એવં તનોતુ ત્વદમલકરુણા હેતુહીનાતિદીને ॥ ૧૦૦૦॥

શ્રીશાહેતુપ્રસાદસ્ફુરદુરુવિમલજ્ઞાનદૃષ્ટાચ્યુતસ્ય
સ્વાન્તધ્વાન્તોષ્ણરશ્મેઃ કઠિનશઠરિપો ર્ભૂમિભાગ્યાત્મકસ્ય ।
ત્ર્ય્યન્તોદ્ઘુષ્ટસારપ્રકટનરુચિરા દ્રાવિડામ્નાયગાથાઃ
ગાયન્ કાલં ક્ષિપેયં સતતમપિ યથા માં તથા વર્તયાત્ર ॥ ૧૦૦૧॥

ઇત્થં શ્રીનિગમાન્તદેશિકવરેણોક્તં વૃષાદ્રીશિતુઃ
સ્તોત્રં શ્રીવરવર્ણિનીમુખવરાદ્યો વા પઠત્યાદરાત્ ।
સમ્પદ્દાયિ દયાસહસ્રમમલં શ્રીશાનુકમ્પાં સદા
સ પ્રાપ્નોતિ યદીપ્સિતં તદપિ યદ્ત્તૈહિકામુષ્મિકમ્ ॥ ૧૦૦૨॥

શ્રીનિવાસાય સર્વાન્તર્વાસાય કરુણાત્મને ।
તન્માનસનિવાસાયૈ દયાયૈ ચાસ્તુ મઙ્ગળમ્ ॥ ૧૦૦૩॥

ઇતિ શ્રીલક્ષ્મીદાસાધિષ્ઠિત વેદાન્તદેશિકપ્રણીતે દયાસહસ્રે
દશમશતકં સમ્પૂર્ણમ્ ।

ઇતિ સમાપ્તશ્ચાયં ગ્રન્થઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમતે લક્ષ્મીદાસાય નમઃ ।
શ્રીમતે નિગમાન્ત દેશિકાય નમઃ ।

## મુક્તકાનિ શ્રીલક્ષ્મીદાસકૃતાનિ

દ્રવ્યમૂલાનિ પાપાનિ હરન્નહિ મહીધરે ।
યોઽનુગૃહ્ણાતિ મર્ત્યાંસ્તાન્ શ્રીનિવાસમુપાસ્મહે ॥ ૧॥

પટીરોશીર કાશ્મીર જન્મકર્પૂરવાસિતૈઃ ।
તીર્થૈશ્શ્રિયાભિષિક્તઃ શ્રી વેઙ્કટેશો જયત્વસૌ ॥ ૨॥

શઙ્ખચક્રાઙ્કિતઃ શ્રીમાન્ ભાષ્યકારસ્ય શિષ્યતામ્ ।
ભેજે ભુજઙ્ગશૈલે યઃ શ્રીનિવાસં નમામિ તમ્ ॥ ૩॥

પરાત્પરોઽપિ સુલભઃ શેષાદ્રિશિખરે મુદા ।
યો રાજતે નમસ્તસ્મૈ શ્રીનિવાસાય મઙ્ગળમ્ ॥ ૪॥

પદ્માવતી સમેતાય શેષશૈલવિહારિણે ।
સર્વાભીષ્ટપ્રદાત્રેસ્યાત્ શ્રીનિવાસાય મઙ્ગળમ્ ॥ ૫॥

મઙ્ગળાનાં નિધિર્મુગ્ધા શ્રીનિવાસાનુવર્તિની ।
પાવયન્તી દૃશા મર્ત્યાન્ જીયાત્ પદ્મવતી સદા ॥ ૬॥

ભ્રૂલતાચાલનેનૈવ દ્વન્દ્વાત્મકમિદં જગત્ ।
ક્રીડાર્થં કારયત્યૈ સ્યાત્ પદ્માવત્યૈ સુમઙ્ગલમ્ ॥ ૭॥

પદ્માવતીતિ વિખ્યાતા શ્રીનિવાસપ્રિયા ચ યા ।
પદ્માવાસા જગદ્વન્ધ્યા તસ્યૈ સ્યાન્મઙ્ગલં શ્રિયૈ ॥ ૮॥ - શ્રી લક્ષ્મીદાસઃ
- શ્રીરસ્તુ -
અષ્ટશક્તિવિશિષ્ટાય શિષ્ટેષ્ટાર્થપ્રદાયિને ।
દર્શયિત્રે પ્રપત્તિં સ્યાદ્વેઙ્કટેશાય મઙ્ગળમ્ ॥ - શ્રી રામાનુજમુનિ
મધુરસ્મિતમાત્રેણ કૃતાશ્વાસમિવ શ્રિયા ।
અઞ્ચિતોરસ્સ્થલં દેવં શ્રીનિવાસમુપાસ્મહે ॥ – શ્રી ગોદાદેવી

Encoded and proofread by Mandayam Nayaka Ramanuja

*Shri Dayasahasram by Lakshmidasa*
pdf was typeset on March 18, 2025

Please send corrections to *sanskrit@cheerful.com*